Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

## ॥ अथ श्रीसंदेहविषौषधीनामकल्पसूत्रव्याख्या प्रारभ्यते ॥

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

ध्यात्वा श्रीश्रुतदेवीं । पर्युषणाकल्पदुर्गपदविवृत्तिः ॥ स्वपरानुग्रहहेतोः । किंचिदियं लिख्यते भयका ॥ १ ॥ हृदयानि सहृदयानां । पर्युषणाकल्पगोचरा सुचिरं ॥ रंजयतु पंजिकेयं । संदेहविषौषधिनामा ॥ २ ॥ पर्युषणाकल्पस्य चादौ केषुचिदादर्शेषु मंगलार्थं पंचनमस्कारो दृश्यते, स च सुबोध एव, अत्र चाध्ययने त्रयं वाच्यं, जिनानां चरितानि, स्थविरावली पर्युषणासामाचारी च. तत्रापि वर्त्तमानतीर्थाधिपतित्वेनासन्नोपकारित्वात् प्रथमं श्रीवर्द्धमानस्वामिनश्चरितमाहुः श्रीभद्रबाहुपादाः, ' तेणं कालेणं इत्यादि ' ते इति प्राकृतशैलीवशात्तस्मिन् काले वर्त्तमानावसर्पिण्याश्चतुर्थारकलक्षणे, एवं तस्मिन् समये तद्विशेषे यत्रासौ भगवान् देवानंदायाः कुक्षौ दशमदेवलोकगतपुष्पोत्तरविमानादवतीर्णः, णं शब्दो वाक्यालंकारे, अथवा सप्तम्यर्थे आर्षत्वात्, तृतीयैवेयं हेतौ वा त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्तेन कालेन तेन च समयेन हेतुभूतेनेति व्याख्येयं, अथ तच्छब्दस्य पूर्वपरामर्शित्वादत्र तदा किं परामृश्यते, इति चेत् कालसमयौ भगवता ऋषभस्वामिनाऽन्यैश्च तीर्थंकरैः श्रीवर्द्धमानस्य षण्णां* च्यवनादीनां कल्याणकानां हेतुत्वेन कथितौ, तावेवेति ब्रूमः, श्रमणस्तपस्वी भगवान् समग्रैश्वर्ययुक्तः महावीरः कर्मशत्रुजयादन्वर्थनामा चरमजिनः, पंचहत्थोत्तरेत्ति, हस्तादुत्तरस्यां दिशि वर्त्तमानत्वात्, हस्त उत्तरो यासां वा ता हस्तोत्तरा उत्तरफाल्गुन्यः, बहुवचनं बहुकल्याणकापेक्षं, पंचसु च्यवनगर्भापहारजन्मदीक्षाज्ञानकल्याणकेषु हस्तोत्तरा यस्य स तथा, च्यवनादीनि पंचोत्तरफाल्गुनीषु जातानि, निर्वाणस्य स्वातौ संभूतत्वादिति भावः, होत्थत्ति अभवत्, पंचहस्तोत्तरत्वमेव तद्यथेत्यादिना भावयति—

साहरिएत्ति संक्रामितः, मुंडेत्ति द्रव्यभावमुंडितः, आगाराद् गृहवासान्निष्क्रम्येतिशेषः, अनगारितां साधुतां प्रव्रजितः प्रकर्षेण गतः, अणंते इत्यादि, अनंतमनंतार्थविषयत्वात्, अनुत्तरं सर्वोत्तमत्वात्, निर्व्याघातं कटकुड्यादिभिरप्रतिहतत्वात्, निरावरणं क्षायिकत्वात्, कृत्स्नं सकलार्थग्राहक-

* तपगच्छाद्यनुसारेण पंचकल्याणकान्येव वदंति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वात्, प्रतिपूर्णं सकलस्वांशसमन्वितत्वात् पौर्णमासीचंद्रमंडलवत्. केवलवरनाणदंसणेत्ति, केवल-मसहायमत एव वरं ज्ञानं च दर्शनं चेति ज्ञानदर्शनं, ततः प्राक्पदाभ्यां कर्मधारयः, तत्र ज्ञानं विशेषावबोधरूपं, दर्शनं सामान्यावबोधरूपमिति. गिह्माणंति, ग्रीष्मस्य, आर्षे ग्रीष्मशब्दः स्त्रीलिंगो बहुवचनांतश्च, छठीपक्खेणंति दिनरात्रिभ्यामहोरात्रस्योभयपदत्वात् षष्ठ्या अहोरात्रस्य रात्रौ, क्वचि-त्तु छठीदिवसेणंति व्यक्त एव पाठः. तत्र च दिवसशब्देन तिथिरुच्यते. महाविजयेत्यादि, महान् विजयो यत्र तथाविधं च तत् पुष्पोत्तरं पुष्पोत्तरसंज्ञं च, तदेव प्रवरेषु श्रेष्ठेषु पुंडरीकं विमानानां मध्ये उत्तमत्वात्. ' वीससागरोवमठियाउ ' इत्यनंतरं क्वचित ' आउक्खएणं भवक्खएणं, ठिइक्ख-एणंति ' दृश्यते. तत्रायुर्देवायुष्कं, भवो देवगतिः, स्थितिराहारो वैक्रियशरीरेऽवस्थानं वा, तेषां क्षयेण, अस्यां वाचनायामुत्तरत्र आहारवक्कंतीए इत्यादौ व्युत्क्रांतिशब्दो वक्ष्यमाणयुक्त्योत्पादार्थो व्याख्येयः, अन्यथा पौनरुक्त्यं स्यात्. ' अणंतरं चयं चइत्तत्ति ' अव्यवहितं च्यवं च्यवनं चित्वा कृत्वेत्यर्थः, अथवाऽनंतरं देवभवसंबंधिनं चयं शरीरं त्यक्त्वा विमुच्य ' इहेवत्ति ' देशतः प्रत्यासन्ने, न पुनरसंख्येयत्वाज्जंबूद्वीपानामन्यत्रेति भावः. ' दोहियत्ति ' मुनिसुव्रतनेम्योः ' पंचहत्तरीए वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेहिं ' इत्यादौ तृतीया सप्तम्यर्थे, यावत् ' वीइक्कंतेहिंति ' पुव्वरत्तावरत्तकालसमयंमित्ति, पूर्वरात्रश्चासावपररात्रश्च पूर्वरात्राऽपररात्रः, स एव काललक्षणः समयो, न तु सामाचारादिलक्षणः, पूर्वरात्राऽपररात्रकालसमयस्तत्र मध्यरात्रे इत्यर्थः.

इह चार्षत्वादेकरेफलोपे पुव्वरत्तावरत्तेत्युक्तं, अपरात्रशब्दो वायं, अर्द्धे गते सर्वं गतमितिन्यायादपगता रात्रिरपरात्रः, क्वचिच्च ' अद्धरत्तावरत्तेति ' पाठः तत्र चार्द्धरात्रलक्षणो योऽपररात्रस्तत्रेति ज्ञेयं. पंचहत्तरीए वासेहिंति, तत्र द्वासप्ततिवर्षाणि भगवत आयुस्तन्निर्वाणानंतरं च वर्षत्रयं सार्द्धाश्चाष्टौ मासाश्चतुर्थारकः, जोगमुवागएणंति, अर्थाच्चंद्रेणेति, आहारवक्कंतीएत्ति, आहारापक्रांत्या देवाहारपरित्यागेन, शरीरापक्रांत्या वैक्रियशरीरत्यागेन अथवा आहारव्युत्क्रांत्याऽपूर्वाहारोत्पादेन, मनुष्योचिताहारग्रहणेनेत्यर्थः, एवमन्यदपि पदद्वयं, ' कुच्छिंसि ' कुक्षौ ' गब्भत्ताए ' गर्भतया व्युत्क्रांत उत्पन्नः, ' चइस्सामित्ति ' यद्यपि देवानां षण्मासावशेषायुषां, माल्यम्लानिः कल्पवृक्षप्रकंपः । श्रीह्रीनाशो वाससां चोपरागः ॥ दैन्यं तंद्रा कामरागांगभंगौ । दृष्टेर्भ्रांतिर्वेपथुश्चाऽरतिश्च ॥ १ ॥ इति भावा जायंते, तथापि तीर्थकरसुराः पुण्योत्कर्षाद्विज्ञानकांत्यादियुक्ता भवंतीति च्यवनभविष्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्कालं भगवान् जानाति, च्यवमानस्तु न जानाति, च्यवनस्यैकसामयिकत्वेन सूक्ष्मत्वात्. छाद्मस्थिकज्ञानोपयोगस्य च जघन्यतोऽप्यांतर्मुहूर्त्तिकत्वात् च्यवनकालं भगवान्न जानाति च्युतस्तु जानाति च्युतोऽस्मीति, पूर्वभवायातज्ञानत्रयसद्भावात्. जं रयणिंति. यस्यां रजन्यां सुत्तजागरत्ति. सुप्तजागरा नातिजाग्रती, अत एवाह—ओहीरमाणी ओहीरमाणी वारंवारमीषन्निद्रां गच्छंतीत्यर्थः. इमेयारूवेत्ति, इमान् महास्वप्नानितिसंबंधः. एतदेव वर्णितस्वरूपं रूपं येषां स्वप्नानां. न कश्चिदूनं न्यूनमधिकं वा ते तथा तान्, उराले इत्यादि, उदारान् प्रधानान् कल्याणान् कल्याणानां शुभसमृद्धिविशेषाणां कारणत्वात्. कल्यं वा नीरोगत्वमणंति गमयंति इति कल्याणाः तानिति, शिवानुपद्रवोपशमहेतुत्वात्, धन्यान् धनावहत्वात्. मंगल्यान् मंगले दुरितोपशमे साधुत्वान्. सश्रीकान् सशोभानिति, ' गयवसहगाथा ' गजवृषभसिंहाः प्रतीताः, अभिषेक इति श्रियः संबंधी. दाम पुष्पमाला, शशिदिनकरौ प्रतीतौ, ध्वजः पताका, कुंभो घटः, पद्मोपलक्षितं सरः पद्मसरः, सागरः समुद्रः. विमानं देवानां भवनं प्रासादः, रत्नोच्चयो रत्नभृतं स्थालं, शिखि निर्धूमो वह्निः, यो देवलोकादवतरति तन्माता विमानं पश्यति, यस्तु नरकादुध्धृत्योत्पद्यते तन्माता भवनमिति चतुर्दशैवैते स्वप्नाः. विमानन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वनयोरेकतरदर्शनादिति. 'हट्ठतुट्ठेत्यादि' हृष्टतुष्टाऽत्यर्थं तुष्टाऽथवा हृष्टा विस्मिता, तुष्टा तोषवती, 'चित्तमाणंदियत्ति' चित्तेनानंदिता, आनंदितं वा चित्तं यस्याः सा चित्तानंदिता, मकारः प्राकृतत्वात्, अथवा हृष्टं विस्मितं तुष्टं तोषवच्चित्तं यत्र तत्तथा, तद्यथा भवत्येवमानंदिता. 'आणंदियाणंदियत्ति' पाठे तु आ ईषन्मुखसौम्यतादिभावैर्नंदिता समृद्धिमुपगता, ततश्च नंदिता समृद्धतरतामुपागता, प्रीतिर्मनसि यस्याः सा प्रीतिमनाः, परमं सौमनस्यं जातमस्याः सा परमसौमनस्यिता, हर्षवशेन विसर्पद्विस्तारयायि हृदयं यस्याः सा तथा, सर्वाणि प्राय एकार्थिकान्येतानि प्रमोदप्रकर्षप्रतिपादनार्थत्वात् स्तुतिरूपत्वाच्च न दुष्टानि, यदाह—वक्ता हर्षभयादिभि—राक्षिप्तमनास्तथा स्तुवन्निंदन् ॥ यत्पदमसकृद् ब्रूयात् । तत्पुनरुक्तं न दोषाय ॥ १ ॥ इति, धाराभिर्जलधरवारिधाराभिराहतं हतं वा यत्कदंबं तत्कदंबपुष्पं, तदिव समुल्लसितानि रोमाणि कूपेषु रोमरंध्रेषु यस्याः सा तथा.

'सुमिणोग्गहं करेत्ति.' स्वप्नानां स्मरणं करोति. विशिष्टफललाभारोग्यराज्यादिकं विभावयतीत्यन्ये, 'अतुरियमित्यादि' अत्वरितं मानसौत्सुक्याभावेन, अचपलं कायतः, असंभ्रांतनयाऽचालतया, 'अवलंबयाएत्ति' क्वचित् पाठः. तत्राऽविलंबितयाऽविच्छिन्नया, 'रायहंससरिसीएत्ति' रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जहंसगतिसदृश्या गत्या ' जएणं विजएणं ' इत्यादि क्वचित् पठ्यते, तत्र जयः परैरनभिभूयमानता प्रतापवृद्धिश्च. विजयः परेषामसहमानानामभिभवः, अथवा जयः स्वदेशे, विजयः परदेशे. ' आसन्ना आस्वस्था गतिजनितश्रमाऽभावात्, ' वीसन्ना ' विश्वस्ता संक्षोभाऽभावादनुत्सुका, ' सुहासणवरगया ' सुखेन सुखं वा शुभं वा आसनवरं गता या सा तथा. करयलेत्यादि, करतलाभ्यां परिगृहीत आत्तः करतलपरिगृहीतः, तं शिरस्यावर्त्तनं प्रादक्षिण्येन परिभ्रमणं यस्य स शिरस्यावर्त्तः तं, शिरसा प्राप्तं इत्यन्ये, दशनखमंजलिं मुकुलितकमलाकारं मस्तके कृत्वा एवमवादीत्, देवाणुप्पियत्ति, हे देवानां प्रिय सुभग, अथवा देवानप्यनुरूपं प्रीणातीति देवानुप्रियः, तस्य संबोधनं हे देवानुप्रिय, ' किं मण्णे ' इत्यादि, मन्ये इति वितर्कार्थे निपातः, को मन्ये कल्याणकफलवृत्तिविशेषो भविष्यतीति. सोच्चत्ति, श्रुत्वा श्रोत्रेणाकर्ण्य निशम्य हृदयेनावधार्य. ' सुमिणुग्गहं करेत्ति ' स्वप्नावग्रहमर्थावग्रहतः, तत ईहां तदर्थपर्यालोचनलक्षणामनुप्रविशति. ' अप्पणोत्ति ' आत्मसंबंधिना स्वाभाविकेन सहजेन मतिपूर्वेणाभिनिबोधिकप्रभवेन बुद्धिविज्ञानेन मतिविशेषभूतौत्पात्तिक्यादिबुद्धिरूपपरिच्छेदेन, अथवा बुद्धिः सांप्रतदर्शिनी, विज्ञानं पूर्वापरार्थविभावकमतीतानागतवस्तुविष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यं इत्यर्थः, तयोः समाहारेण बुद्धिविज्ञानेन, अर्थावग्रहं स्वप्नफलनिश्चयं करोति, ततोऽवादीत.

आरुग्गेत्यादि, आरोग्यं नीरोगता, तुष्टिः संतोषः, दीर्घायुश्चिरजीवित्वं, अर्थलाभ इत्यादिषु भविष्यतीति शेषो दृश्यः. एवं खलुत्ति, एवंरूपादुक्तफलसाधनसमर्थात् स्वप्नाद्दारकं प्रजनिष्यसीति संबंधः, सोपसर्गत्वात सकर्मको जनिः, ' बहुपडिपुन्नाणं ' अतिपूर्णेषु षष्ठ्याः सप्तम्यर्थत्वात्. अर्द्धमष्टमं येषु तान्यर्धाष्टमानि, तेषु रात्रिंदिवेष्वहोरात्रेषु व्यतिक्रांतेषु ' अहीणेत्यादि ' अहीनान्यन्यूनानि, लक्षणतः प्रतिपूर्णानि स्वरूपतः पंचापींद्रियाणि यस्मिंस्तथाविधं शरीरं यस्य स तथा; ' तं लक्खणवंजणगुणोववेयमिति ' लक्षणानि स्वस्तिकचक्रादीनि, व्यंजनानि मषतिलकादीनि. तेषां यो गुणः प्रशस्तता, तेनोपपेतो युक्तो यः स तथा तं. उप अप इति इतिशब्दत्रयस्य स्थाने शकंध्वादिदर्शनादुपपेत इति स्यात्, अथवा सहजं लक्षणं पश्चाद्भवं व्यंजनं. गुणाः सौभाग्यादयः.

' माणुम्माणपमाणपडिपुन्नसुजायसव्वंगसुंदरमिति ' तत्र मानं जलद्रोणप्रमाणता, कथं? जलस्यातिभृते कुंडे प्रमातव्यपुरुषे निवेशिते यज्जलं निस्सरति. तद्यदि द्रोणमानं स्यात्तदा स पुरुषो मानप्राप्त उच्यते, तथा उन्मानमर्द्धभारप्रमाणता. कथं? तुलारोपितः पुरुषो यद्यर्द्धभारं तुलति त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दा स उन्मानप्राप्त इत्युच्यते, प्रमाणं तु स्वांगुलेनाष्टोत्तरशतांगुलोच्छ्रयता, यदाह—' जलदोण-मद्धभारं । सुमुहाइं समूसिन जो न चन ॥ माणुम्माणपमाणं । तिविहं खलु लक्खणं नेयं ' ॥ ॥ १ ॥ ' सुमुहाईति ' सुमुखानि द्वादशांगुलप्रमाणानि, नवभिर्गुणितानि अष्टोत्तरशतमंगुलानां भवति, शेषपुरुषलक्षणं एतत्; तीर्थकरास्तु विंशत्यंगुलशतमाना भवंति, तेषां हि मस्तके द्वादशां-गुलमुष्णीषं भवतीति; ततश्च मानोन्मानप्रमाणैः प्रतिपूर्णान्यन्यूनानि सुजातानि सुनिष्पन्नानि स-र्वाणि अंगानि शिरःप्रभृतीनि यस्मिंस्तत्तथाविधं सुंदरमंगं शरीरं यस्य स तथा तं, शशिवत् सौम्य आकारो यस्य स तथा तं, कांतं कमनीयमत एव प्रियं द्रष्टॄणां दर्शनरूपं यस्य स तथा तं, अत एव सुरूपं शोभनरूपमिति. ' सेवियाणं दारए ' इत्यादि, णं वाक्यालंकारार्थः, सोऽपि च दारक उन्मुक्तबालभावः संजाताष्टवर्षः, ' विण्णाय परिणयमित्तत्ति ' विज्ञातं विज्ञानं परिणतमात्रं यस्य स तथा, क्वचि ' विण्णयपरिणयमित्तत्ति ' पाठस्तत्र विज्ञ एव विज्ञकः स चासौ परिणतमात्रश्च, बुद्ध्या-दिपरिणामवानेव विज्ञकपरिणतमात्रः, इह मात्रशब्दो बुद्ध्यादिपरिणामस्याऽभिनवत्वख्यापनपरः, यौवनमनुप्राप्तः, ' रिउवेयजउवेयसामवेयअथवणवेयत्ति ' इह षष्ठीबहुवचनलोपदर्शनात् ऋग्वेद-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यजुर्वेदसामवेदाथर्वणवेदानामिति दृश्यं. ' इतिहासपंचमाणंति ' इतिहासपुराणमुच्यते, निर्घंटुषष्टानां निर्घंटुर्नामकोशः सांगोपांगानां, अंगानि शिक्षादीनि, उपांगानि तदुक्तप्रपंचनपराः प्रबंधाः, सरहस्यानामैदंपर्ययुक्तानामित्यर्थः, ' चउण्हं वेयाणंति ' व्यक्तं, सारकः अध्यापनद्वारेण प्रवर्त्तकः, स्मारको वाऽन्येषां विस्मृतस्य सूत्रादेः स्मारणात्, पारगः पर्यंतगामी, क्वचि ' वारए धारएत्ति ' दृश्यते, तत्र वारकोऽशुद्धपाठनिषेधकः, धारकोऽधीतान् धारयितुं क्षमः, ' सडंगवीति ' षडंगवित् शिक्षादिविचारकः, ज्ञानार्थे तु पौनरुक्त्यं स्यात्, षष्टितंत्रविशारदः षष्टिरर्थास्तंत्रिता अत्रेति षष्टितंत्रं कापिलीयशास्त्रं, तत्र पंडितः, अर्थाश्च षष्टिरिमे लेशतः—अविद्यास्मितारागद्वेषाभिनिवेशास्त्विमे—१ मोह २ महामोह ३ तामिस्त्रं ४ धतामिस्त्र ५ संज्ञाः, पंच विपर्ययभेदाः, पंचानां बुद्धींद्रियाणां, पंचानां च कर्मेंद्रियाणां मनसश्च यथासंख्यं बाधिर्यकुंठतांधत्वजडत्वाजिघ्रनामूकत्वकौण्यपंगुत्वक्लैब्योगरोधउदावर्त्तोन्मादा इत्येकादशेंद्रियघाताः, नवविधस्तुष्टिविपर्ययोऽष्टविधसिद्धिविपर्ययश्चेति, सप्तदशबुद्धिविधा इत्यष्टाविंशतिविधाऽशक्तिः कारणवैकल्परूपा, तथा तुष्टयश्चतस्रः आध्यात्मिक्यः, प्रकृत्युपादानकालाभाग्याख्याः, अंभः सलिल ओघः वृष्टिः शब्दवाच्याः, बाह्याः पुनरर्जन १ रक्षण २

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षय ३ जोग ४ हिंसा ५ दोषदर्शनहेतुजन्मानो विषयोपरमरूपाः पंच, ताश्च पार १ सुपार २ पारपार ३ अनुत्तमांजः ४ उत्तमांजसंज्ञा इति नव तुष्टयः, अष्टौ च सिद्धयः, तत्राध्यात्मिकाधिभौतिकाधिदैविकलक्षणदुःखत्रयविघातात्मिकास्तिस्रः सिद्धयो मुख्यास्ताश्च प्रमोदमुदितमोदमाननामभिर्गीयंते, तदुपायभूताश्च पंचगौण्यस्तत्राध्यात्मिकविद्याध्ययनं १ शब्दतोऽर्थज्ञानं २ न्यायेन तत्परीक्षणान्मननं ३ गुर्वादिसुहृत्प्राप्तिः ४ विवेकख्यातिशुद्धिलक्षणं दानं ५ चेति, एताश्च गौणसिद्धयस्तार १ सुतार २ तारतार ३ रम्यक ४ सदामुदितसंज्ञाः ५ अत्र च सिद्धिरूपादेया, विपर्ययाशक्तितुष्टयस्तु हेया इति. सर्वमीलने पंचाशद् बुद्धिसर्गभेदा दश च चूलिकार्थाः, अर्चित्वादय इति षष्टिः, पदार्थास्तथा च राजवार्त्तिकं—प्रधानास्तित्वमेकत्व—मर्थवत्त्वमथान्यता ॥ पारार्थ्यं च तथा नैक्यं । वियोगो योग एव च ॥ १ ॥ शेषवृत्तिरकर्तृत्वं । चूलिकार्था दश स्मृताः ॥ विपर्ययः पंचविध—स्तथोक्ता नव तुष्टयः ॥ २ ॥ करणानामसामर्थ्य—मष्टाविंशतिधा मतं ॥ इति षष्टिः पदार्थाना—मष्टभिः सह सिद्धिभिः ॥ ३ ॥ इति.

एतद्विशेषव्याख्यानं तत्वकौमुद्यादिभ्योऽवसेयं, इह पुनरकृतत्वान्नोच्यते, इति प्रकृतमेव प्रस्तु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मः, ' संखाणत्ति ' संख्याने संकलितव्यवकलितादिगणितस्कंधे सुपरिनिष्ठित इति योगः, क्वचित् ' संखाणे ' इत्यनंतरं ' सिखाणे ' इति दृश्यते, तत्र शिक्षामणति प्रतिपादयति, शिक्षणमाचारोपदेशशास्त्रं, तत्र षडंगवेदकत्वमेव व्यनक्ति, ' सिक्खकप्पेत्ति ' शिक्षा चाक्षरस्वरूपनिरूपकं शास्त्रं, कल्पश्च तथाविधयज्ञादिसमाचारप्रतिपादकं शास्त्रमेवेति, शिक्षाकल्पं, तत्र व्याकरणे शब्दशास्त्रलक्षणशास्त्रे, छंदसि पद्यवचनलक्षणनिरूपके, निरुक्ते पदभंजनेन शब्दनिरुक्तिप्रतिपादके, ' जोइसामयणेत्ति ' अयवयदंडकधातुः, सर्वे गत्यर्था ज्ञानार्था इति ज्योतिषां ग्रहादीनामयने ज्ञाने ज्योतिःशास्त्रे इत्यर्थः, अन्येषु च बहुषु ' बंभणएसुत्ति ' ब्राह्मणकेषु वेदव्याख्यानरूपेषु ब्राह्मणसंबंधिषु ब्राह्मणहितेषु शास्त्रेष्वागमेषु वा ' सुपरिठिएयाविति ' सुनिष्णातश्चापि भविष्यति, ' क्वचित् ' बंभणएसु ' इत्यनंतरं ' परिव्वायएसु नएसु ' इत्यपि दृश्यते, तत्र परिव्राजकदर्शनप्रसिद्धेषु नयेष्वाचारेषु न्यायशास्त्रेषु वेति, ज्ञेयं, ' तं उरालाणमित्यादि ' तमिति यस्मादेवं तस्मादुदारादिविशेषणाः स्वप्ना ' स्तुमेत्ति ' त्वया दृष्टा इति निगमनं, ' इति कट्टुत्ति ' इति भणित्वा भूयो भूयोऽनुबृंहत्यनुमोदयति, ' एवमेयमित्यादि ' एवमेतदिति, प्रतिवचने प्रत्ययाविष्करणमेतदेव स्फुट-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यति, ' तहमेयंति, ' तथैतद्यथा भवंतः प्रतिपादयंति, अनेनान्वयतः तद्वचनसत्यतोक्ता, ' अवितहमेयंति ' अनेन व्यतिरेकाभावतः, ' असंदिद्धमेयं ' इत्यनेन संदेहाभावतः शंकाया अविषय इत्यर्थः. अत एव ' इच्छियमेयंति ' इष्टं ईप्सितं वास्माकमेतत, ' पडिच्छियमेयंति ' प्रतीष्टं प्रतीप्सितं वा युष्मन्मुखात्पतदागृहीतमभ्युपगतमित्यर्थः. ' इच्छियपडिच्छियमेयंति ' इष्टप्रतीष्टमीप्सितप्रतीप्सितं वा, धर्मद्वययोगात. अत्यंतादरख्यापनाय चैवं निर्देशः.

' सच्चेणं एस अट्ठेत्ति ' सद्भ्यो हितः सत्यः, प्राणिहितोऽयमर्थ इति. ' इतिकट्टुत्ति ' इति भणित्वा ' सद्धिंति ' सार्द्धं, मानुष्यकान् मनुष्योचितान् ' भोगभोगाहिंति ' भोगार्हा भोगा भोगभोगास्तान्, प्राकृतत्वान्नपुंसकत्वं. ' तेणं कालेणमित्यादि ' शक्रस्यासनविशेषस्याधिष्ठाता शक्रः, देवानां मध्ये इंदनात् परमैश्वर्ययुक्तत्वाद्देवेंद्रः. देवेषु राजा कांत्यादिभिर्गुणैरधिकं विराजमानत्वात्, वज्रं कुलिशं पाणावस्येति वज्रपाणिः, असुरादिपुराणां दारणात्पुरंदरः, शतं क्रतूनां कार्तिकश्रेष्ठिभवापेक्षयाऽभिग्रहविशेषाणां श्रमणोपासकपंचमप्रतिमारूपाणां वा यस्यासौ शतक्रतुः. सहस्राक्षः, इंद्रस्य किल पंचमंत्रिशतानि, तदीयानां चाक्ष्णामिंद्रप्रयोजनव्यापृततयेंद्रसंबंधित्वेन विवक्ष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संदेह- णात्, मघा महामेघा देवविशेषा वा वशे संत्यस्य स मघवान्, पाका बलवंतोऽरयस्तान्, पाको वा
दानवविशेषस्तं शास्ति यः स पाकशासनः, दक्षिणार्धलोकस्याधिपतिर्मेरोर्दक्षिणतः सर्वस्यापि तदा-
व्या० यत्तत्वात्, द्वाविंशतो विमानशतसहस्राणां विमानलक्षाणामधिपतिः, ऐरावणो गजरूपः सुरविशेषः
१४ स वाहनं यस्य सः, सुराणामिंद्रः आह्लाददायकः सुरेंद्रः, अथवा शोभना रा दीप्तिर्येषां ते सुरा दी-
प्तिशालिनस्तेष्विंद्रः श्रेष्ठः, अरजांसि निर्मलानि यानि अंबरवस्त्राणि स्वच्छतया आकाशकल्पवसना-
नि तानि धरति सोऽरजांबरवस्त्रधरः, आलगितौ यथास्थानं विनिवेशितौ मालामुकुटौ येन स तथा,
अथवालगितमालं मुकुटं यस्य सः, नवाभ्यामिव प्रत्यग्राभ्यामिव हेम्नः सत्काभ्यां चारुभ्यां मनोहरा-
भ्यां चित्राभ्यामाश्चर्यकृद्भ्यां चंचलाभ्यां इतस्ततश्चलनपराभ्यां कुंडलाभ्यां विलिख्यमानौ गंडौ क-
पोलौ यस्य स तथा, 'महड्डिए' महती ऋद्धिः समस्तछत्रादिराजचिन्हरूपा यस्य सः, 'महज्जुई-
ए' महती द्युतिराभरणादिसंबंधिनी द्युतिर्वा उचितेष्टवस्तुघटनालक्षणा यस्य स महाद्युतिर्महायु-
तिर्वा, महाबलो महायशा महानुभावो महासौख्य इति व्यक्तं, भासुरा दीप्तिमती बोंदित्ति वपुर्य-
स्य सः, प्रलंबा वनमाला भूषणविशेषः पादांतलंबिनी पंचवर्णपुष्पमाला वा यस्य सः, 'सेणंति'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स इंद्रः, णमिति वाक्यालंकारे, तत्र देवलोके विमानावासा विमाना एव, ' सयसाहस्सीणंति ' आर्षत्वात्स्त्रीत्वे लक्षाणां, समानया इंद्रतुल्यया ऋद्ध्या चरंतीति सामानिका इंद्रसमानायुष्कादिभा- वाः, त्रयस्त्रिंशता त्रायस्त्रिंशानां महत्तरकल्पानां पूज्यस्थानीयास्त्रायस्त्रिंशा मंत्रिकल्पा वा, चत्वारो लोकपालाः सोमयमवरुणकुबेरा दिक्पालने नियुक्ताः, अग्रमहीष्यः प्रधानपत्न्यः पद्माशिवाशची- प्रमुखाः ॥

तथा चार्षे—' पउमाशिवासईअंजू । अमला अंबरा नवमिया रोहिणीति, ' तिस्रः परिषदो बाह्यमभ्यंतरा जघन्यमध्यमोत्कृष्टपरिवारविशेषभूताः, सप्तानीकानि हस्त्यश्वपदातिरथवृषभनर्तकगाथक- जनरूपाणि सैन्यानि, सप्तानीकाधिपतयो हस्त्यनीकादिसैन्यस्वामिनः, चतस्रश्चतुरशीत्यश्चतुर्दिशं ना- वात्, आत्मरक्षा देवसहस्राणि, अंगरक्षकदेवानां षट्त्रिंशत्सहस्राधिकं लक्षत्रयमित्यर्थः, ' आहेवच्चं- ति ' आधिपतिकर्म रक्षेत्यर्थः, सा च रक्षा सामान्येनाप्यारक्षकेण च क्रियते, तत आह—' पोरे- वच्चं ' पुरस्य पतिः पुरपतिः, तस्य कर्म पौरपत्यं, पौरवर्त्यं वा, सर्वेषामग्रेसरत्वं इति भावः, तच्चाग्रे- सरत्वं नायकत्वं अंतरेणापि भवेत्, स्वनायकनियुक्तनथाविधगृहचिंतकमान्यपुरुषस्येव, ततो नायक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वप्रतिपत्त्यर्थमाह—' सामित्तं ' नायकत्वमित्यर्थः, तदपि च नायकत्वं कदाचित्पोषकत्वमंतरेणापि भवेत्, यथा हरिणयूथाधिपतेर्हरिणस्य, तत आह—भर्तृत्वं पोषकत्वं, डुभृञ् धारणपोषणयोरितिवचनात्, अत एव महत्तरकत्वं गुरुतरत्वं, तदपि च महत्तरकत्वं कस्यचिदाज्ञाविकलस्यापि भवति, यथा कस्यचिद्वणिजः स्वदासदासीवर्गंप्रति, तत आह—' आणाईसरसेणावच्चं ' आज्ञया ईश्वर आज्ञेश्वरः, सेनायाः पतिः सेनापतिः, तस्य कर्म आज्ञेश्वरसेनापत्यं, स्वसैन्यंप्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः, ' कारेमाणेत्ति ' अन्यैर्नियुक्तैः कारयन्, ' पालेमाणेत्ति ' स्वयमेव पालयन्, ' महयाहमेत्यादि ' महता रवेणेतियोगः, ' आहयत्ति ' आख्यानकप्रतिबद्धं, अहतं वाऽव्यवच्छिन्नं यन्नाट्यं नाटकं तत्र यद्गीतं गेयं यानि च वादितानि तंत्रीतलतालत्रुटितानि, तत्र तंत्री वीणा, तलतालाश्च हस्तास्फोटरवाः, तला वा हस्तास्तालाः कंसिकाः, ' तुडियत्ति ' शेषतूर्याणि, यश्च घनमृदंगो मेघध्वनिर्मर्दलो यच्च पटुपटहवादितमिति कर्मधारयगर्भो द्वंद्वः, ततश्च तेषां यो रवस्तेन कचित पुनः—

' महयाहयनट्टगीयवाइयआहयसंखमंखियखरमुहियपोयापिरिपिरियापणवपडहभंभाहोरंभाजे-

For Private And Personal Use Only

रिझल्लरिदुंदुहिततविततघणझुसिरतंतीतलतालतुडियघणमुयंगपडुप्पवाइयरवेणंति ' इश्यते, तत्र अ-हतान्यव्याहतानि नाट्यगीतवादितानि, तथा आहतेभ्यो मुखहस्तदंडादिभिराकुट्यमानेभ्यः शंखा-दिभ्यो यो रवस्तेन महता विपुलेन, तत्र शंखाः प्रतीताः, शंखिका ह्रस्वशंखः, खरमुखिका काहला, पोया महती काहला, पिरिपिरिया कोलिकपुटकावनद्धमुखो वाद्यविशेषः, पणवो भंडपटहो लघुपट-हो वा, तदन्यस्तु पटह इति, भंभत्ति ढक्का, होरंभत्ति रूढिगम्या, भेरी महाढक्का, झल्लरी वलयाका-रो वाद्यविशेषः, दुंदुभिर्देववाद्यविशेषः, अथोक्तानुक्तसंग्रहगाथाद्वारेणाह—ततेत्यादि, ततानि वी-णादिकानि, तज्जनितशब्दा अपि तताः, एवमन्यदपि पदत्रयं, नवरमयंविशेषः ततादीनां, ततंवी-णादिकं ज्ञेयं । विततं पटहादिकं ॥ घनं तु कांस्यतालादि । वंशादि शुषिरं स्मृतं ॥ १ ॥ तथा तं-त्रीत्यादि प्राग्वत्, पटुना दक्षपुरुषेण प्रवाद्यत इति पटुप्रवादितः, स चासौ घनमृदंगश्च, प्राकृतत्वा-द्विशेषणस्य परनिपातस्तत एतेषां रवस्तेनेति व्याख्येयं.

' दिव्वाइंति ' देवजनोचितान् ' भोगभोगाइंति ' अतिशयवद्भोगान्, आर्षत्वान्नपुंसकता वि-हरत्यास्ते, ' इमं चणंति ' केवलः परिपूर्णः स चासौ कल्पश्च कार्यकरणसमर्थ इति केवलकल्पः,

केवल एव वा केवलकल्पः समग्रः, अथवा परिपूर्णतासाधर्म्यात् केवलकल्पः केवलज्ञानसदृशस्तं 'आभोएमाणेत्ति' आभोगयन् पश्यन् 'हट्ठतुट्ठचित्तमाणंदिएत्ति' प्राग्वत्, ततश्च 'नंदिएत्ति' नंदितः समृद्धतरतामुपागतः 'परमाणंदिएत्ति' अतीवसमृद्धिभावं गतः, धाराहतं यत्कदंबस्य नीपस्य सुरभि कुसुमं तदिव 'चंचुमालइयत्ति' पुलकितोऽत एवो 'सवियत्ति' उच्छूनरोमकूपश्च यः स तथा, विकसितानि भगवत्पृथ्वीतलावतरणाज्जनितानंदातिशयादुत्फुल्लानि वरकमलानि तद्वदाननं च नयने च यस्य स तथा, प्रचलितानि भगवद्गर्भोत्पत्तिदर्शनजनितसंभ्रमातिरेकात् कंपितानि, 'पलंबियत्ति' पाठे तु प्रकर्षेण लंबितानि, तत एव हेतोरवस्रस्तानि वराणि प्रधानानि च कटकानि कंकणानि, तुटिकाश्च बाहुरक्षकाः, केयूराणि चांगदानि बाहुमूलविभूषणानि, मुकुटं च किरीटं, कुंडले च कर्णाभरणे यस्य स तथा, हारविराजद्वक्षा इति व्यक्तं, ततः पदद्वयस्य कर्मधारयः, प्रालंबो झुंबनकं मुक्तामयं प्रलंबमानं लंबमानं 'घोलत्तं' दोलायमानं यद्भूषणं आभरणं तद्धारयति यः स तथा, ससंभ्रमं सादरं तुरियं सौत्सुक्यं, चपलं वेगवत् क्रियाविशेषणान्यन्यानि, 'पच्चोरुहइ' प्रत्यवरोहति अवतरतीत्यर्थः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'वेरुलिएत्यादि' वैरुर्येण मध्यवर्त्तिना वरिष्टे प्रधाने रिष्टांजने रत्नविशेषौ ययोस्ते तथा निपुणेन कुशलेन शिल्पिना 'उवयत्ति' परिकर्मिते, अत एव 'मिसिमिसिंतित्ति' चिकिचिकायमाने, मणिभिश्चंद्रकांतादिभिः रत्नैश्च कर्केतनादिभिर्मंडिते भूषिते ये ते तथा, ततः पदचतुष्टयस्य कर्मधारयः, पाडुके अवमुंचति, 'एगसाडियंति' एकः खंडशाटकमयमुत्तरासंगं वैकक्षकं करोति, 'अंजलित्ति' अंजलिना अंजलिकरणतो मुकुलितौ मुकुलाकृतीकृतौ अग्रहस्तौ येन स तथा, अंचेइत्ति' आकुंचयति, 'साहट्टुत्ति' संहृत्य निवेश्य 'तिख्खुत्तोत्ति' त्रिःकृत्वा त्रीन् वारानित्यर्थः, त्रेः सुच्प्राप्तावपि आर्षत्वात् कृत्वं, 'निवेसइत्ति' न्यस्यतीत्यर्थः, 'ईसिं पच्चुन्नमइत्ति' ईषन्मनाक्प्रत्युन्नमति, अवनतत्वं विमुंचतीत्यर्थः. 'कडगत्ति' कटकानि कंकणानि त्रुटिका बाहुरक्षकास्ताभिः स्तंभिते भुजे 'साहरइत्ति' ऊर्ध्वं नयति, स्तंभिकोपमे करोतीत्यर्थः, द्वयोर्हस्तयोरन्योऽन्यांतरितांगुलिकयोः संकटरूपतया यदेकत्रमीलनं सोंजलिस्तं करतलाभ्यां परिगृहीतो निष्पादितः करतलपरिगृहीतस्तं, आवर्त्तनमावर्त्तः, शिरस्यावर्त्तो यस्यासौ शिरस्यावर्त्तः, कंठे कालादिवदलुक्समासः, तमतएव मस्तके कृत्वाथवा शिरसा प्राप्तमस्पृष्टं, 'एवं वयासित्ति' एवमवादीत्—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'नमोत्थुणमित्यादि' नमोऽस्तु सर्वत्र संबध्यते, णमिति वाक्यालंकारे 'अरहंताणं' सर्वत्र प्राकृतत्वे चतुर्थ्याः षष्ठी, ततो देवादिभ्योऽतिशयपूजावंदनाद्यर्हद्भ्यो नमः, बहुवचनमद्वैतोच्छेदादर्हद्बहुत्वख्यापनार्थं, नमस्कर्तुः फलातिशयज्ञापनार्थं च, तथा कर्मारिहननादरिहंताणं, कर्मबीजाऽभावे भवेऽप्ररोहादरुहंताणं, इति पाठत्रयं, भगवद्भ्यः, यतः—भगोऽर्कज्ञानमाहात्म्य-यशोवैराग्यमुक्तिषु ॥ रूपवीर्यप्रयत्नेच्छा—श्रीधर्मैश्वर्ययोनिषु ॥ १ ॥ इत्यर्कयोनिवर्जं द्वादशार्थभगयुक्तेभ्यः, आदिकरेभ्यः, श्रुतधर्मापेक्षया नित्यत्वेऽपि शब्दापेक्षया स्वस्वतीर्थेष्वादौ करणात्, तीर्थकरेभ्यः, तीर्थं संघः आद्यगणधरो वा तत्स्थापनात, स्वयं संबुद्धेभ्यः स्वयमेव परोपदेशं विना सम्यक् तत्वावबोधात्, कुत एतदित्याह—यतः पुरुषोत्तमेभ्यः भगवंतो हि संसारमध्यावसंतः सदा परार्थव्यसनिन उपसर्जनीभूतस्वार्था उचितक्रियावंतोऽदीनभावाः कृतज्ञा देवगुरुबहुमानिनो गम्भीराशया इति भवंति, पुरुषाणामुत्तमास्तेभ्यः, उत्तमत्वमेवोपमात्रयेणाह—पुरुषसिंहेभ्यः, कर्मशत्रुषु क्रूरत्वात् परीषहेषु सावज्ञत्वादुपसर्गेभ्यो निर्भयत्वाच्च पुरुषाः सिंहा इव पुरुषसिंहास्तेभ्यः, पुरुषवरपुंडरीकेभ्यः, कर्मपंके जाता दिव्यभोगजलैर्वर्द्धिता भगवंत उभयं त्यक्त्वा जगल्लक्ष्मीनिवासास्तिर्यग्नरामरसेव्याश्च पुंडरीक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्त्तंते इति, पुंडरीकाणि धवलकमलानि, वराणि च तानि पुंडरीकाणि च वरपुंडरीकाणि, पुरुषेषु वरपुंडरीकाणीव पुरुषवरपुंडरीकाणि तेभ्यः, धवलता चामीषां सर्वाऽशुभमलीमसरहितत्वात्, एवं पुरुषवरगंधहस्तिभ्यः, ईतिमारिदुर्भिक्षपरचक्रादिक्षुद्रगजानां भगवद्विहारपवनगंधादेव भंगात्, न चामी पुरुषाणामेवोत्तमाः किंतु सकललोकस्यापीत्यत आह—लोकोत्तमेभ्यः लोकस्य भव्यसंघातस्योत्तमाश्चतुस्त्रिंशदतिशयोपेततयेति तेभ्यः लोकोत्तमत्वमेवाह—लोकनाथेभ्यः लोकस्य भव्यलोकस्य नाथा योगक्षेमकारित्वात्, तत्राऽप्राप्तस्य सम्यग्दर्शनादेर्लाभनाल्लब्धस्य तस्यैव तत्तदुपद्रवाभावापादपालनाच्च लोकनाथास्तेभ्यः, लोकनाथत्वं च तात्त्विकं लोकहितत्वे सति संभवतीत्याह—लोकहितेभ्यः लोकस्यैकेंद्रियादिप्राणिगणस्य पंचास्तिकायात्मकस्य वात्यंतिकतद्रक्षाप्रकर्षप्ररूपणेन हितोपदेशात् सम्यक्प्ररूपणतो वा हिता अनुकूलवृत्तयो लोकहितास्तेभ्यः.

यदेतन्नाथत्वं हितत्वं च तद्भव्यानां यथावस्थितवस्तुस्तोमप्रदीपनेन नान्यथेत्याह—लोकप्रदीपेभ्यः, लोकस्य देशनायोग्यविशिष्टतिर्यग्नरामररूपस्य प्रदीपा इव प्रदीपाः, देशनांशुभिर्मिथ्यात्वतिमिरनिराकरणेन प्रकृष्टपदार्थप्रकाशकारित्वात्. इदं विशेषणं दृष्टृलोकमाश्रित्योक्तं, अथ दृश्यलोक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माश्रित्याह—लोकप्रद्योतकरेभ्यः लोकस्य लोकालोकरूपस्य समस्तवस्त्वात्मकस्य केवलालोकपूर्वकप्रवचनप्रभामंडलप्रवर्त्तनेन प्रद्योतं प्रकाशं कुर्वंतीत्येवंशीलाः, अथवा लोकस्योत्कृष्टमतेर्गणधरादिभव्यसत्वलोकस्य प्रद्योतं विशिष्टज्ञानशक्तिं तत्क्षणद्वादशांगविरचनानुमेयं कुर्वंतीति लोकप्रद्योतकरास्तेभ्यः, अभयदयेभ्यः सप्तभयहरणादभयं दयंते ददतीत्यभयदयाः, अथवा प्राणांतिकोपसर्गकारिष्वपि भयं न दयंते इत्यभयदयाः, यद्वाऽभया सर्वप्राणिभयपरिहारवती दया कृपा येषां तेऽभयदयाः, न केवलममी प्राणिनामनर्थपरिहारमात्रं कुर्वंत्यपित्वर्थप्राप्तिमपीति दर्शयन्नाह—चक्षुर्दयेभ्यः चक्षुरिव चक्षुः श्रुतज्ञानं शुभाऽशुभार्थविभागोपदर्शकत्वात्, तद्दयंते इति चक्षुर्दयास्तेभ्यः, यथा हि लोके कांतारगतानां चौरैर्विलुप्तधनानां बद्धचक्षुषां चक्षुर्दत्वा वांछितमार्गदर्शनेनोपकारी भवत्येवमेतेऽपि संसारारण्यवर्त्तिनां रागादिचौरविलुप्तधर्मधनानां कुवासनाच्छादितसद्ज्ञानलोचनानां तदपनयनेन श्रुतचक्षुर्दत्वा निर्वाणमार्गं यच्छंत उपकारिण इति दर्शयन्नाह—मार्गदयेभ्यः मार्गं सम्यग्दर्शनादिकं मोक्षपथं दयंते इति मार्गदयास्तेभ्यः. यथा हि चक्षुरुद्घाटनं मार्गदर्शनं च कृत्वा चौरादिविलुप्तधनान्निरुपद्रवं स्थानं प्रापयन् परमोपकारी भवत्येवमेतेऽपीति दर्शयन्नाह—शरणदयेभ्यः शरणं त्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णं नानाविधोपद्रवद्रुतानां रक्षास्थानं तच्च परमार्थतो निर्वाणं तद्दयंते दर्शनाद्यासेवनं, तत्प्राप्तेस्तस्य च तेषां दायकत्वाच्छरणदयास्तेभ्यः, यथा हि लोके चक्षुर्मार्गशरणदानाद् दुःस्थानां जीवितं ददात्येवमेतेऽपीति दर्शयन्नाह—जीवदयेभ्यः जीवनं जीवो भावप्राणधारणममरणधर्मत्वमित्यर्थः, तं ददयंत इति जीवदयाः, जीवेषु वा दया येषां ते जीवदयास्तेभ्यः, क्वचिद् ' बोहिदयाणं ' इत्यपि दृश्यते, तत्र बोधिर्जिनप्रणीतधर्मप्राप्तिस्तत्वार्थरुचिरूपा तां दयंते ते बोधिदयास्तेभ्यः.

औपनिषदिकास्तु व्याचक्षंतेऽभयं विशिष्टमात्मनः स्वास्थ्यं, निःश्रेयसधर्मभूमिकानिबंधनभूता परमा धृतिस्तद्ददतीत्यभयदाः, स्वार्थिकः, तथा चक्षुरिव चक्षुर्विशिष्ट आत्मधर्मस्तत्वावबोधहेतुः श्रद्धारूपः, श्रद्धाहीनस्याऽचक्षुष्मत इव रूपतत्वदर्शनाऽयोगात, तद्ददतीति चक्षुर्दाः, तथा मार्गो विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेषस्तं ददतीति मार्गदाः, तथा शरणं संसारकांतारगतानामतिप्रबलरागादिपीडितानां समाश्वसनस्थानकल्पं तत्वचिंतारूपमध्यवसानं तद्ददतीति शरणदास्तेभ्यः इति. अनंतरोक्तविशेषणकदंबकं च भगवतां धर्मात्मकतया संपन्नमिति तां विशेषणपंचकेनाह—धर्मदयेभ्यः धर्मं दुर्गतिपतज्जंतुधरणस्वभावं देशसर्वचारित्रं दयंते इति धर्मदयास्तेभ्यः, ध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मंदयत्वं चामीषां कथमित्याह—धर्मदेशकेभ्यः धर्मं श्रुतचारित्ररूपं देशयंतीति धर्मदेशका यथा भ-व्यमवंध्यदेशनातस्तेभ्यः, धर्मदेशकत्वं चामीषां स्वामित्वे सति, न पुनर्यथा नटस्येति दर्शयन्नाह—धर्मनायकेभ्यः धर्मस्य क्षायिकज्ञानदर्शनचारित्रात्मकस्य नायकाः स्वामिनः, तद्वशीकारात्तत्फलप्रकर्षपरिभोगाच्च तेभ्यः, धर्मसारथिभ्यः धर्मरथस्य सारथय इव सारथयः, यथा सारथी रथं रथिकमश्वांश्च सम्यक् प्रवर्त्तयति रक्षति च, एवं भगवंतोऽपि चारित्रधर्मांगानां संयमात्मप्रवचनाख्यानां रक्षणोपदेशाद्धर्मसारथयो भवंति, तेभ्यः, धर्मवरचातुरंतचक्रवर्त्तिभ्यः, त्रयः समुद्राश्चतुर्थो हिमवान् एते चत्वारः पृथिव्या अंताः पर्यंतास्तेषु भवाः स्वामितयेति चातुरंताः, ते च ते चक्रवर्त्तिनश्च चातुरंतचक्रवर्त्तिनः, धर्मेषु वरः श्रेष्टो धर्मवरः, तत्र विषये चातुरंतचक्रवर्त्तिन इव धर्मवरचातुरंतचक्रवर्त्तिनः, यथा हि पृथिव्यां शेषराजातिशायिनश्चातुरंतचक्रवर्त्तिनो भवंत्येवं भगवंतोऽपि धर्मवरविषये शेषप्रणेतृषु मध्ये सातिशयत्वात्तथोच्यंते, तेभ्यः, अथवा कुतीर्थिधर्मापेक्षया धर्मवरेण, कीदृशेन नरकादिचतुर्गत्यंतकरणाच्चतुरंतेन मिथ्यात्वादिरिपुच्छेदकत्वाच्चक्रेणेव वर्तितुं शीलं येषां ते, तथेति व्याख्येयं, तेभ्यः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



‘ दीवोत्ताणं ’ इत्यादीनि भिन्नसंबंधानि पदानि, चतुर्थ्यर्थे षष्ठ्यंततया योज्यानि, तत्र दीप इ-
व दीपः समस्तवस्तुप्रकाशकत्वात्, द्वीपो वा संसारसागरांतर्गतांगिवर्गस्य नानाविधदुःखकल्लोलाभि-
घातदुःस्थितस्याश्वासहेतुत्वात्, तथा त्राणमनर्थप्रतिहननं, तद्धेतुत्वात् त्राणं, तथा शरणमर्थसंपादनं
तद्धेतुत्वाच्छरणं, ‘ तथागइत्ति ’ गम्यते दुःस्थितैः सुस्थितार्थमाश्रीयत इति गतिः, ‘ पइट्ठत्ति’ प्रति-
ष्ठंत्यस्यामिति प्रतिष्ठा आधारः, संसारगर्त्ते प्रपततः प्राणिपूगस्येति, तथाऽप्रतिहतवरज्ञानदर्शनधरेभ्यः,
अप्रतिहते कटकुट्यादिभिरस्खलिते अविसंवादके वा, अत एव क्षायिकत्वाद्वरे श्रेष्ठे ज्ञानदर्शने के-
वलाख्ये विशेषसामान्यावबोधात्मके धारयंतीत्यप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, कथमेषामप्रतिहतव-
रज्ञानदर्शनधरत्वं संपन्नं, आवरणाऽभावादिति ब्रूमः, एतदेवाह—व्यावृत्तछद्मभ्यः, घातिकर्माणि सं-
सारो वा छद्म, तद्व्यावृत्तं क्षीणं येभ्यस्ते व्यावृत्तछद्मानस्तेभ्यः, छद्माऽभावश्च रागादिजयाज्जातोऽमीषा-
मित्यत आह—जिनेभ्यो, रागादिजेतृभ्यः, रागादिजयश्चामीषां तज्जयोपायज्ञानपूर्वक एव भवतीत्य-
त आह—ज्ञायकेभ्यः जानंति छाद्मस्थिकज्ञानचतुष्टयेनेति ज्ञायकास्तेभ्यः, तारकेभ्यः तारयंत्यन्या-
नपि उपदेशवर्त्तिन इति तारकास्तेभ्यः. बुद्धेभ्यः अज्ञाननिद्राप्रसुप्ते जगति परोपदेशं विनापि स्व-

For Private And Personal Use Only

संवेदितज्ञानेन जीवादितत्त्वं बुद्धवंतो बुद्धास्तेभ्यः, बोधकेभ्यः जीवादितत्वमन्यानपि बोधयंतीतिबोधकास्तेभ्यः, मुक्तेभ्यः बाह्याभ्यंतरग्रंथिबंधनात् कर्मबंधनाद्वा मुक्ताः कृतकृत्यास्तेभ्यः, मोचकेभ्यः, परानपि तस्मान्मोचयितारो मोचकास्तेभ्यः, एतावंति विशेषणानि नवावस्थामाश्रित्योक्तानि, अथ सिद्धावस्थामाश्रित्योच्यंते—

सर्वज्ञेभ्यः सर्वदर्शिभ्यः, तत्र जीवस्वाभाव्याद्विशेषप्रधानमुपसर्जनीकृतसामान्यमर्थग्रहणंज्ञानं, सामान्यप्रधानमुपसर्जनीकृतविशेषमर्थग्रहणं च दर्शनं, ततश्च सर्वस्य वस्तुस्तोमस्य विशेषरूपतया ज्ञायकत्वात् सर्वज्ञास्तेभ्यः, सामान्यरूपतया पुनः संपश्यंतीति सर्वदर्शिनः, न तु मुक्तावस्थायां वैशेषिकपुरुषवद्बुध्यादिगुणोच्छेदेन संपन्नजमत्वाः, अत्र च—' सव्वाउ लद्धीउ सागारोवउगो वउत्तस्स उववज्जंति, नो अणागारोवउगोवउत्तस्से ' त्यागमाद्युत्पत्तिक्रमेणैव केवलिनां प्रथमसमये ज्ञानं ततो द्वितीयसमये दर्शनमिति प्रथमं सर्वज्ञेभ्यः इति विशेषणं, ततः सर्वदर्शिभ्य इति, छद्मस्थानां तु प्रथमं दर्शनं ततो ज्ञानमिति क्रमः, तथा—

' शिवमयलमित्यादि ' शिवं सर्वोपद्रवरहितत्वात्, अचलं स्वाभाविकप्रायोगिकचलनक्रिया-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यपोहात्, अरुजं मनःशरीरयोरभावेनाधिव्याध्यसंभवात्, अनंतमनंतार्थविषयज्ञानस्वरूपत्वात्, अक्षयमनाशंसाद्यपर्यवसितत्वात्, अक्षतं वा परिपूर्णत्वात्, अव्याबाधं परेषामपीडाकारित्वात्, अपुनरावृत्ति पुनर्भवावताराऽभावात्, सिध्यंति निष्ठितार्था भवंति यस्यां प्राणिनः सा सिद्धिर्लोकांतक्षेत्रलक्षणा सा चासौ गम्यमानत्वात् गतिश्च सिद्धिगतिः, सैव नामधेयं नाम यस्य तत्सिद्धिगतिनामधेयं, तिष्ठत्यस्मिन्निति स्थानं व्यवहारतः सिद्धिक्षेत्रं, निश्चयतो यथावस्थितं स्वस्वरूपं, स्थानस्थानिनोरभेदोपचारात्तु सिद्धिगतिनामधेयं तत्संप्राप्ताः सम्यगशेषकर्मविच्युत्या प्राप्तास्तेभ्यः, जीवस्वरूपविशेषणान्यपि लोकाग्रे उपचारादेवावसेयानि, आद्यंतकृतो नमस्कारो मध्येऽपीति पर्यंते पुनर्नमस्कारमाह—

'नमो जिणाणं जियभयाणंति' नमो जिनेभ्यो रागद्वेषादिभावरिपुजेतृभ्यः, जितभयेभ्यो भवप्रपंचनिवृत्तेः क्षपितभयेभ्यः, न चात्र पौनरुक्त्यं दोषाय, 'सज्झायझाणतवउसहेसु । उवएसथुइपयाणेसु ॥ संतगुणकित्तणेसु य । न हुंति पुणरुत्तदोसाउ ॥ १ ॥' इति वचनात्, इत्येवं सामान्येन सर्वभावार्हतां गुणोत्कीर्त्तनं विधाय पुनरपि अधिकृतं वीरजिनं स्तौति, 'नमोत्थुणं समण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्सेत्यादि ' श्रमणस्य महातपसो भगवतः समग्रैश्वर्यादियुक्तस्य महावीरस्य दिव्याद्युपसर्गेऽप्यविचलितसत्वतया महांतमपि पर्वतं मेरुमीरयतिस्मेति वा देवैर्महावीरेति प्रतिष्टितनाम्नः, आदिकरस्य प्रथमतया श्रुतधर्मकरणशीलस्य चरमतीर्थकरस्य पूर्वतीर्थकरनिर्दिष्टस्य, यावत्करणात ' सयंसंबुद्धस्सेत्यादि ' ' सिद्धिगइनामधेयं ठाणं ' इत्येतदंतं दृश्यं. ' संपाविउकामस्सेति ' यद्यपि भगवतः सिद्धिगतौ कामो नास्ति, ' मोक्षे भवे च सर्वत्र । निःस्पृहो मुनिसत्तमः ॥ ' इति वचनात्, तथापि तदनुरूपचेष्टनात् संप्राप्तुकाम इव संप्राप्तुकामस्तत्र संप्राप्त इत्यर्थः तस्य.

' तब्भगयंति ' ब्राह्मणकुंभग्रामे देवानंदाकुक्षौ स्थितं ' इहगएत्ति ' अत्रैवसौधर्मकल्पे स्थितोऽहं भगवंतं वंदे, कस्मादेवमित्यत आह— ' पासेउमेत्ति ' पश्यति मां भगवान् तत्रगत इहगतं ज्ञानेनेति शेषः, ' इति कट्टु ' इति कृत्वा इति हेतोः ' वंदेइत्ति ' पूर्वोक्तस्तुत्या स्तौति, नमस्यति शिरोनमनेन प्रणमति, ' पासेउत्ति पाठे ' पश्यतु मां भगवांस्तत्रगत इहगतं, ' इति कट्टु ' इति भणित्वेति योज्यं, ' पुरत्थाभिमुहे ' पूर्वाभिमुखः सन्निषण्ण उपविष्टः. ' अयमेयारूवे इत्यादि ' अयमेतद्रूपः संकल्पः समुदपद्यत, कथं भूत इत्याह—मनोगतः मनसि गतो व्यवस्थितो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाद्यापि वचसा प्रकाशितस्वरूप इति भावः, पुनः कथं भूत इत्याह—आध्यात्मिक आत्मन्यधि अध्यात्मं, तत्र भव आध्यात्मिकः, आत्मविषय इति भावः, संकल्पश्च द्वेधा भवति, कश्चिद् ध्यानात्मकोऽपरश्चिंतात्मकस्तत्रायं चिंतात्मकः, इति प्रतिपादनार्थमाह—चिंतितश्चिंता संजातास्मिन्निति चिंतितश्चिंतात्मक इति भावः, सोऽपि क्वचिदभिलाषात्मको भवति, कश्चिदन्यथा, तत्रायमभिलाषात्मकस्तथा चाह—प्रार्थनं प्रार्थो 'निजंतादल्' प्रार्थः संजातोऽस्मिन्निति प्रार्थितोऽभिलाषात्मक इति भावः ॥

'अंतकुलेसुवेत्यादि' अंत्यकुलेषु जघन्यकुलेषु अंत्यवर्णत्वात् क्षुद्रकुलेषु वा, प्रांतकुलेषु अधमाधमकुलेषु, तुच्छकुलेषु अल्पकुटुंबेष्वल्पर्द्धिकेषु वा, दरिद्रकुलेषु सर्वथा निर्धनकुलेषु, कृपणकुलेषु किराटादिनिर्धनकुलेषु, भिक्षाचरकुलेषु तालावरादिकुलेषु ब्राह्मणकुलेषु धिग्जातिकुलेषु 'आयाइंसु वा' आयातिधातुरागमे जन्मनि प्रयुज्यते, तत आयासिषुर्जज्ञिरे, आयांति जायंते, आयाइस्संति जनिष्यंते, 'उग्गकुलेसु वा' इत्यादि, उग्रा आदिदेवेनारक्षकत्वे नियोजिताः, ये वर्षाकुलेषु तद्वंशजेषु भोगाय तेनैव गुरुत्वेन व्यवहृतास्तद्वंशजेषु, राजन्या ये तेनैव वयस्यतया व्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्थापितास्तत्कुलेषु, इक्ष्वाकव आद्यवंश्याः क्षत्रियास्तेनैव शेषप्रकृतितया स्थापिता राजकुलीनास्तेषां कुलेषु, हरिवंशकुलेषु हरिवर्षक्षेत्रानीतयुगलसमुद्भवपुरुषसंततिषु, अन्यतरेष्विति ज्ञातभटमल्लकिलेच्छकिकौरव्यादिकुलेषु, तत्र ज्ञाताः श्रीऋषभस्वजनवंशजाः इक्ष्वाकुवंश्या एव, नागा वा नागवंशजाः, भटाः शौर्यवंतो योधाः, मल्लकिनो लेच्छकिनश्च राजविशेषास्तेभ्यो विशिष्टतराः कौरव्याः कुरुवंशजाः, 'विसुद्धजाइकुलवंसेसु' जातिर्मातृकः पक्षः, कुलं पितृसमुत्थं, विशुद्धे जातिकुले येषु तथाविधा ये वंशाः पुरुषान्वयास्तेषु, 'अत्थिपुणेत्यादि' अस्ति पुनरयमपि भावो भवितव्यताख्यः पदार्थो जातु समुत्पद्यते, 'नामगोत्तस्सवेत्ति' नामकर्मणो गोत्रकर्मणो वा, अथवा नाम्ना संज्ञया गोत्रं नीचैर्गोत्राख्यं तस्य 'अक्खीणस्सत्ति' स्थितेरक्षयात् 'अवेयस्सत्ति' अवेदितस्य तद्रसस्यानुभूतत्वात् 'अणिज्जिण्णस्सत्ति' अनिर्जीर्णस्य तत्प्रदेशानां जीवप्रदेशेभ्योऽपरिशाटनात्, 'जोणीजम्मणत्ति' योन्या जन्मार्थं निष्क्रमणेन, 'जीयमेयंति' जीतमाचरितं कल्प इत्येकार्थाः, 'तीयपच्चुप्पन्नत्ति' अतीतवर्त्तमानानागतान्यां, 'तीयत्ति' वातीतादौ इत्यनेन अकारलोपे तीतमिति सिद्धं, 'कोडालसगोत्तस्सत्ति' कोडालैः समानं गोत्रं यस्येति समासः, एवं 'जालंधरस्स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोत्ताए ' इत्यादि, ' नायाणं खत्तियाणंति ' ज्ञाता इक्ष्वाकुवंशविशेषाः, ' तिसलाए खत्तियाणीए गब्भेत्ति ' गर्भः पुत्रिकालक्षणः ' साहराविताए ' संक्रमयितुं ' हरिणैगमेसिंति ' हरेरिंद्रस्य नैगमेषी आदेशप्रतीच्छक इति व्युत्पत्त्याऽन्वर्थनामानं हरिणैगमेषिं नाम पदात्यनीकाधिपतिं देवं सद्दावे इत्ति, आकारयति, हरेरिंद्रस्य संबंधी नैगमेषिनामा देव इति केचित्, एवंखल्विति वाक्योपक्रमे, ' ममेयमाणत्तियंति ' ममेमामाज्ञप्तिं आज्ञां क्षिप्रमेव प्रत्यर्पय, मदाज्ञां चरितार्थीकृत्यागत्य निवेदयेत्यर्थः.

' आणा इत्यादि ' आज्ञाया आदेशस्य वचनं विनयेन प्रतिशृणोति, कर्तुमभ्युपगच्छति, अथवा आज्ञयेति तदाज्ञां प्रमाणीकृत्य विनयेनांजलिकरणादिना वचनमिंद्रादेशमिति, ' उत्तरपुरच्छिमंति ' ईशानकोणं ' अवक्कमइत्ति ' अपक्रामति व्रजति ' वेउव्विय समुग्घाएणंति ' उत्तरवैक्रियकरणाय प्रयत्नविशेषेण ' सामोहणइत्ति ' समुद्धंति प्रदेशान् निक्षिपति, ' समोहण्ण ' इति पाठे समुद्घन्यते समुद्घातवान् भवति, तत्स्वरूपमेवाह—' संखिज्जाइंति, ' दंड इव दंड ऊर्ध्वाध आयतः शरीरबाहल्यो जीवप्रदेशकर्मपुद्गलसमूहस्तं विसृजति, निष्कासयति, वितनोति. तत्र च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विविधपुद्गलानादत्ते इति दर्शयन्नाह—' तं जहा ' रयणाणमित्यादि, रत्नानां कर्केतनादीनां, इह च यद्यपि रत्नादिपुद्गला औदारिकाः, वैक्रियसमुद्घाते च वैक्रिया एव ग्राह्या भवंति, तथापीह तेषां रत्नादिपुद्गलानामिव सारताप्रतिपादनाय रत्नानामित्याद्युक्तं, तच्च रत्नानामिवेत्यादि व्याख्येयं, अन्ये त्वाहुरौदारिका अपि ते गृहीताः संतो वैक्रियतया परिणमंति, तेन च दंडेन रत्नादीनां यथा बादरानसारान् दंडनिसर्गगृहीतान् सामस्त्येनादत्ते इत्यर्थः, ' दोच्चं पित्ति ' द्वितीयमपि वारं समुद्घातं करोति, चिकीर्षति रूपनिर्माणार्थं उत्तरवैक्रियरूपं भवधारणीयवैक्रियरूपादन्यद्येन देवा मानुषं लोकमायांति, ' ताए उक्किट्ठाए ' इत्यादि, तया देवजनप्रसिद्धया तयोत्कृष्टया प्रशस्तविहायोगतिनामकर्मणा यः स्वगत्युत्कर्षस्तद्वती तया त्वरितया मानसौत्सुक्यात्, चपलया कायतः, चंडया संभारवत्, जयिन्या शेषकर्मजेतृत्वात्, उध्धुतया शेषशरीरावयवकंपनात्, शीघ्रया वेगवत्त्वात्, अन्येत्वाहुः—

उत्कृष्टया प्रशस्तविहायोगतिनामोदयात् प्रशस्तया, शीघ्रसंचरणात्त्वरितया, त्वरा संजाताऽस्यामिति त्वरिता तया, शीघ्रतरमेव तया प्रदेशांतराक्रमणमिति, चपलेव विद्युदिव चपला तया, क्रोधा-

For Private And Personal Use Only

विष्टस्येव श्रमाऽसंवेदनाच्चंम्मेव चंम्मा तया, जवनया परमोत्कृष्टवेगपरिमाणोपेतया, उध्धूतया वातोध्धतस्य दिगंतव्यापिनो रजस इव या गतिः सा उध्धूता, तया, अन्येत्वाहुः—उद्भृतया तद्दर्पातिशयेन शीघ्रया, निरंतरं शीघ्रत्वगुणयोगात् । क्वचिच्च 'छेयाए' इत्यपि दृश्यते, तत्र छेकयाऽपायपरिहारनिपुणया, दिव्यया देवलोकोचितया देवगत्या 'वीईवयमाणे २' अतिव्रजन् २ 'मञ्ज्ञं मञ्ज्ञेणंति' मध्यभागेन, आलोके दर्शनमात्रे प्रणामं नमस्कारं करोति, 'उसोयणिं दयइ' ददाति, 'अव्वाबाहंति' भगवतो विशेषणं तत्पीडापरिहारात् 'अव्वाबाहेणंति' सुखेन संहर्त्तुरपि पीडाऽभावात, अथवा 'अव्वाबाहं अव्वाबाहेणंति' सुखं सुखेनेत्यर्थः, तथा च भगवतीसूत्रं—

'हरीणं भंते णेगमेसी सक्कदूए इत्थीगप्भं साहरमाणे किं गप्भाउ गप्भं साहरेइ, गप्भाउ जोणिं साहरइ, जोणीउ गप्भं साहरइ, जोणीउ जोणिं साहरइ गोयमा नो गप्भाउ गप्भं साहरइ, नो गप्भाउ जोणिं साहरइ, परामुसिय (२) अव्वाबाहं अव्वाबाहेणं जोणिउ गप्भं साहरइ, नो जोणीउ जोणिं साहरइ, पहूणं भंते हरिणेगमेसी सक्कदूए इत्थीगप्भं नहसिरंसि वा रोमकूवंसि वा साहरित्तए वा निहरित्तए वा, हंता पहू नो चेवणं तस्स गप्भस्स किंचि अव्वाबाहं वा विबा-

हं वा उप्पइज्जा, छविच्छेदं पुण कारेज्जाए सुहुमं च णं साहरिज्जा वा निहरिज्जा वा इति, ' अत्र च गर्भाद्गर्भाशयाद्गर्भं गर्भाशयांतरं संहरति, प्रवेशयति गर्भं सजीवपुद्गलपिंडमित्येको भंगः, तथा गर्भाद्योनिं गर्भनिर्गमद्वारं संहरति योन्योदरांतरं प्रवेशयतीति द्वितीयः, योनितो योनिद्वारेण निष्कास्य गर्भं संहरति गर्भाशयं प्रवेशयति इति तृतीयः, योनितो योनिं संहरति नयति, योन्योदरान्निष्कास्य योनिद्वारेणैवोदरांतरं प्रवेशयतीति चतुर्थः, पूर्वोक्तसूत्रे तु शेषनिषेधेन तृतीयोऽनुज्ञातस्तत्र परामृश्य परामृश्य तथाविधकरणव्यापारेण संस्पृश्य संस्पृश्य, ' पहूणमित्यादि ' तत्सामर्थ्यदर्शनसूत्रे, ' नहसिरंसित्ति ' नखाग्रे, ' साहरित्तएत्ति ' प्रवेशयितुं ' नीहरित्तएत्ति ' विभक्तिपरिणामेन नखशिरसो रोमकूपाद्वा निष्कासयितुं, अव्वाबाहमीषद्बाधां, विवाहं, विशिष्टबाधां ' छविच्छेयंति ' गर्भस्य छविच्छेदमकृत्वा नखाग्रादौ प्रवेशयितुमशक्यत्वात्, ' ए सुहुमं चइत्ति, ' इत्येवं लघ्विति कृतप्रसंगेन ' जामेव दिसं पाउब्भूएत्ति ' यस्य दिशो अवधेः प्रादुर्भूतः प्रकट्यभूदागत इत्यर्थः, 'विग्गहेहिंत्ति ' वीखाभिः, ' उप्पयमाणेत्ति ' उत्पतन्नूर्ध्वं गच्छन् ' वासाणंति ' वर्षाकालमासानां श्रावणादीनां मध्ये तृतीय आश्विनो मासः पंचमः पक्षः आश्विनस्य बहुलः कृष्णस्तस्याश्विनबहु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लस्य त्रयोदशीतिथिस्तस्याः पक्षः पश्चार्धरात्रिरिति भावः.
'अंतरत्ति' अंतराले रात्रौ, 'हियाणुकंपएणं' तु हितः शक्रस्य, स्वस्य चानुकंपको, भगवतः अनुकंपा चात्र भक्तिः, 'आयरियणुकंपाए । गब्भो अणुकंपिओ महाभागोत्ति' वचनात्तत्रश्च भक्त इत्यर्थः. 'साहरिज्जिस्सामित्ति' इत्यादि च्यवनवद् ज्ञेयं, संहरणस्याप्येकसामयिकत्वात् यद्यपि चांतर्मुहूर्त्तकालोऽप्यत्र संभाव्यते, तथापि छाद्मस्थिकोपयोगादपि संहरणकालः सूक्ष्मतर इत्याम्नायिकाः, केचित्तु 'साहरिज्जमाणे जाणइत्ति' पठंति, न चायं पाठः सार्वत्रिकः, 'तंसि तारिसगंसित्ति' तस्मिंस्तादृशके वक्तुमशक्यस्वरूपे, पुण्यवतां योग्य इत्यर्थः, 'वासघरंसित्ति' वासभवनेऽभ्यंतरतो भित्तिभागे सचित्रकर्मणि चित्रयुक्ते 'बाहिरओ' बाह्यतो 'दूमियघट्ठमट्ठेत्ति' दूमियं धवलितं, घृष्टं कोमलपाषाणादिना, अत एव मृष्टं मसृणं यत्तत्तथा, तस्मिन् विचित्रमाश्चर्यकृत् उल्लोचस्य वितानस्य 'विचित्तं' विविधचित्रयुक्तं तलमधोभागो यस्मिंस्तत्तथा, 'विचित्तउल्लोयचिल्लियतलेत्ति' पाठे तु विचित्रो विविधचित्रयुक्त उल्लोक उपरिभागो यत्र, चिल्लियं दीप्यमानं तलं अधोभागो यत्र, ततो विशेषेण कर्मधारयः, 'मणिरयणपणासियंधयारे' इति स्पष्टं, तथा बहु अ·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यर्थ समो न निम्नोन्नतः पंचवर्णमणिकुट्टिमकलितः सुविभक्तः कृतस्वस्तिको भूमिभागो यत्र तत्त-था, तत्र पंचवर्णेन सरसेन सुरभिणा मुक्तेन क्षिप्तेन पुष्पपुंजलक्षणेनोपचारेण पूजया कलितेन, कालागुरु च कृष्णागरु प्रवरकुंदुरुक्कं च चीडाभिधानो गंधद्रव्यविशेषः, तुरुष्कं च सिल्हकं, धूपश्च दशांगादिगंधद्रव्यसंयोगज इति द्वंद्वे, तेषां संबंधी यो मघमघायमानोऽतिशयवान् गंध उद्धूत उ-द्भूतस्तेनाभिरामे रम्ये, तथा सुष्टु गंधवराणां प्रधानवासानां गंधो यस्मिन्नस्ति तत्सुगंधवरगंधिकं, त-त्र क्वचित् 'सुगंधवरगंधगंधिएत्ति' पाठस्तत्र सुगंधाः सुरभयो ये वरगंधाः प्रधानचूर्णास्तेषां गंधो यत्रास्ति तत्सुगंधवरगंधगंधिकं तत्र, तथा गंधवर्त्तिर्गंधद्रव्यगुटिका तद्भूतसौरभ्यातिशयाद्गंधद्रव्यगुटि-काकल्पे इत्यर्थः.

तथा तस्मिंस्तादृशके शयनीये तल्पे 'सालिंगणेत्यादि' सहालिंगनवृत्त्या, शरीरप्रमाणगंडो-पधानेन यत्तत्सालिंगनवर्त्तिकं तस्मिन्, उभयत उभौ शिरोंतपादांतावाश्रित्य 'विब्बोयणेत्ति' उ-पधानके गंडुके यत्र तत्तथा, तत्र, अत एवोभयत उन्नते मध्येन तं च तद्गंभीरं च महत्त्वोन्नतगं-भीरे, अथवा मध्येन च मध्यभागेन तु गंभीरेऽवनते; क्वचित् 'पण्णत्तगविब्बोयणेत्ति' दृश्यते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र वस्तुपरिकर्मितगंम्भोपधान इत्यर्थः. गंगापुलिनवालुकाया योऽवदालोऽवदलनं पादादिन्यासेऽधोगमनमित्यर्थः, तेन 'सालिसइत्ति' सदृशकेऽतिनम्रत्वात्, दृश्यते च हंसतूल्यादिष्वयं न्यायः, 'वियत्ति' परिकर्मितं यत् क्षौममतसीमयं दुकूलं वस्त्रं, तस्य युगलापेक्षया यः पट्टः एकशाटकः स प्रतिच्छद आच्छादनं यस्य तत्तथा, तत्र क्वचित् 'पडिच्छन्नेति' पाठस्तत्र तेन पट्टेन प्रतिच्छन्ने आच्छादिते, तथा सुष्टु विरचितं शुचि वा विरचितं रजस्त्राणमाच्छादनविशेष उपरिभागावस्थायां यस्मिंस्तत्तथा तत्र, तथा रक्तांशुकसंवृत्ते मशकगृहाभिधानवस्त्रावृत्ते सुरम्येऽतिरमणीये, तथा आजनिकं चर्ममयो वस्त्रविशेषः, स च स्वभावादतिकोमलो भवति, रूतं कर्पासपक्ष्म, बूरो वनस्पतिविशेषः, नवनीतं म्रक्षणं, एभिस्तुल्यः स्पर्शो यस्य तत्तथा तत्र सुगंधाभ्यां वरकुसुमचूर्णाभ्यां सत्पुष्पजातिवासयोगाभ्यां यः शयनस्य शय्याया उपचारः पूजा, तेन कलिते, 'पुव्वरत्तावरत्तकालसमयंसि' मध्यरात्रे, शेषं प्राग्वत्.

अथ स्वप्नव्याख्या—'तएणं सा' इत्यादि, ततः सा त्रिशला क्षत्रियाणी तत्प्रथमतया इभं स्वप्ने पश्यति, अत्र च प्रथममभिदर्शनं सामान्यवृत्तिमाश्रित्योक्तं, अन्यथा प्रथमजिनजननी वृषभ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिव श्रीवीरमाता प्रथमं सिंहमद्राक्षीदिति वृद्धाः, चतुर्दंतं चतुर्दंतमुशलं, क्वचित् ' तजं चउदंत ' इतिपाठस्तत्र ततश्चेति योज्यमाने ' तएणं ' इति पौनरुक्त्यं स्यात्, तस्मात्ततौजसो महाबलाश्चत्वारो दंता यस्य स ततौजश्चतुर्दंतस्तमिति व्याख्येयं, ' उसियंति ' उच्छ्रितं, निर्विभक्तिकपाठे तु ' गलियं ' इत्यादिविशेषणेन सह कर्मधारयः, ' गलियत्ति ' निर्जलः, हारनिकरः पुंजीकृतहारः, दकरजांसि शीकराः, रजतमहाशैलो वैताढ्यः तद्वत्पांडुरतरं पांडुरांगं वा, समागता मधुकरा यत्र तथाविधं यत्सुगंधं दानं मदस्तेन वासितं सुरभितं कपोलमूलं यस्य स तथा, तं, क्वचिच्च ' महुयरत्ति ' पदं न दृश्यते, तत्र समागतं सततं वहमानं यद्दानमिति व्याख्येयं, देवराजकुंजरमैरावणं वरप्रमाणं पालकाप्योक्तोत्कृष्टमानदेहं, ' सव्वलक्खणकयंबियंति ' सर्वलक्षणकदंबं जातमस्य स सर्वलक्षणकदंबितस्तं, वरश्चासावुरुर्विशालश्च वरोरुस्तं ॥ १ ॥

ततः पुनर्वृषभं पश्यति, कीदृशं धवलकमलपत्रप्राकारादतिरेकाधिका रूपप्रभा यस्य तं, प्रभासमुदयोपहारैः प्रभासमुदयो दीप्तिजालं तस्योपहारा विस्तरणानि, तैः सर्वतः सर्वा दिशो दीपयंतं, अतिश्रीभर उत्कृष्टशोभासंभारस्तेन यत्प्रेरणमिव प्रेरणं, तेनैव विसर्पदुल्लसदेव कांतं दीप्तं शो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भमानं चारु ककुदं स्कंधो यस्य तं, किल ककुदं स्वभावादेवोल्लसदस्ति, तत्रोत्प्रेक्षते, नेदं स्वयमेवोल्लसत्यपितु सहजशोभासंभारेणैव प्रेर्यते उल्लासयति, तनुशुचिसुकुमाररोम्णां स्निग्धा छविर्यस्य तं, स्थिरमत एव सुबद्धं मांसलमत एवोपचितं, लष्टं प्रधानं सुविभक्तं यथावत्संनिविष्टावयवं सुंदरमंगं यस्य तं, घने निचिते वृत्ते वर्तुले वलिते लष्टादप्युत्कृष्टेऽतिश्रेष्टे ऽत यावत्, 'तुप्पग्गे' म्रक्षिताग्रे तीक्ष्णे शृंगे यस्य तं, 'क्वचित्तुप्पपुप्फग्गतिक्खसिंगमिति' पाठस्तत्र च तुप्पे म्रक्षिते पुष्पाग्रे पुष्पाकारं गोरोचनासद्भावसूचकं बिंदुरूपं पुष्पं तदस्त्युपरिभागे ययोः शृंगयोरिति ज्ञेयं, दांतं न छर्दातं, शिवमुपद्रवनिवारणं समानास्तुल्यप्रमाणा अत एव शोभमानाः शुद्धा निर्दोषाः श्वेता वा दंता यस्य तं, अमितगुणानां मंगलानां मुखमिव मुखं द्वारं, 'अमियगुणमंगलमुहमिति' पाठे तु अमितगुणमत एव मंगलमुहं कल्याणकरणसमर्थं ॥ २ ॥

ततः पुनर्नभस्तलादवपतंतं अवतरंतं ततो निजवदनमतिपतंतं प्रविशंतं सिंहं पश्यति, हारनिकरेत्यादि पूर्ववत्, रमणीयमत एव प्रेक्षणीयं द्रष्टुं अर्हं, स्थिरौ दृढौ लष्टौ श्रेष्टौ 'लषी कांताविति धातोः प्रयोगे लषितौ वा कांतौ प्रकोष्टौ कलाचिके यस्य स तथा, वृत्ताः वर्तुलाः पीवराः स्थूलाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुश्लिष्टा विशिष्टास्तीक्ष्णा या दंष्ट्रास्ताभिर्विडंबितमलंकृतं मुखं यस्य स तथा, ततो विशेषणकर्मधारयः, 'विडंबियं' विवृतमित्यन्ये, परिकर्मिताविव परिकर्मितौ जात्यकमलकोमलौ प्रमाणेन मात्रया शोभमानौ 'माइयसोभंतत्ति' पाठे तु 'माइयत्ति' मानोपेतौ मायान्वितौ वा क्रूरत्वात्, शोभमानौ लष्टौ उष्टौ यस्य स तथा तं, रक्तोत्पलपत्रवन्मृदु सुकुमालं तालु, च निर्लालिता निष्कासिताग्रजिह्वा यस्य स तथा तं, तालुस्थाने 'तलत्ति' क्वचिद् दृश्यते, तत्र च रक्तोत्पलपत्रवन्मृदुतलं यस्या एवं विधा निर्लालिताग्रा लपलपायमाना जिह्वा यस्येति व्याख्येयं, मूषागतं यत्प्रवरकनकं तदपि तापितमत एवावर्त्तमानं तद्वद्वृत्ते विमलतडित्सदृशे नयने यस्य स तथा तं, आर्षत्वाद्विशेषणविशेष्ययोः पूर्वपरनिपातो नियमः, विशालौ पीवरौ वरौ ऊरू यस्य स तथा, परिपूर्णोऽन्यूनो विमलस्कंधो यस्य स तथा, ततो विशेषणकर्मधारयः, मृदूनि सुकुमाराणि विशदानि धवलानि सूक्ष्माणि तनूनि लक्षणैः प्रशस्तानि प्रशस्तलक्षणानि विस्तीर्णानि दीर्घाणि यानि केशराणि स्कंधरोमाणि तेषामाटोपेनोद्धततया शोभितं उच्छ्रितमुदग्रं सुनिर्मितं कुंडलीकृतं सुजातं संपूर्णमास्फोटितमास्फोटितं लांगूलं पुच्छटा येन स तथा, सोमं सौम्यं वा मनसाऽक्रूरं सोमाकारं हृद्याकृतिं लीलायंतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मंथरगतिं, वदनस्य मुखकुहरस्य श्रिये शोनार्थं पल्लव इव रक्तत्वमृडुत्वाभ्यां वदनश्रीपल्लव एवंविधा प्राप्ता प्रसारिता चार्वी जिह्वा यस्य स तथा तं, नच 'निल्लालियग्गजीह' मित्यनेन पौनरुक्त्यं, विशेषणांतरोपादानात्, क्वचित् 'वयणसिरिपल्लंबपत्तचारुजीहमिति' दृश्यते, तत्र चेत्थं गमनिका, वदनस्य श्रीः शोना यया सा तथाविधा प्रलंबा लंबमाना पत्रचार्वी पत्रवत्तलिना जिह्वा यस्य स तथा तं ॥ ३ ॥

ततः पुनः पूर्णचंद्रवदना त्रिशला हिमवच्छैलशिखरे पद्महृदांतः कमलवासिनीं दिग्गजेंद्रोरुपीवरकराभिषिच्यमानां नगवतीं श्रीदेवीं पश्यति, कीदृशीमुच्चमागतं प्राप्तं, अथवा उच्च उन्नतोऽगः पर्वतो हिमावांस्तत्र जातमुच्चागजं यत्स्थानं कमलं तत्र लष्टं यथा नवत्येवं संस्थितां, तथा प्रशस्तरूपां सुप्रतिष्टौ समतलनिवेशौ कनकमयकूर्मस्योन्नतत्वात्सदृशमुपमानं ययोस्तथाविधौ चरणौ यस्याः सा तथा तां, अत्युन्नतं पीनमंगुष्टाद्यंगं, तत्र रंजिता मृगरमणादन्यत्वाप्यनुषंगलोपवादिमताश्रयणात् रंजिता इव लाक्षारसेन, मांसला उन्नता मध्योन्नतास्तनवस्तलिनास्ताम्रा अरुणाः स्निग्धा अरूक्षा नखा यस्याः सा तथा तां, अथवा अत्युन्नतानपि निजरूपदर्पोध्धुरानपि प्रीणयंतीत्युन्नतप्रीणा इति न-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खानामेव विशेषणं कार्यं, कमलस्य पलाशानि पत्राणि तद्वत्सुकुमारं करचरणं यस्याः सा चासौ कोमला वरांगुलिश्च सा तथा तां, कुरुविंदावर्त्तं भूषणविशेषः, आवर्त्तविशेषो वा तद्वद्वृत्तौ वृत्तानुपूर्वे जंघे यस्याः सा तथा तां, निगूढजानुमिति, गजवरकरसदृशपीवरोरुमिति, चामीकरचितमेखलायुक्तकांतविस्तीर्णश्रोणिचक्रमिति, च स्पष्टं, जात्यांजनभ्रमरजलदप्रकर इव वर्णेन जात्यांजनभ्रमरजलदप्रकरस्तथा भूता ऋज्वी सरला, समाऽविषमा, संहिता निरंतरा, तनुका सूक्ष्मा, आदेया सुभगा लटभा सुविलासा, सुकुमारेभ्योऽपि शिरीषपुष्पादिभ्योऽपि मृद्वी सुकुमारमृद्वी, रमणीया मनोज्ञा रोमराजी यस्याः सा तथा तां, नाभिमंडलेन सुंदरं विशालं प्रशस्तं सुलक्षणत्वाज्जघनं यस्याः सा तथा तां.

करतलेन मुष्टिना माश्यत्ति मेयं मानं वा प्रशस्तत्रिवलिकं शोभनवलित्रययुक्तं मध्यं यस्याः सा तथा तां, नानामणिकनकरत्नविमलमहातपनीयाभरणभूषणविराजितांगोपांगां, तत्र मणयश्चंद्रकांताद्याः, रत्नानि वैडूर्यादीनि कनकं पीतवर्णं, तपनीयं तदेव रक्तं, तच्च जात्यत्वाद्विमलमहद्भ्यां विशेषितं, तेषां यान्याभरणानि अंगपरिधेयानि, यानि च भूषणान्युपांगपरिधेयानि, तैर्विराजितानि यथासंख्यमंगोपांगानि, अंगानि शिरोहृदयादीनि, उपांगानि अंगुल्यादीनि यस्याः सा त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



था तां, हारेण विराजत्कुंदमालया परिणद्धं 'जलजलिंतत्ति' जाज्वल्यमानं, 'जलजलजलिंत-त्ति' पाठे तु जलवद्देदीप्यमानं वा स्तनयुगलमेव विमलौ कलशौ यस्याः सा तथा तां, आहतैः सादरैः प्रत्ययितैराप्तैर्विज्ञानिकैर्विभूषितेन विरचितमंम्लेन सुभगैर्दृष्टिहारिभिर्जालकैर्गुम्फविशेषैरुज्ज्वलितमुक्ताकलापेनोपलक्षितां, अथवा आ मर्यादया स्थानौचित्येन चिता न्यस्ताः पत्रिका मरकतपत्राणि ताभिर्विभूषितेनेति योज्यं, क्वचित् 'आतियपत्तियट्टि' दृश्यते, तत्र त्रिकं पृष्टवंशस्याधस्तात् समीपोपलक्षितोऽग्रभागोऽपि त्रिकं, तत्र आत्रिकात त्रिकं यावत् प्राप्तिरवकाशो यस्य तदात्रिकप्राप्तिकं, एवंविधं भूषितं विभूषा येन मुक्ताकलापेन तदवधिप्रलंबमानत्वादिति घटना, उरःस्थया दीनारमालया विरचितेन विराजितेन वा कंठमणिसूत्रेण कंठस्थरत्नमयसूत्रेण चोपलक्षितां.

आर्षत्वादंसोपसक्तमिति विशेषणमपि परं, ततोंसयोः स्कंधयोरुपसक्तं लग्नं यत्कुंम्लयुगलं तस्योल्लसंती प्रोज्ज्वलंती शोभमाना सती प्रशस्ता प्रभा यत्र, तथा भूतेनाननकौटुंबिकेन, यथा किल राजा कौटुंबिकैः शोभते, एवमाननमपि शोभासमुदयेनेति, मुखनरेंद्रस्य कौटुंबिकप्रायेण शोभागुणसमुदयेन चोपलक्षितां, तत्र शोभा दीप्तिः, स एव गुणः तस्य समुदयः प्राग्भारस्तेन, कमलाम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लविशालरमणीयलोचनामिति व्यक्तं, प्राग्वत् परनिपाते प्रज्ज्वलंतौ दीप्तिमंतौ यौ करौ ताभ्यां गृहीताभ्यां कमलाभ्यां मुक्तं क्षरत्तोयं मकरंदरसो यस्याः सा तथा तां, लीलया न पुनः स्वेदापनोदार्थं, स्वेदस्यैवाऽभावात्, वातार्थं वातावक्षेपार्थं कृतो यः पक्ष्कस्तालवृंतं तेनोपलक्षितां, केचिच्च लिलावादकृतपक्षकेणेति, लीला शोभा तदर्थं परैः सह स्पर्धया वा वादो लीलावादस्तत्र कृतो विहितः पक्षः प्रतिज्ञापरिग्रहो येन स तथा, कप्रत्ययेनेति, शोभागुणसमुदयस्य विशेषणतया वा वक्ष्यते, तच्च दुरांतरितत्वात्ततः प्रीतये इति, सुविशदः स्पष्टो न पुनर्जटाजूटवदविवृत्तः, कृष्णः श्यामो घनोऽविरलः सूक्ष्मस्तलिनो लंबमानः केशहस्तः केशपाशो यस्याः सा तथा तां ॥ ४ ॥

दामस्वप्नः सुगम एव, न वरं सरसकुसुमं यन्मंदारदाम, तेन रमणीयभूतं रम्यसंजातं सर्वर्त्तुकं यत्सुरभिकुसुममाल्यं तेन धवलं च तद्विलसत्कांतबहुवर्णभक्तिचित्रं चेति कर्मधारयः, अनेन धवलवर्णस्याधिक्यं लक्षितं, षट्पदी मधुकरी भ्रमरा वर्णादिविशिष्टा भ्रमरजातिविशेषास्तेषां गणः स गुमगुमायमानो मधुरं ध्वनन्निलीयमानः स्थानांतरादागत्य तत्र लीयमानो गुंजन् शब्दविशेषं कुर्वन् देशभागेषु तस्मिंस्तस्मिन् देशे यस्य दाम्नः, गमकत्वादेवमपि समासः, ततः पाश्चात्यविशेषणं कर्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धारयेण सह षट्पदादिविशेषणस्य पुनः कर्मधारयः ॥ ५ ॥

ततः पुनः शशिनं च पश्यति, गोक्षीरफेनदकरजोरजतकलशपांडुरं शुभं हृदयनयनकांतं प्रतिपूर्णमिति स्पष्टं, तिमिरनिकरेण घनगंभीरस्य वनकुंजादेर्वितिमिरकरं, तिमिराणामभावो वितिमिरं तत्करणशीलं वितिमिरकरं, प्रमाणपक्षयोर्वर्षादिपरिमाणनिबंधनयोः शुक्लकृष्णपक्षयोरंतर्मध्ये राजंती लेखा यस्य स तथा तं, अथवा चांद्रमासापेक्षयोरेतयोः पौर्णमास्यां रागदा हर्षदायिन्यो लेखाः कला यस्य तं संपूर्णकलमित्यर्थः, कुमुदवनविबोधकमिति व्यक्तं, निशायाः शोभकं शोभयितारं निशाशोभकं, सुपरिमृष्टेन दर्पणतलेनोपमा यस्य स तथा तं, हंसस्येव पटुर्धवलो वर्णो यस्य स तथा तं, तमोरिपुमिति स्पष्टं, ' तमरिद्धु ' मिति पाठे तु तमसोंधकारस्य न ऋतुर्न प्रस्तावो यस्मिन् सति तथा तं, अकारप्रश्लेषात्तमरिद्धमिति सिद्धं, मदनस्य कामदेवस्य शरापूरमिति शरापूरं, शरैरापूर्यते शरापूरस्तूणीरस्तं, उदिते हि चंद्रमसि लक्षीकरोति कुसुमशरः कामिनः स्वशराणां, समुद्रस्य दकं पानीयं पूरयति, चंद्रकलया तदुल्लसनात् समुद्रदकपूरस्तं, दुर्मनस्कं दयितवर्जितं जनं विरहिणीलोकं पादैः किरणैः शोषयंतं, तापातिरेककरणात, पादकैरिति प्रशंसायां कन्, पुनरिति योजितमेव,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौम्यचारुरूपमिति व्यक्तं, पेच्छइ पश्यति, सा त्रिशला, गगनमंडलस्य विशालं सौम्यं चंक्रम्यमाणं जंगमं तिलकमिव विभूषाहेतुत्वात् 'गगणगमणित्ति' पाठे तु गम्यते तेनास्मिन्निति वा गमनं मार्गः गगनस्य गमनं, शेषं पूर्ववत्, रोहिण्या नक्षत्रविशेषस्य मनश्चित्तं तस्य हितदोऽनुकूलदायी वल्लभः प्रियस्तं, एकनरानुरागमात्रेणापि किल वल्लभः स्यादित्येकपाक्षिकप्रेमनिरासार्थं हितद इति विशेषणं, सर्वनक्षत्राधिपत्येऽपि यदत्र रोहिणीवल्लभ इति विशेषणं, तल्लोकरूढ्या, पूर्णोऽविकलश्चंद्र आह्लादोऽस्मादिति चंद्रः, अथवा पूर्णश्चंद्रो दीप्तिर्यस्य, मेघाद्यनावरणात्स तथा तं, अत एव समुल्लसंतं प्रतिक्षणं देदीप्यमानं ॥ ६ ॥

ततः सूर्यं पश्यति, अतमःपटलं परिस्फुटं, तमःपटलस्याऽभावोऽतमःपटलं, तेन परिस्फुटं सर्वदिक्षु प्रकटं, अथवा तमःपटलं परिस्फोटयतीति तमःपटलपरिस्फोटः, 'स्वराणां स्वरा' इति तत्र तं चेव शब्दस्याऽवधारणार्थस्य व्यवहितसंबंधात्तेजसैव प्रज्ज्वलद्रूपं, प्रकृत्या हि सूर्यमंडलवर्त्तिबादरपृथिवीकायिकाः शीतला एव, अथवा चेवत्ति समुच्चयार्थः, रक्ताशोकश्च प्रकाशत् किंशुकश्च पुष्पितपलाशस्तथा शुकमुखं च गुंजार्धश्च तेषां रागेण सदृशं, आरक्तत्वात्, कमलवनमलंकरोति विकाश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुमरासिहिंगबुयनियरातिरेयरेहंतसरिसे ’ इति पाठस्तत्र च बंधुजीवकं पुष्पविशेषः, पारापतस्य चरणौ नयने च, परभृतस्य कोकिलस्य सुरक्तस्य जात्यत्वान्मधुरकंठस्य लोचने नेत्रे, परभृतस्य वा सुरक्ते सुशब्देन कोपाविष्टत्वलक्षणात् कोपारक्ते लोचने, ‘ जासुयणकुसुमरासित्ति ’ जपापुष्पप्रकरः, हिंगुलकनिकरः, सुवर्त्तितकुरुविंदगुलिका, एतेभ्योऽतिरेकेणाधिक्येन राजमानः सन् सदृशस्तस्मिन्, अरुणत्वमात्रेण सदृशः, विशिष्टदीप्त्या त्वतिरिक्त इति भावः, कमलाकराः पद्मोत्पत्तिस्थानभूता ह्रदादयस्तेषु यानि खंडानि नलिनवनानि तेषां बोधको विकाशको यः स तथा, तत्र उत्थिते उद्गते सूरे रवौ, किं भूते सहस्ररश्मौ तथा दिनकरे दिनकरणशीले तेजसा ज्वलति सति, तस्य च ‘ करपहारापरद्धंमित्ति ’ कराः किरणास्तेषां तैर्वा प्रहारोऽभिघातस्तेनोपरुद्धे विनाशितेंधकारे ‘ पहरिति घञ् ’ वृद्धेर्वेति प्राकृतलक्षणेन ह्रस्वः, बालातपो कुंकुममिव, तेन खचित इव पिंजरित इव जीवलोके मध्यजगति शयनीयादभ्युत्तिष्ठति.

‘ अट्टणसालेत्यादि ’ अट्टनशाला व्यायामशाला, अनेकानि यानि व्यायामाय व्यायामनिमित्तं योग्यादीनि तानि तथा, तत्र योग्या च गुणनिका वल्गनं चोल्ललनं, व्यामर्द्दनं च परस्परेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाह्वाद्यंगमोटनं, मल्लयुद्धं च प्रतीतं, करणानि चांगभंगविशेषा मल्लशास्त्रप्रसिद्धानि, तैः श्रांतः सामान्येन परिश्रांतोंगप्रत्यंगापेक्षया सर्वतः शतकृत्वा यत्पक्वमपरापरौषधीरसेन सह शतेन वा कार्षापणानां यत्पक्वं तच्छतपाकमेवमितरदपि सुगंधिवरतैलादिभिरभ्यंगैरिति योगः, आदिशब्दाद् घृतकर्पूरपानीयादिग्रहः, किंभूतैः प्रीणनीयैः रसरुधिरादिधातुसमताकारिभिर्दीपनीयैरग्निजननैः मदनीयैर्मदनविवर्धनैर्बृंहणीयैर्मांसोपचयकारिभिः, दर्पणीयैर्बलकरैः, सर्वेंद्रियाणि सर्वगात्राणि च प्रह्लादयंतीति सर्वेंद्रियगात्रप्रह्लादनीयैः कर्त्तयनीयस्तैरभ्यंगैः स्नेहनैरभ्यंगः क्रियते स्म यस्य सोऽभ्यंगितः सन् ततस्तैलचर्मणि तैलाभ्यक्तस्य संबाधनाकरणाय यच्चर्मतूलिकोपरि कडलं तत्तैलचर्म तत्र संवाहिते समाणेत्ति योगः, कैरित्याह—

पुरुषैः कथंभूतैः प्रतिपूर्णानां पाणिपादानां सुकुमालकोमलान्यतिकोमलानि तलान्यधोभागापेक्षया येषां ते तथा तैः, तथाभ्यंगनपरिमर्द्दनोज्ज्वलनानां प्रतीतार्थानां करणैर्ये गुणविशेषास्तेषु निर्मिताः सदभ्यस्ता ये तथा तैः, छेकैरवसरज्ञैर्द्विसप्ततिकलापंडितैरिति च वृद्धाः, दक्षैः कार्याणामविलंबितकारिभिः, प्रष्ठैर्वाग्मिभिरिति वृद्धव्याख्या, अथवा प्रष्ठैरग्रगामिभिः कुशलैः साधुभिः संबाध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाकर्मणि, मेधाविभिरपूर्वविज्ञानग्रहणशक्तिनिष्ठैः, 'निउणेहिं निउणसिप्पोवगएहिंति' च क्वचिद् दृश्यते, तत्र निपुणैरुपायकुशलैः, निपुणानि सूक्ष्माणि यानि शिल्पानि अंगमर्दनादीनि तान्युपगतान्यधिगतानि यैस्ते तथा तैः, जितपरिश्रमैः, व्याख्यांतरे तु छेकैः प्रयोगज्ञैः दक्षैः शीघ्रकारिभिः, 'पत्तठेहिंति' प्राप्तार्थैरधिकृतकर्मणि, निष्ठां गतैः कुशलैरालोचितकारिभिः, मेधाविभिः सकृतश्रुतदृष्टकर्मज्ञैर्निपुणैरुपायारंभिभिर्निपुणशिल्पोपगतैः सूक्ष्मशिल्पसमन्वितैरिति, अस्थ्नां सुखहेतुत्वादस्थिसुखा तया, एवं शेषाण्यपि पदानि, सुखा सुखकारिणी परिकर्मणा अंगशुश्रूषा सुखपरिकर्मणा तया, तस्याश्च बहुविधत्वात् कतमयेत्याह—'संवाहणाएत्ति' संबाधनया संवाहनया च, विश्रामणया अपगतपरिश्रमः, क्वचि 'दवगयखेयपरिस्समेत्ति पाठः, तत्र खेदो दैन्यं, खिद् दैन्ये' इति वचनात्, परिश्रमो व्यायामजनितः शरीराऽस्वास्थ्यविशेषः, 'समुत्तजालाभिरामेत्ति' समुक्तेन मुक्ताफलयुतेन जालेनाकुलोऽभिरामश्च रम्यो यः स्नानमंडपः स तथा, पाठांतरेण 'समंतजालाभिरामोत्ति' समंतात् सर्वतो जालकैर्विचित्तिभिर्द्रवद् गृहावयवविशेषैराकुलो व्याप्तोऽभिरामश्च रमणीयो यः स तथा, पाठांतरेण 'समंत्तजालाभिरामोत्ति' तत्र समस्तः सर्वो जालकैरभिरामो यः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स तथा तत्र, तथा विचित्रमणिरत्नाभ्यां कुट्टिमतलं बद्धभूमिका यत्र, तत्तथा तत्र, पुष्पोदकैः पुष्परसमिश्रैः गंधोदकैः श्रीखंडादिरसमिश्रैः, उष्णोदकैरेकतप्तोदकैः, शुभोदकैः पवित्रस्थानाहृतैः तीर्थोदकैः, सुखोदकैर्वा नात्युष्णैरित्यर्थः, शुद्धोदकैश्च स्वाभाविकैः, कथं मज्जित इत्याह—

तत्थत्ति, तत्र स्नानावसरे कौतुकानां रक्षादीनां शतानि तैः, ' कल्लाणगत्ति ' कल्याणानि, कायत्याकारयति कल्याणकमेवंविधं यत्प्रवरमज्जनं तस्यावसाने ' पम्हलेत्यादि ' पक्ष्मला पक्ष्मवत्यत एव सुकुमाला गंधप्रधाना काषायिका कषायरक्ता शाटिका तया लूषितं विरूक्षितं अंगं शरीरं यस्य स तथा तं, अहतं मलमूषकादिभिरनुपद्रुतं प्रत्यग्रमित्यर्थः सुमहार्घं बहुमूल्यं यत दूष्यरत्नं प्रधानवस्त्रं तेन सुसंवृतः परिवृतः, यद्वा सुष्टु संवृत्तं परिहितं येन स तथा, क्वचित् ' नासानिसासवायवज्झचक्खुहरवण्णफरिसजुत्तहयलालापेलवाइरेगधवलकणगखचियंतकम्मदूसरयणसुसंवुए ' इति दृश्यते, तत्र नासानिःश्वासवातेन वाह्यं हरणीयं श्लक्ष्णत्वात् चक्षुर्हरत्यात्मवशं नयति विशिष्टरूपातिशयकलितत्वात् चक्षुर्हरं चक्षुर्धरं वा चक्षूरोधकं घनत्वात्, वर्णस्पर्शयुक्तं प्रधानवर्णस्पर्शं, हयलालायाः सकाशात् पेलवं मृदु, अतिरेकेणातिशयेन धवलं यत्तत्तथा, कनकेन खचितं मंडितमंतयोरंचलयोः क-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्मे वानलक्षणं यस्य तत्तथा, तेन पुष्यरत्नेन सुसंवृत्तः, शुचिनी पवित्रे माला च पुष्पमाला वर्ण- विलेपनं च मंगलकारि कुंकुमादिविलेपनं यस्य स तथा, यद्यपि वर्णकशब्देन नामकोशे चंदनमभिधीयते, तथापि—

'सुरहिगोसीसचंदणाणुलित्तगत्ते' इत्यनेनैव विशेषणेन तस्योक्तत्वात् इह वर्णकश्चंदनमिति न व्याख्यातं, आविद्धानि परिहितानि मणिसुवर्णानि यस्य स तथा मणिमयं सुवर्णमयं चेत्युक्ते न धात्वंतरमयं तस्य भूषणमिति भावः, कल्पितो विन्यस्तो हारोऽष्टादशसरिकोऽर्द्धहारो नवसरिकः, त्रिसरिकं च प्रतीतमेव यस्य स तथा, प्रालंबो झुंबनकं प्रलंबमानो यस्य स तथा, कटिसूत्रेण सार- सतकव्याभरणविशेषेण सुष्टु कृता शोभा यस्य स तथा, पदत्रयस्य कर्मधारयः. अथवा कलिता हारादिभिः सुष्टुकृता शोभा यस्य स तथा, तथा पिनद्धानि परिहितानि ग्रीवायां ग्रैवेयकानि कंठका- ख्यग्रीवाभरणानि येन स तथा, अंगुलीयकान्यंगुल्याभरणान्यूर्मिका ललितानि कचाभरणानि पुष्पा- दीनि यस्य स तथा, क्वचित् 'पिणद्धगेविज्जगललियंगयललियकयाभरणेत्ति' पाठस्तत्र पिनद्धानि बद्धानि ग्रीवादिषु ग्रैवेयकांगुलीयकानि ग्रीवाभरणांगुल्याभरणानि येन स तथा, तथा ललितांगके

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ललितशरीरे अन्यान्यपि ललितानि शोभावंति कृतानि विन्यस्तान्याभरणानि यस्य स तथा, पदद्वयस्य कर्मधारयः, अथवा पिनद्धानि ग्रैवेयकांगुलीयकानि ललितांगदे च कचाभरणानि च केशाभरणानि पुष्पादीनि येन स तथा, तथा वरकटकतुटिकैः प्रधानहस्ताभरणबाह्वाभरणविशेषैर्बहुत्वात्तेषां, तैः स्तंभिताविव स्तंभितौ भुजौ यस्य स तथा, अधिकरूपेण सश्रीकः सशोभो यः स तथा, तथा कुंडलोद्योतिताननः, मुकुटदिप्तशिरस्क इति प्रतीतं, हारेणावस्तृतमाच्छादितं तेनैव सुष्टु कृतरतिकं च वक्ष उरो यस्य स तथा, तथा मुद्रिकाः सरत्नान्यंगुल्याभरणानि ताभिः पिंगला अंगुलयो यस्य स तथा, तथा प्रलंबेन दीर्घेण प्रलंबमानेन सुकृतं पटेनोत्तरीयकमुत्तरासंगो येन स तथा, तथा नानामणिकनकरत्नैर्विमलानि महार्हाणि महर्घाणि निपुणेन शिल्पिना ' उवियत्ति ' परिकर्मितानि, ' मिसिमिसिंतित्ति ' दीप्यमानानि यानि विरचितानि निर्मितानि सुसंधीनि विशिष्टान्यन्येभ्यो विशेषवंति लष्टानि मनोहराणि आविद्धानि परिहितानि वीरवलयानि येन स तथा, सुभटो हि यदि क्वचिदन्योऽप्यस्ति वीरव्रतधारी तदासौ मां विजीत्य मोचयत्वेतानि वलयानीति स्पर्द्धयन् यानि कटकानि परिदधाति, तानि वीरवलयानीत्युच्यंते, किं बहुना वर्णितेनेति शेषः, कल्पवृक्ष इवा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लंकृतविभूषितस्तत्रालंकृतो दलादिभिर्विभूषितश्च फलपुष्पादिभिः कल्पवृक्षः, राजा तु मुकुटादिभि- रलंकृतो विभूषितस्तु वस्त्रादिभिरिति.

'सकोरंटमल्लदामेणं' सकोरंटकाभिधानकुसुमस्तबकवंति माल्यदामानि पुष्पस्रजो यत्र तत्तथा, तेन, कोरिंटकः पुष्पवृक्षजातिस्तत्पुष्पाणि मालांतेषु शोभार्थं दीयंते, मालायै हितानि माल्यानि पुष्पाणि, दामानि मालाः, इति 'धरिज्जमाणेणं' ध्रियमाणेन, वाचनांतरे सूर्याभवदलंकारवर्णकः स चैवं—'एगावलिपणिद्धे' इत्यादि राजप्रश्नीयसूत्रं, तत्रैकावली विचित्रमणिमयी, मुक्तामयी के- वलमुक्तामयी, कनकावली सौवर्णमणिमयी, रत्नावली रत्नमयी, अंगदं केयूरं च बाह्वाभरणविशेषः, एतयोश्च यद्यपि नामकोशे एकार्थतोक्ता तथापीहाकारविशेषाद्भेदोऽवगंतव्यः, कटकं कलाचिकाभर- णविशेषः, तुटिकं बाहुरक्षकाः, कटिसूत्रं सारसतं, दशमुद्रिकानंतरकं हस्तांगुलिमुद्रिकादशकं, वक्षः- सूत्रं हृदयाभरणभूतं सुवर्णशृंखलकं, वेत्रीसुत्तंति' तत्र वैकक्षिकासूत्रमुत्तरासंगपरिधानीयं शृंखल- कं, मुरवी मुरजाकारमाभरणं, कंठमुखी तदेव कंठासन्नतरावस्थानं, प्रालंबो झुंबनकं, कुंडलानि क- र्णाभरणानि, मुकुटः शिरोभूषणं, चूडामणिः सर्वरोगाशिवादिप्रशमनं केशालंकरणं, 'रयणसंकु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कम्मंति ' रत्नसंकटं च तदुत्कटं चोत्कृष्टं रत्नसंकटोत्कटं. ' गंथिमेत्यादि ' इह ग्रंथिमं ग्रंथननिर्वृत्तं सूत्रग्रथितमालादि, वेष्टिमं वेष्टननिष्पन्नं, पुष्फलंबूसकानि पूरितं येन वंशशलाकामयपंजरकादि कूर्चादिर्वा पूर्यते, संघातिमं तु यत्परस्परतो नालसंघातेन घात्यते, ' अलंकियत्ति ' अलंकृतश्चासौ कृतालंकारोऽत एव विभूषितश्च संजातविभूषश्चेत्यलंकृतविभूषितः, ' वेरुलियभिसंतदंडं ' वैडूर्यस्य ' भिसंतत्ति ' भासमानो दंडो यस्य स तथा तं, ' पलंबसकोरिंटमल्लदामं ' प्रलंबानि सकोरिंटानि कोरिंटकपुष्पगुच्छयुक्तानि माल्यदामानि पुष्पमाला यत्र, चंदमंडलनिभं परिपूर्णचंद्रमंडलाकारमुपरि धृतं यत्तेन तथा, ' नाणामणीत्यादि ' नानामणिकनकरत्नानां विमलस्य महार्हस्य तपनीयस्य च सत्कामुज्ज्वलौ विचित्रौ दंडौ ययोस्ते तथा, कनकतपनीययोः को विशेषः, उच्यते, कनकं पीतं, तपनीयं रक्तमिति, ' विल्लियाउत्ति ' देदीप्यमाने लीने इत्येके, ' संखंककुंदत्ति ' शंखांककुंददक-रजसामम्रतस्य मथितस्य ततो यः फेनपुंजस्तस्य च सन्निकाशे ये ते तथा, इह चांको रत्नविशेषः.

' चामराउ इति ' यद्यपि चामरशब्दो नपुंसकस्तस्य च कलिंगे रूढस्तथापीह स्त्रीलिंगतया निर्दिष्टस्तथैव गौडमते रूढत्वादिति—अथ प्रस्तुतवाचनानुश्रियते, ' मंगलेत्यादि ' मंगलभूतो जय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संदेह-
व्या०
६९

शब्दः कृत आलोकेन यस्य स तथा, लोककृतमार्गदान इत्यन्ये, अनेके ये गणनायकाः प्रकृतिमहत्तरा दंडनायकास्तंत्रपाला राजानो मांडलिका ईश्वरा युवराजाः, अणिमाद्यैश्वर्ययुक्ता इत्यन्ये, तलवराः परितुष्टनरपतिप्रदत्तपट्टबंधविभूषिता राजस्थानीयाः, माडंबिकाश्छिन्नमडंबाधिपाः, कौटुंबिकाः कतिपयकुटुंबप्रभवो, अवगलका ग्राममहत्तरा वा, मंत्रिणः सचिवाः, महामंत्रिणो महामात्याः मंत्रिमंडलप्रधानाः, हस्तिसाधनाध्यक्षा वा, गणका ज्योतिषिकाः, भांडागारिका वा दौवारिकाः प्रतीहारा राजद्वारिका वा, अमात्या राज्याधिष्ठायिकाः, चेटा पादमूलिका दासा वा, पीठमर्दा आस्थाने आसन्ना आसन्नसेवका वयस्या इत्यर्थः. वेश्याचार्या वा, नागरा नगरवासिप्रकृतयो राजदेयविभागाः, निगमाः कारणिका वणिजो वा, श्रेष्ठिनः श्रीदेवताध्यासितसौवर्णपट्टविभूषितोत्तमांगाः, सेनापतयो नृपतिनिरूपिताश्चतुरंगसैन्यनायकाः, सार्थवाहाः सार्थनायकाः, दूताः अन्येषां गत्वा राजादेशनिवेदकाः, संधिपाला राज्यसंधिरक्षका एषां द्वंद्वः, ततस्तैः, इह तृतीयाबहुवचनलोपो द्रष्टव्यः, ‘ सद्धिंति ’ सार्धं सहेत्यर्थः, न केवलं तत्सहितत्वमेव, अपितु तैःसममिति समंतात्परिवृतः परिकरित इति, नरपतिर्मज्जनगृहात् प्रतिनिष्क्रामतीति संबंधः, किं भूतः प्रियदर्शनः, क इव धवलमहामेघनि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गेत इव शशी, तथा ‘ ससिवत्ति ’ तत्करणस्यान्यत्र संबंधः, ततो ग्रहगणदीप्यमानऋक्षतारकगणानां मध्ये इव वर्त्तमान इति, नरपतिर्नराणां रक्षिता, नरेंद्रो नरेष्वैश्वर्यानुभवनात्, नरवृषभो राज्यधुराधरणात, नरसिंहः शौर्यातिशयात्, अभ्यधिकराजतेजो लक्ष्म्या दीप्यमानः ‘ सेयवत्थ पच्चुत्थयाइंति ’ श्वेतवस्त्रेण धवलवाससा प्रत्यवस्तृतान्याच्छादितानि यानि तानि तथा, तथा कृतः सिद्धार्थकप्रधानो मंगलाय मंगलनिमित्तं उपचारः पूजा येषु, तानि, तथा प्राकृतत्वात् कृतशब्दस्य मध्ये निपातः, ‘ अदूरसामंतेत्ति ’ दूरं विप्रकर्षः सामंतं समीपमुभयोरभावोऽदूरसामंतं, नातिदूरे नातिसमीपे उचितदेशे इत्यर्थः.

‘ नाणामणीत्यादि ’ यवनिकामाच्छादयतीति संबंधः, नानामणिरत्नैश्चंद्रकांतादिभिः, कर्केतनादिभिर्मंडिता सा तथा, अधिकं प्रेक्षणीयाऽवलोकनीया या सा तथा तां, क्वचित् ‘ अहियपेच्छणिज्जरूप ’मिति पाठस्तत्राधिकं प्रेक्षणीयरूपं यस्या रूपाणि वा यस्या सा तथा तां, तथा महार्घ्या चासौ वरपत्तने वरवस्त्रोत्पत्तिस्थाने उद्गता च तां, वरपत्तनाद्वा प्रधानवेष्टनकादुद्गता निर्गता या सा तथा तां, ‘ सण्हपट्टभत्तिसयचित्तताणंति ’ सूक्ष्मा पट्टसूत्रमया भक्तिशतचित्रस्तानस्तानको यस्याः सा त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



था तां, क्वचिद् 'भत्तिसयचित्तठाणंति' दृश्यते, तत्र च श्लक्ष्णानि बहुभक्तिशतानि यानि चित्राणि तेषां स्थानं, अत एव सततसमुचितां सर्वकालं योग्यां, ईहा मृगा वृकाः ऋषभतुरगनरमकरविहगाः प्रतीताः व्यालाः श्वापदा भुजगा वा, किन्नरा व्यंतरविशेषाः, रुरवो मृगभेदाः, शरभा पराशराः, अष्टापदा महाकायाः आटव्यपशवः, चमरा आटव्या गावः. 'अभिंतरयंति' आस्थानशालायाः अभ्यंतरभागवर्त्तिनीं यवनिकां कांडपटीं 'अंछावेइ' आकर्षयति, आयतां कारयतीत्यर्थः, 'अत्थर-एत्यादि' आस्तरकेन प्रतीतेन मृदुमसूरकेण वावस्तृतमाच्छादितं, अथवा अस्तरजसा निर्मलेन मृदुमसूरकेण वावस्तृतं, श्वेतवस्त्रेण प्रत्यवस्तृतमुपर्याच्छादितं सुमृदुकं दुकूलं कोमलमत एवांगस्य सुखः सुखकारी स्पर्शो यस्य तदंगसुखस्पर्शं, विशिष्टं शोभनं.

अठंगेत्ति, अष्टांगमष्टावयवं, दिव्योत्पातांतरिक्षभौमांगस्वरलक्षणव्यंजनभेदादंगविद्याहरिंशावश्यकचूर्ण्याद्युक्तांगस्वप्नस्वरभौमव्यंजनलक्षणोत्पातांतरिक्षभेदाद्वाष्टभेदं यन्महानिमित्तं, परोक्षार्थप्रतिपत्तिकारणव्युत्पादकः शास्त्रविशेषः, तस्य यौ सूत्रार्थौ तौ धारयंति पठंति वा, तयोर्वा पारगा ये ते तथा, अनेन पाठत्रयं व्याख्यातं, 'धारए पाढए पारए इति. हठत्ति' यावत्करणात 'हठतुठचित्त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माणंदियत्ति ' इत्यं, ' करयलत्ति ' यावत्करणात् ' परिग्गहियं दसनहं सिरसावत्तं मन्नए अंजलिं कट्टु ' एवं ' देवो तहत्ति आणाए विणएणं वयणं पडिसुणतित्ति ' अस्यार्थः—प्रतिश्रृण्वंत्यभ्यु-पगछंति वचनं, विनयेन, किं भूतेनेत्याह—एवमिति यथैव यूयं भाषथ तथैव, ' देवोत्ति ' हे देव ' तहत्तित्ति ' नान्यथा, आज्ञया भवदादेशेन करिष्यामः, इत्येवमभ्युपगमसूचकपदचतुष्टयभणन-रूपेणेति, ' कयबलिकम्मेत्यादि ' स्नानानंतरं कृतं बलिकर्म यैः स्वगृहदेवतानां तत्तथा, तथा कृता-नि कौतुकमंगलान्येव प्रायश्चित्तानि दुःस्वप्नादिविघातार्थमवश्यकरणीयत्वाद्यैस्तैस्तथा, तत्र कौतुकानि मषीतिलकादीनि, मंगलानि तु सिद्धार्थदध्यक्षतदूर्वांकुरादीनि अन्येत्वाहुः—

' पायच्छित्ता ' पादेन पादे वा छुप्ताश्चक्षुर्दोषपरिहारार्थं पादच्छुप्ताः, कृतकौतुकमंगलाश्च ते पा-दच्छुप्ताश्चेति विग्रहः, तथा शुद्धात्मानः स्नानेन शुचीकृतदेहाः, ' वेसाइंति ' वस्त्राणीति योगः, वे-षे साधूनि वेष्याणि, अथवा शुद्धानि च तानि प्रवेश्यानि च राजसभाप्रवेशोचितानि चेति विग्र-हः, मंगल्यानि मंगलकरणे साधूनि, वस्त्राणीति व्यक्तं, प्रवराणि प्रधानानि परिहिता निवसिताः, तथा अल्पानि स्तोकानि महार्घाणि बहुमूल्यानि यान्याभरणानि तैरलंकृतं शरीरं येषां ते तथा,

For Private And Personal Use Only

तथा सिद्धार्थकाः सर्षपाः, हरितालिका च दुर्वा कृता मंगलनिमित्तं मूर्द्धनि शिरसि येस्ते तथा, 'सएहिंति' स्वकेभ्यः आत्मीयेभ्यः इत्यर्थः, 'भवणवरत्ति' भवनवरेषु हर्म्येषु अवतंसक इव शेखर इव भवनवरावतंसकस्तस्य प्रतिद्वारं मूलद्वारं समीपद्वारं तत्र, 'जएणं विजएणं वद्धाविंति' जयेन विजयेन च त्वं वर्द्धस्वेत्याचक्षते इत्यर्थः. जयविजयौ च प्राग्व्याख्यातौ, 'वंदियत्ति' वंदिताः सद्गुणोत्कीर्त्तनेन, पूजिताः पुष्पैः, सत्कारिताः फलवस्त्रादिदानतः, सन्मानिताः अभ्युत्थानादिप्रतिपत्त्या, अन्ये त्वाहुः—पूजिताः वस्त्राभरणादिभिः, सत्कारिता अभ्युत्थानादिना सन्मानिताः, आसनदानादिना क्वचित्, 'अच्चियवंदियमाणियपूइयत्ति' पाठस्तत्रार्चिताश्चंदनचर्चादिना, मानिता दृष्टिप्रणामतः, शेषं प्राग्वत्; 'सम्माणत्ति' संतः 'पुव्वनत्थेसु' पूर्वं न्यस्तेषु 'अन्नमन्नेण सद्धिं संचालिंतत्ति' अन्योऽन्येन सह संचालयंति, संवादयंति पर्यालोचयंतीत्यर्थः, क्वचित 'संलावेंतित्ति' पाठस्तत्रापि स एवार्थः, 'लद्धठा' इत्यादि, लब्धार्थाः स्वतः, संगृहीतार्थाः पराभिप्रायग्रहणतः, पृष्टार्थाः संशये सति परस्परतः, तत एव विनिश्चितार्थाः, अत एव चाभिगतार्थाः, अवधारितार्थाः, अथवा लब्धार्थाः अर्थश्रवणतः, गृहीतार्था अवधारणतः, पृष्टार्थाः संशये सति अधिगतार्थाः, अ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिगतार्थी वा, अर्थावबोधात् विनिश्चितार्थाः, ऐदंपर्योपलंभात्, 'सुमिणत्ति' सामान्यफलाः, 'महासुमिणत्ति' महाफलाः, 'गप्भंवक्कममाणंसित्ति' गर्भे व्युत्क्रामति प्रविशति सतीत्यर्थः, गर्भे वा व्युत्क्रामत्युत्पद्यमाने 'पुप्फगंधेत्यादि' पुष्पाण्यग्रथितानि गंधा वासाः, माल्यानि ग्रथितपुष्पाणि, अलंकारो मुकुटादिस्तेषां समाहारद्वंद्वः; 'सक्कारेइ' प्रवरवस्त्रादिना 'सम्माणेइ' तथाविधवचनादिप्रतिपत्त्या पूजयति, 'जीवियारिहंति' जीविकोचितं आजन्मनिर्वाहयोग्यं वा ददाति.

'वेसमणकुंडधारिणोत्ति' वैश्रमणस्य कुंडमायत्ततां धारयंति ये ते तथा तिर्यग्लोकवासिनो जृंभका देवास्तिर्यग्जृंभकाः, 'सक्कवयणेणंति' शक्रेण वैश्रमण आदिष्टस्तेन च त इति भावः, से इत्यथ शब्दार्थे, पुरा प्रतिष्ठितत्वेन पुराणानि चिरंतनानि, पुरापुराणानि महानिधानानि भूमिगतसहस्रादिसंख्या द्रव्यसंचयाः, प्रहीणः स्वल्पीभूतः स्वामी येषां तानि प्रहीणस्वामिकानि, प्रहीणा अल्पीभूताः सेक्तारः सेचका धनक्षेप्तारो येषां तानि प्रहीणसेक्तृतानि, प्रहीणसेतुकानि वा, सेतुर्मार्गः प्रहीणं विरलीभूतमानुषं गोत्रागारं स्वामिगोत्रगृहं येषां तानि प्रहीणगोत्रागाराणि, गोत्रं धनस्वामिनोऽन्वयः, अगारं गृहं.

For Private And Personal Use Only

एवमुत्सन्नो निःसत्ताकीभूतः स्वामी येषामित्यादि पूर्ववत्, शृंगाटकं सिंघाटकाभिधानफलविशेषाकारं त्रिकोणं स्थानं त्रिकं यत्र स्थाने रथ्यात्रयं मिलति, चतुष्कं यत्र रथ्याचतुष्कमीलनं स्यात्, चत्वरं बहुरथ्यापातस्थानं, यत्र बहवो मार्गा मिलंति, चतुर्मुखं चतुर्द्वारं देवकुलादि, महापथो राजमार्गः, ग्रामस्थानानि ग्रामपुरातननिवासभूमयः, नगरस्थानानि नगरस्योद्वसिता भुवः, ग्रामनिर्द्धमनानि ग्रामजलनिर्गमाः, खालमिति प्रसिद्धाः, एवं नगरनिर्द्धमनानि नगरजलनिर्गमनमार्गाः, आपणानि हट्टाः व्यवहारस्थानानि, देवकुलानि यक्षशिवाद्यायतनानि, सभाजनोपवेशस्थानानि, आरामा विविधलतोपेता ये कदल्यादिप्रच्छन्नगृहेषु स्त्रीसहितानां पुंसां क्रीडास्थानभूमयः, उद्यानानि पत्रपुष्पफलच्छायोपगतवृक्षोपशोभितानि, बहुजनस्य विविधवेषस्योन्नतमानस्य भोजनार्थं यानं येष्विति व्युत्पत्त्या उज्जानिकास्थानानि, वनान्येकजातीयवृक्षाणि, वनखंडान्यनेकजातीयोत्तमवृक्षाणि श्मशानं पितृवनं, शून्यागारं, शून्यगृहं, गिरिकंदरा गुहाः, शांतिगृहाः शांतिकर्मस्थानानि, क्वचिच्च संधिति पाठः, तत्र संधिगृहं भित्त्योरंतराले प्रच्छन्नस्थानं, शैलगृहं पर्वतमुत्कीर्य यत्कृतं, उपस्थानगृहमास्थानमंडपस्ततः श्मशानादीनां द्वंद्वः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्वचिच्च ज्ञवणगिहेसु वा इत्यपि दृश्यते, तत्र ज्ञवनगृहाः कुटुंबिवसनस्थानानि तेषु, क्वचित्पुनः ' सिंघाम्रएसु वा ' इत्यस्मात्पूर्वं ' गामागरनगरखेम्रकवम्रमम्रंबदोणमुहपट्टणासमसंवाहसंनिवेसेसु ' इति दृश्यते. तत्र करादिगम्या ग्रामाः, आगरा लोहाद्युत्पत्तिनूमयः, नैतेषु करोऽस्तीति नकराणि, खेटानि धूलिप्राकारोपेतानि, कर्बटानि कुनगराणि, मम्रंबानि सर्वतोऽर्धयोजनात्परतोऽवस्थितग्रामाणि, द्रोणमुखानि यत्र जलस्थलपथावुभावपि स्तः. पत्तनानि येषु जलस्थलपथयोरन्यतरेण पर्याहारप्रवेशः, आश्रमास्तीर्थस्थानानि मुनिस्थानानि वा. संवाहाः समनूमौ कृषिं कृत्वा येषु दुर्गभूमिषु धान्यानि कृषीवलाः संवहंति रक्षार्थं. संनिवेशाः सार्थकटकादेस्ततो द्वंद्वस्तेषु. क्वचिच्च ' सन्निवेशघोसेसु ' इति पाठस्तत्र घोषा गोकुलानि, तेषु ' सन्निखित्ताइं ' सम्यग् निक्षिप्तानि. क्वचित् ' सन्निहियाइं गुत्ताइं चिठंति ' इति दृष्टं, तत्र सन्निहितानि सम्यग्निधानीकृतानि, गुप्तानि पिधानाद्यनेकोपायैस्तिष्ठंति. ' साहरत्ति ' प्रवेशयंति निःक्षेपयंतीति. ' हिरमोणमित्यादि ' हिरण्यं रूप्यं, अघटितसुवर्णमित्येके, सुवर्णं घटितं, धनं गणिमधरिममेयपरिछेद्यभेदाच्चतुर्धा. तथा चोक्तं—

गणिमंजाईफलपुप्फमाई । धरिमं तु कुंकुमगुम्राइ ॥ मेयं चोप्पम्रलोणाइ । रयणवत्थाइ प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रिद्धिज्जं ॥ १ ॥ धान्यं चतुर्विंशतिधा शाल्यादि, राज्यममात्यादिसमुदायात्मकं राष्ट्रं देशः, बलं चतुरंगं, वाहनं वेगसरादि, कोशो भांडागारः, कोष्ठागारं च धान्यगृहं, पुरं नगरं, अंतःपुरं प्रसिद्धं; जनपदो लोकः; क्वचित ' जसवाएणेति ' पाठः; तत्र यशोवादः साधुवादः. पुनः विपुलं धनं गवादि; कनकं घटिताघटितरूप्यं; निधिभेदमपि; रत्नानि कर्केतनादीनि; मणयश्चंद्रकांताद्याः, मौक्तिकानि शुक्तिकोशादिप्रभवानि, शंखा दक्षिणावर्त्ताः, शिला राजपट्टादिरूपाः, प्रवालानि विद्रूमाणि, रक्तरत्नानि, पद्मरागाः, आदिशब्दात् वस्त्रकंबलादिपरिग्रहः, ततस्तेन, एतेन किमुक्तं भवतीत्याह—सद्विद्यमानं न पुनरिंद्रजालादाविवावास्तवं सारस्वापतेयं, प्रधानद्रव्यं, तेन प्रीतिर्मानसिकी स्वेच्छा, सत्कारो वस्त्रादिभिर्जनकृतः, ततः समाहारद्वंद्वे तेन, ' गोन्नंत्ति ' गौणं गुणेभ्य आगतं, किमुक्तं भवतीत्याह—

गुणनिष्पन्नं, गौणशब्दोऽप्रधानेऽपि वर्त्तते इत्यत उक्तं गुणनिष्पन्नमिति, प्रशस्तं नामैव नामधेयं ' तएणमित्यादि ' मातुरनुकंपनार्थं, कृपया मातरि वानुकंपा भक्तिस्तदर्थं, मयि परिस्पंदमाने मा मातुः कष्टं भूयादिति, मातरि वा भक्तिरन्येषां विधेयतयोपदर्शिता भवत्विति निश्चलश्चलन-

For Private And Personal Use Only

क्रियाया अभावात्, निःस्पंदः किंचिच्चलनस्याऽप्यभावात्. अत एव च ' अल्लीणेत्यादि ' आ ईष-
ल्लीन आलीनोंगसंयमनात्, प्रकर्षेण लीनः प्रलीनः, उपांगसंयमनात्, अत एव गुप्तः परिस्पंदनाभा-
वात्, ततो विशेषणकर्मधारयः. वापीति समुच्चयार्थः. ' हडे इत्यादि ' हृतो मम स गर्भः केनचिद्दे-
वादिना, मृतः कालधर्मं प्राप्तः, च्युतः सजीवपुद्गलपिंडतालक्षणात् पर्यायात् परिभ्रष्टः, गलितो ऽद्रव-
तामापद्य क्षरितः, चतुर्ष्वपि पदेषु काक्वाविकल्पप्रतीतिः, एजति कंपते. उपहतमनःसंकल्पा, उप-
हतः कालुष्यकवलितो मनसि संकल्पो यस्याः सा तथा तां, चिंतया गर्भहरणादिध्यानेन यः शोकः
स एव सागरस्तत्र संप्रविष्टा, करतले पर्यस्तं निवेशितं मुखं यया सा तथा, आर्तध्यानोपगता म-
नोज्ञविषयविप्रयोगस्मृतिममत्वाहारं प्राप्ता, भूमिगतदृष्टिका भूमिसंमुखमेव किंकर्तव्यजडतया वीक्ष्य-
माणा ध्यायति. तदपि च सिद्धार्थराजभवनमुपरतं निवृत्तं, मृदंगतंत्रीतलतालैः प्राग्व्याख्यातैर्नाटकी-
यैर्नाटकहितैर्जनैः पात्रैः, ' मणुज्जत्ति ' भावप्रधानत्वान्निर्देशस्य मनोज्ञत्वं चारुता यस्मात्तत्तथा. अ-
थवा उपरतमृदंगतंत्रीतलतालनाटकीयजनं, तथा ' अणुज्जांति ' अनूर्जमनोजस्कं वा, अत एव दी-
नं विमनस्कं विहरत्यास्तेस्म. ' एगदेसेणंति ' अंगुल्यादिना, एतच्च यद्भगवता मातुरनुकंपायै कृत-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मपि तस्या अधृतितया पर्यणंसीत् तदागामिनि काले कालदोषाद्गुणोऽपि वैगुण्याय कल्प्यते इति सूचनार्थमिति पूज्याः.

'गब्भे चेवत्ति' पक्षाधिकमासषट्के व्यतिक्रांत इत्यर्थः. 'नाइसीएहिमित्यादि' शीतादिषु हि कानिचिद्वातिकानि पैत्तिकानि श्लेष्मकराणि वा स्युः, उक्तं च वाग्भटे—वातलैश्च भवेद्गर्भः । कुब्जांधजडवामनः ॥ पित्तलैः खलतिः पंगु—श्वित्री पांडुकफात्मभिः ॥ १ ॥ 'सवत्तुखयमाणेत्ति' ऋतौ यथायथं भज्यमानाः सेव्यमानाः सुखाः सुखहेतवो ये तैर्भोजनाच्छादनगंधमाल्यैः, तत्र भोजनमाहारग्रहणं, आच्छादनमावरणं, गंधाः पटवासादयः, माल्यानि पुष्पमालास्तैः. 'ववगएत्यादि' रोगा ज्वरादिकाः, शोक इष्टवियोगादिजनितः, मोहो मूर्छा, भयं भीतिमात्रं, परित्रासोऽकस्माद्भयं, परित्रासस्थाने परिश्रमो वा व्यायामः, हितं गर्भस्यैव मेधायुरादिवृद्धिकारणं, मितं परिमितं, नाधिकमूनं वा, पथ्यमारोग्यकारणत्वात्. किमुक्तं भवति? गर्भपोषणं देशे उचितप्रदेशे काले तथाविधावसरे 'विवित्तमउएहिंति विविक्तानि दोषवियुक्तानि, लोकांतरासंकीर्णानि वा, मृदुकानि च कोमलानि यानि तथा तैः, 'पइरिक्कत्ति' प्रतिरिक्तया तथाविधजनापेक्षया विजनयात

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एव सुखया शुभया वा मनोऽनुकूलया विहारभूम्या चंक्रमणासनादिभूम्या 'पसत्थेत्यादि' प्रशस्त-दोहदा अनिंद्यमनोरथा, संपूर्णदोहदाभिलाषपूरणात्, संमानितदोहदा प्राप्ताभिलषितस्य भोगात्, अविमानितदोहदाऽनवज्ञातदोहदा क्षणमपि नापूर्णमनोरथेत्यर्थः, अत एव व्यवच्छिन्नदोहदा त्रुटि-ताकांक्षा, दोहदव्यवच्छेदस्यैव प्रकर्षाभिधानायाह—व्यपनीतदोहदा, सुखंसुखेन गर्भानाबाधया 'आसइ' आश्रयति स्तंभादि, शेते निद्रया, तिष्ठत्यूर्ध्वं, निषीदत्यासने उपविशति, त्वग्वर्तयति निद्रां विना शय्यायां विहरति कुट्टिमे. 'उच्चठाणेत्यादि' ग्रहाणामुच्चस्थानान्येवं—

अजवृषमृगांगनाकर्कमीनवणिजांशकेऽश्विनाद्युच्चाः, दशशिख्यष्टाविंशतितिथींद्रियत्रिघनवंशे-ष्विति. सर्वग्रहाणामुच्चत्वमंशकाद्यपेक्ष्य घटनीयं. प्रथमे चंद्रयोगे प्रथमशब्दस्य प्रधानार्थत्वात्, चंद्र-योग चंद्रबलेऽर्थान्नृपादीनां, अथवा तदानीं सूर्यस्य मेषस्थितत्वाद्भगवतश्च मध्यरात्रे जन्मभावात्तदा च मकरलग्नस्य संभवात्, प्रथमायां चांद्र्यां होरायां 'समराशौ चंद्रतीक्ष्णांशोरिति वचनात्, अन्यथा वा सुधिया वृद्धोपदेशाद्भावनीयं. तथा सौम्यासु रजोवृष्ट्याद्यभावात्, शांतासु वितिमिरासु भगवज्जन्म-काले सार्वत्रिकोद्योतसद्भावाच्चंद्रज्योत्स्नया ध्वस्तध्वांतासु, विशुद्धासूल्कापाताद्यभावान्निर्मलासु, ज्यो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽस्त्येष्विति जयिकेषु जयदायिषु सर्वशकुनेषु काकोलपोतक्यादिषु. तथा प्रदक्षिणश्चासावनुकूलश्च प्रदक्षिणानुकूलस्तस्मिन्. भगवतः प्रदक्षिणवाहित्वादनुकूले भूमिसर्पिणि मृदुत्वात्, चंडवातो ह्युच्चैः सर्पति, अतो भूमिसर्पिणीत्युक्तं.

तादृशि मारुते प्रवाते वातुमारब्धे, निष्पन्नसर्वशस्या मेदिनी यत्र तादृशे काले ऋतौ, प्रमुदिताः सुभिक्षसौस्थ्यादिना, प्रक्रीडिताश्च वसंतोत्सवादिना क्रीडितुमारब्धाः, ततो विशेषणकर्मधारये प्रमुदितप्रक्रीडितेषु जनपदेषु लोकेषु सत्सु, बहुत्र ' उच्चठाणेत्यादि ' न दृश्यते. अरोगानाबाधा माता अरोगमनाबाधं दारकं प्रजाता सुषुवे. जनिः सोपसर्गत्वात् सकर्मकः.

' जं रयणिं ' यस्यां रात्रौ ' उवयंतेहिं उवयमाणेहिं वा ' अवपतद्भिरवतरद्भिः, ' उप्पयंतेहिं उप्पयमाणेहिं वा ' उत्पतद्भिरूर्ध्वं गच्छद्भिः ' उप्पिंजलमाणभूयत्ति ' उप्पिंजलो भृशमाकुलः स इवावतरतीत्याचारे क्विपि शतरि च शत्रानश इति प्राकृतलक्षणेन माणादेशे उप्पिंजलमाणेति सिद्धं, तद्भूता, भूतशब्दस्योपमार्थत्वात् उप्पिंजलंतीव उप्पिंजलायमानेव, ' कहकहत्ति ' अव्यक्तवर्णो नादस्तद्भूता हर्षाट्टहासादिना कहकहारवमयीव हुन्ना अभवत् सा रजनी. क्वचित् ' उप्पिं-

For Private And Personal Use Only

जलमालाभूया' इति पाठः, तत्र उत्पिंजलानां भृशाकुलानां देवादीनां माला श्रेणिस्तां भूता प्राप्तेति. क्वचिच्च 'उवयंतेहि य देवुज्जोए एगालोए लोए देवसन्निवाया उप्पिंजमाणभूया कहकहभूयायाविहोत्था' इति दृष्टं, तत्र 'होत्थत्ति' प्रत्येकं संबंधात देवोद्योतोऽभवत् एकालोकश्च उद्योताद्वैतभाक्, लोकश्चतुर्दशरज्ज्वात्मकः भुवनं वाभवत्. देवसन्निपाताश्चतुर्विधा देवनिकाया उत्पिंजलभूताः कहकहभूताश्चाप्यभवन्. 'हिरण्णवासमित्यादि' हिरण्यं रूप्यं, वर्षमल्पतरं, वृष्टिस्तु महती, माल्यं ग्रथितपुष्पाणि, गंधाः कोष्टपुटपाकाः, चूर्णा गंधद्रव्यसंबंधी, वर्णश्चंदनं, 'धन्नवासंवत्ति' पाठे धान्यवर्षाः. अत्रांतरे प्रियभासिताभिधा चेटी राजानं वर्धापयति. यथा 'पियट्ठयाए पियं निवेइमो पियं भे भवउ' इत्यादि क्वचिद् दृश्यते, तच्च बहुष्वादर्शेषु न दृष्टं, तस्या अपि वाचनाया उपरि कश्चिद्व्याचष्टे इति, तत्रापि किंचिद्विव्रीयते. 'पियट्ठयाए' प्रीत्यर्थं 'पियं निवेइमो' प्रियमिष्टं वस्तु पुत्रजन्मलक्षणं निवेदयामः 'पियं भे भवउ' एतच्च प्रियनिवेदनं प्रियं भवत्विति. तस्या दानं 'मउडवज्जंति' मुकुटस्य राजचिह्नत्वात् स्त्रीणां चानुचितत्वात्तस्येति तद्वर्जनं.

'जहामालियं' यथा धारितं, 'मलमल्लधारणे' इति, यथा परिहितमित्यर्थः. 'उमोयं' अ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देह- वमुच्यते परिधीयते यः सोऽवमोचकः, आभरणं तं ' मज्जए धोय ' अंगप्रतिचारिकाणां मस्तकानि
व्या० क्षालयति दासत्वापनयनार्थं, स्वामिना धौतमस्तकस्य हि दासत्वमपगच्छतीति लोकव्यवहारः. ' न-
७३ गरगुत्तिएत्ति ' पुरारक्षान्, चारकशोधनं बंदिमोचनं, मानं रसधान्यविषयं, उन्मानं तुलारूपं तयो-
र्वर्धनं. ' सब्भिंतरबाहिरियं ' इत्यादि, सहाभ्यंतरेण नगरमध्यभागेन, बाहिरिका नगरबहिर्भागो य-
त्र तत्तथा, क्रियाविशेषणं चेदं. आसिक्तं गंधोदकच्छटकदानात्, सन्मार्जितं कचवरशोधनात्, उप-
लिप्तं गोमयादिना, शृंगाटकादयः प्राग्वत्. ' पहेसुत्ति ' पंथा सामान्यमार्गः, तथा सिक्तानि जलेना-
त एव शुचीनि पवित्राणि संमृष्टानि कचवरापनयनेन समीकृतानि वा रथ्यांतराणि रथ्यामध्यानि,
आपणवीथयश्च हट्टमार्गा यस्मिंस्तत्तथा. तथा मंचा मालकाः प्रेक्षणकद्रष्टृजनोपवेशननिमित्तं, अ-
तिमंचास्तेषामप्युपरि ये तैः कलितं, तथा नानाविधरागैः कुसुंभादिभिर्भूषिता ये ध्वजाः सिंहगरुडा-
दिरूपकोपलक्षितबृहत्पट्टरूपाः, पताकाश्च तदितरास्ताभिर्मंडितं. तथा ' लाइयं ' छगणादिना भूमौ
लेपनं, उल्लोइयं सेटिकादिना कुड्यादिषु धवलनं, ताभ्यां महितं पूजितं, ते एव वा महितं पूजनं
यत्र तत्तथा. अन्ये तु लिप्तमुल्लोचितमुल्लोचयुक्तं महितं चेति व्याचक्षते. गोशीर्षस्य चंदनविशेषस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सरसस्य प्रत्यग्रस्य रक्तचंदनविशेषस्यैव दर्दरस्य दर्दराभिधाद्रिजातस्य श्रीखंडस्य गोशीर्षादिर्निर्वा द-त्ता न्यस्ताः पंचांगुलिमूला हस्तका यस्मिन् कुड्यादिषु तत्तथा. दर्दरेण चपेटारूपेण दत्तं पंचांगुलित-लमित्येके. अन्ये त्वाहुर्दर्दरं चीवरावनद्धं कुम्भिकादिभाजनमुख्यं तेन गालितेन गोशीर्षादिरसेनेति, तथौषधिना उपनिहिता गृहांतःकृतचतुष्केषु चंदनकलशा मंगलघटा यत्र तत्तथा, सुकृतास्तोरणानि च प्रतिद्वारं द्वारस्य द्वारस्य देशभागेषु यत्र तत्तथा. क्वचिद् घटस्थाने ' घणत्ति ' दृश्यते, तत्र चंद-ना चंदनमाला घनानि प्रभूतानि सुकृतानि तोरणानि च प्रतिद्वारं यत्रेति व्याख्येयं.

' उवचियचंदणघडसुकयतोरणपडिदुवारदेसभागंति ' क्वचित्पाठः, तत्रोपचिता निवेशिताश्चं-दनघटा मंगल्यकलशाः, सुष्टुकृततोरणानि च द्वारदेशभागं भागंप्रति यस्मिंस्तत्तथा. देशभागश्च दे-शा एव. तथा आसिक्तो भूमिलग्नः, उत्सक्तश्चोपरि लग्नो विपुलो विस्तीर्णो वृत्तो वर्तुलो ' वग्घा-रित्ति ' प्रलंबितः पुष्पगृहाकारो माल्यदाम्नां पुष्पमालानां कलापः समूहो यत्र तत्तथा. तथा पंच-वर्णाः सरसाः सुरभयो ये मुक्ताः करप्रेरिताः पुष्पपुंजास्तैर्य उपचारः पूजा भूमेस्तेन कलितं. का-लागुरु इत्यादि पूर्ववत. नटा नाटककर्तारः, नर्तका ये स्वयं नृत्यंति, अंकेल्ला इत्येके, जल्ला वरत्रा-

For Private And Personal Use Only

खेलकाः, राज्ञः स्तोत्रपाठका इत्यन्ये, मल्लाः प्रतीताः, मौष्टिका मल्ला एव ये मुष्टिभिः प्रहरंति, विडंबका विदूषकाः, वेलंबका वा ये समुखविकारमुत्प्लुत्योत्प्लुत्य नृत्यंति, कथकाः सरसकथावक्तारः, पठकाः सूक्तादीनां, क्वचित् पवग इति दृश्यते, तत्र प्लवका ये उत्प्लवंते गर्तादिकं झंपाभिर्लंघयंति, नद्यादिकं वा तरंति, लासका ये रासकान् ददति, जयशब्दप्रोक्तारो वा भंडा इत्यर्थः, आरक्षकास्तलारा आख्यायका वा ये शुभाशुभमाख्यांति. लंखा वंशाग्रखेलकाः, मंखाश्चित्रफलकहस्ता भिक्षाका गौरीपुत्रका इति प्रसिद्धाः. तूणइल्ला भस्त्रकवचिततूणाभिधानवाद्यविशेषवंतो वा, तुंबवीणिका वीणावादकाः, अथवा तुंबा किन्नरी आलपन्यादिवादकाः, वीणिका वीणावादिनः, अनेके ये तालावरास्तालादानेन प्रेक्षाकारिणस्तालान् कुट्टयंतो वा ये कथाः कथयंति, तैरनुचरितं सेवितं यत्तत्तथा. कुरुत स्वयं कारयत वान्यैः. ' सव्वारोहणं ' इत्यादि, समस्तांतःपुरैः पुष्पाणि अग्रथितानि, गंधा वासा वस्त्राणि दुकूलादीनि, माल्यानि ग्रथितानि पुष्पाणि, अलंकारो मुकुटादिरेतल्लक्षणा या विभूषा तया, सर्वाणि यानि त्रुटिकानि वादित्राणि तेषां यः शब्दो यश्च निनादः प्रतिशब्दः स तथा तेन ' सव्वतुडियसद्दसंनिनाएणंति ' पाठे तु सर्वतूर्याणां यः शब्दो ध्वनिर्यश्च संगतो निनादः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिरवस्तेन महत्या ऋद्ध्या युक्त इति गम्यं. युक्तिर्युतिर्द्युतिरिति यावत्, तत्र युक्तिरुचितेष्टवस्तुघटना, युतिर्मेला, द्युतिर्दीप्तिराभरणादीनां, बलेन सैन्येन, वाहनेन शिबिकावेसरादिना, समुदयेन संगताभ्युदयेन परिवारादिसमुदायेन वा तूर्याणां यमकसमकं युगपत्प्रवादितं ध्वनितं तेन, शंखः कंबुः, पणवो मृत्पटहः, भेरी ढक्का, झल्लरी चतुरंगुलनालिः, करटीसदृशी वलयाकारा उभयतो नद्धेत्यन्ये, खरमुखी काहला, हुरुक्का तिविलितुल्या, मुरजो मर्दलः, मृदंगो मृन्मयः, दुंदुभिर्देववाद्यं, एषां निर्घोषो महाध्वनिः, निनादितं च प्रतिशब्दस्तद्रूपो घोररवस्तेन. ' उस्सुकमित्यादि ' उच्छुल्कामुन्मुक्तशुल्कां स्थितिपतितां करोतीतिसंबंधः, शुल्कं विक्रेतव्यभांडंप्रति मंडपिकायां राजदेयं द्रव्यं, उत्करामुन्मुक्तकरां करोति, गवादीन्प्रति प्रतिवर्षं राजदेयं द्रव्यं, उत्कृष्टां, कर्षणं कृष्टं उन्मुक्तं कृष्टं यस्यां सोत्कृष्टा तां, लभ्येऽप्याकर्षणनिषेधात्.

अदेयां विक्रयनिषेधेन न केनापि कस्यापि देयमित्यर्थः. अमेयां क्रयविक्रयनिषेधादेवाविद्यमानोभयं, न राजाज्ञादायिनां भर्तृपुत्रादिपुरुषाणां प्रवेशः कुटुंबिगृहेषु यस्यां सा तथा तां. तथा दंडेन निर्वृत्तं दंडिमं, कुदंडेन निर्वृत्तं कुदंडिमं, राजदेयद्रव्यं तन्नास्ति यस्यां सा तथा तां. कुदं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



डिमंडिमां, तत्र दंडोऽपराधानुसारेण राजग्राह्यं द्रव्यं, कुदंमस्तु कारणिकानां प्रज्ञापराधान् महत्यप्य-
पराधिनोऽपराधे अल्पं राजग्राह्यं द्रव्यं. क्वचिद्दंमकुदंमिममिति पाठः, तत्र दंमलभ्यं द्रव्यं दंमः, शेष-
मुक्तवत्. अधरिम अविद्यमानं धरिम ऋणद्रव्यं यस्यां सा तथा तां. क्वचिद् अहरिममिति दृष्टं, तत्र
अहरिमां कस्यापि वस्तुनः केनाप्यहरणात्. क्वचिद् ' अधारिणिज्ज ' मित्यपि दृश्यते, तत्र अवि-
द्यमानो धारणीयोऽधमरणो यस्यां सा तथा तां, गणिकावरैर्विलासिनीप्रधानैर्नाटकीयैर्नाटकप्रतिबद्ध-
पात्रैः कलिता या सा तथा तां. क्वचित् ' अगणियवरनाडइज्जकलियमिति ' दृश्यते, तत्र अग-
णितैः प्रतिस्थानं भावादसंख्यातैर्वरैः श्रेष्ठैर्नाटकीयैः कलितामिति व्याख्येयं. अनेकताळाचरानुचरि-
तां, प्रेक्षाकारविशेषासेवितां, तथा अनुद्धूता आनुरूप्येण वादनार्थमुत्क्षिप्ता, अनुध्धूता वा वादना-
र्थमेव वादकैरत्यक्ता मृदंगा मर्दला यस्यां सा तथा तां. अम्लानानि माल्यदामानि पुष्पमाला य-
स्यां सा तथा तां. प्रमुदितो हृष्टः प्रक्रीडितश्च क्रीडितुमारब्धः सह पुरजनेन जानपदो जनपदलो-
को यस्यां सा तथा तां. ' पमुइयपक्कीलियाभिरामं ' इति क्वचित्पाठः, तत्र प्रमुदितैः प्रक्रीडितैश्च ज-
नैरभिरामं. वाचनांतरे ' विजयवेजइयंति ' दृश्यते, तत्र चातिशयेन विजयो विजयविजयः, स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोजनं यत्र सा विजयवैजयिकी तां. ' दसदिवसंति ' दशदिवसान् यावत्, स्थितौ कुलमर्यादायां, पतितांतरभूता या पुत्रजन्मोत्सवसंबंधिनी वर्धापनादिका प्रक्रिया सा स्थितिपतिता तां. ' दसाहियाए ' इत्यादि, दशाहिकायां दशदिवसप्रमाणायां ' सइएयत्ति ' शतिकान् शतपरिमाणान् साहस्रिकान् सहस्रपरिमाणान् शतसहस्रिकान् लक्षप्रमाणान् ' जाएयत्ति ' यागान् देवपूजाः, ' दाएयत्ति ' दायान् पर्वदिवसादौ दानादि. ' भाएयत्ति ' भागान् द्रव्यविभागान् मानितद्रव्यांशान् वा ' दलमाणेयत्ति ' ददत ' देवावेमाणेयत्ति ' दापयन् ' लंभे पडिछमाणेयत्ति ' लाभान् प्रतीछन् गृह्णन् ' पडिछवेमाणेयत्ति ' प्रतिग्राहयन् ' विहरइत्ति ' विहरत्यास्ते. ' अम्मापियरो ' इत्यादि, मातापितरौ प्रथमदिवसे स्थितिपतितं कुलक्रमांतर्भूतं पुत्रजन्मोचितमनुष्ठानं कारयतःस्म. तृतीये दिवसे चंद्रसूर्यदर्शनिकामुत्सवविशेषं, यत्राद्यकल्पे शिशोर्दर्पणदर्शनं कार्यते, जागरयतः षष्ठीजागरणं, क्वचिद् ' धम्मजागरियंति ' दृश्यते, तत्र धर्मेण कुलधर्मेण लोकधर्मेण वा षष्ठ्यां रात्रिजागरणं धर्मजागरिका तां ' निव्वत्तिएत्ति ' निर्वर्तिते कृते अशुचीनामशौचवतां जन्मकर्मणां प्रसवव्यापाराणां नालछेदननिखननादीनां यत्करणं तत्तथा, तत्र ' बारसाहदिवसेत्ति ' द्वादशाख्यदिवसे, अथवा द्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीसंदेहविषौषधीनामकल्पसूत्रव्याख्या ॥

छपावी प्रसिद्ध करनार

पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत—२४३९. विक्रमसंवत—१९६९. सने—१९१३.

किं रु.—२—४—०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

☞ जामनगर श्रीजैनभास्करोदयछापखानामां छाप्युं.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशानामह्नां समाहारो द्वादशाहं तस्य दिवसो येन द्वादशाहः पूर्यते तत्र ' उवक्खडाविंतित्ति ' उपस्कारयतः, रसवतीं निष्पादयतः.

' मित्तनाइ ' इत्यादि, मित्राणि सुहृदः, ज्ञातयः सजातीयाः, मातापितृभ्रात्रादयः, निजकाः स्वकीयाः पुत्रादयः, स्वजनाः पितृव्यादयः, संबंधिनः श्वशुरपुत्रश्वशुरादयः, परिजनो दासीदासादिः ' नायखत्तिया ' ज्ञातक्षत्रा ऋषभस्वामिवंशोत्पन्नाः क्षत्रिया इत्यादि. ' आसाएमाणा ' इत्यादि, आ ईषत्स्वादयंतौ बहु च त्यजंतौ इक्षुखंडादेरिव, विशेषेणाधिक्येन स्वादयंतावल्पमेव त्यजंतौ खर्जूरादेरिव, परिभुंजमानाः सामस्त्येनोपभुंजानावल्पमप्यत्यजंतौ भोज्यं परिभोजयंतावन्येन्यो यच्छंतौ स्वाद्यविशेषं पूर्वोक्तैः स्वजनादिभिः सह मातापितराविति प्रक्रमः. ' जिमियत्ति ' जिमितौ भुक्तवंतौ ' भुत्तुत्तरागयत्ति ' भुक्तोत्तरं भोजनानंतरकालं आगतावुपवेशनस्थाने इति गम्यते ' समाणत्ति ' संतौ, किंभूतावित्याह—आचांतौ शुद्धोदकेन शुद्धोदकयोगेन कृतशौचौ चोक्षौ लेपसिक्थाद्यपनयनेन, अत एव परमशुचिभूतावत्यर्थं शुचीभूताविति. पुष्पवस्त्रगंधमाल्यालंकारसत्कारसन्मानव्याख्या प्राग्वत्. ' एवं वयासित्ति ' एवमवादिष्टां ' एवमाहिज्जंतित्ति ' एवमाख्यायंतेऽधीयंते वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'सहसंमुइयाएत्ति' संमुदिता रागद्वेषाभावः 'सहत्ति' सहभाविनी संमुदिता सहसंमुदिता, यच्चूर्णिः—'संमुई रागदोसरहियया' श्रमण इति नाम श्राम्यतीति श्रमणस्तपोनिधिः, श्रमू च खेदतपसोरिति वचनात्, भयमकस्माद्भैरवसिंहादिभयं, तयोर्विषयेऽचलो निःप्रकंपस्तदगोचरत्वात्, परीषहोपसर्गाणां क्षुत्पिपासादिदिव्यादिभेदाद् द्वाविंशतिषोडशविधानां क्षांतिक्षमः क्षांत्या क्षमते तत्वसमर्थतया यः स क्षांतिक्षमः. प्रतिमानां भद्रादीनामेकरात्रिक्यादीनां वा तत्तदभिग्रहविशेषाणां वा पालकः पारगो वा, धीमान् ज्ञानचतुष्टयवान्, अरतिरतिसहः अरतिरत्योः सहः समर्थः, तन्निग्रहात 'दविएत्ति' द्रव्यं तत्तद्गुणभाजनं, द्रव्यं च भव्ये इति शब्दप्राभृतवचनात्, रागद्वेषरहित इति वृद्धाः. वीर्यसंपन्नस्तस्य सिद्धिगमनेऽपि निश्चितेऽपि तपश्चरणादौ प्रवर्तनात, अतो महावीर इति नाम देवैः कृतं. 'भगिणी सुदंसणत्ति' जमालेर्माता, 'धूयत्ति' तस्यैव भार्या 'नत्तुईत्ति' दौहित्री 'दक्ख' इत्यादि, दक्षः कलासु, दक्षा प्रतिज्ञातसिद्धिपारगामितया पट्वी प्रतिज्ञा यस्य स तथा, प्रतिरूपस्तत्तद्गुणसंक्रमणदर्पणत्वात् विशिष्टरूपो वा, आलीनः सर्वगुणैराश्लिष्टो गुप्तेंद्रियो वा, भद्रकः सरलः, भद्रग इति वा भद्रवद् वृषभवद्गच्छति भद्रदो वा सर्वदायित्वात्. विनीतो विनयवान्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुशिक्षितो वा जितेंद्रियो वा, विनयो हींद्रियजय इति वचनात्. एतानि च विशेषणानि भोगावस्थां वर्षद्वयं भावयतिदशां च प्रतीत्य यथासंभवं योज्यानि. तथा ज्ञातः प्रख्यातो ज्ञातो वा ज्ञातवंश्यत्वात्, अत एवाह—

नायपुत्ते ज्ञातपुत्रः, ज्ञातः सिद्धार्थनृपस्तस्य पुत्रो ज्ञातपुत्रः, न च पुत्रमात्रेणैव काचित्सिद्धिरित्याह—ज्ञातकुलचंद्रः 'विदेहे' इति विशिष्टदेहः, वज्रऋषभनाराचसंहननसमचतुरस्रसंस्थानोपेतत्वात्, अथवा 'दिहीं उपलेपे' विगतो देहोऽस्मादिति विदेहो निर्लेपः, भोगेष्वपि यत्र तत्र रतिनामकवैराग्यभावात्. 'विदेहदिन्नत्ति' विदेहदिन्ना, त्रिसलादेवी तस्या अपत्यं वैदेहदत्ता त्रिशला तस्या एवौरसपुत्रत्वख्यापनार्थं विशेषणमाह—विदेहजार्चा विदेहा, भीमो भीमसेन इति न्यायाद्विदेहदिन्ना त्रिशला तस्यां जातः, विदेहजार्चा शरीरं यस्यासौ विदेहजार्चः. अथवा विदेहो विगतो देहोऽनंग इत्यर्थः, स यात्यः पीडयितव्यो यस्यासौ विदेहजात्यः. तथा विदेहस्तमात्रे, विशेषेण दिह्यते, लिप्यते तत्तत्परिग्रहारंभसंभूतैः पापपंकैर्लिप्यते जीवोऽस्मिन्निति विदेहो गृहवासः, तत्रैव सुकुमारः शब्दादिविषयसुखलालितः, न पुनर्व्रतावस्थायां, तत्रेतरदुर्विषहपरीषहकालरक्ताभिघा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तानुपसर्गसहने वज्रकर्कशत्वात्, त्रिंशतं वर्षाणि विदेहे गृहवासे कृत्वा स्थित्वा, एतेषां च पदानां क्वापि वृत्तिर्न दृष्टा, अतो वृद्धाम्नायादन्यथापि भावनीयानि.

मातापित्रोर्देवत्वं गतयोः ' गुरुमहत्तरेहिंति ' गुरुणा ज्येष्ठभ्रात्रा नंदिवर्धनेन महत्तरकैश्च राज्यप्रधानैरभ्यनुज्ञातः प्रव्रज्यार्थं दत्तानुमतिः स हि भगवानष्टाविंशतिवर्षांते श्रीसिद्धार्थराजत्रिशलादेव्योर्माहेंद्रकल्पमाचारांगाभिप्रायेण त्वनयोः श्रीपार्श्वनाथोपासकयोरनशनं कृत्वाऽच्युतकल्पमुपगतयोर्नंदिवर्धनमनुज्ञापितवान्, यदार्य पूर्णो ममाभिग्रहस्ततः प्रव्रजामीति, ततस्तेनोक्तं बंधो क्षते क्षारं मा क्षेप्सीः, मातापितृविरहार्तस्य मम दुस्सहस्त्वद्विरह इति स्थीयतां वर्षद्वयं, त्वद्दर्शनेनानुगृह्यतामयं जनः, इति तदुपरोधाद्वस्त्रालंकारभास्वरशरीरोऽपि निरवद्यवृत्तिर्भावमुनीभूय वर्षद्वयं गृहे तस्थिवान्. ततः प्रथमे वर्षे ततो लोकांतिका देवा ब्रह्मलोकवास्तव्या आगत्य भगवंतं स्वयंबुद्धमपि कल्प इति कृत्वा दीक्षायै बोधयंतिस्मेति. ततो गुरुमहत्तरकाननुज्ञाप्य सांवत्सरिकं महादानं दत्वा प्राव्राजीद्भगवान्, अत उक्तं गुरुमहत्तरकैरभ्यनुज्ञातः, यतः समाप्तप्रतिज्ञः. ' नाहं समणो होहं अम्मापियरंमि जीवंते ' इति गर्भावस्थागृहीताभिग्रहस्य वर्षद्वयावस्थानाभिग्रहस्य च पारगमनात्, पु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देह- व्या० ९३

नरपीति विशेषद्योतने, एकं तावत्स्वयमेव समाप्तप्रतिज्ञो विशेषतश्च लौकांतिकैर्देवैर्बोधित इति ग म्यते, तृतीयाया अन्यथानुपपत्तेः, लोकांते भवा लौकांतिका ब्रह्मलोकवास्तव्याः सारस्वतादयः, ए- कांतसम्यग्दृष्टयो देवविशेषाः, न च भगवांस्तदुपदेशमपेक्षते स्वयंबुद्धत्वात्, किंतु तेषामयमाचार इत्येतदेवाह—' जीयकप्पिएहिंति ' जीतमवश्याचरणीयं कल्पितं कृतं यैस्ते जीतकल्पितास्तैः, जी- तेन वावश्यंभावेन कल्प इतिकर्तव्यता जीतकल्पः, स एषामस्तीति जीतकल्पिकास्तैः, ' ताहिं ' इत्यादिविभक्तिव्यत्ययात्ते लौकांतिका देवास्ताभिरिष्टादिविशेषणोपेताभिर्वाग्भिर्गीर्भिरनवरतं भगवं- तमभिनंदयंतः समृद्धिमंतमाचक्षाणा अभिष्टुवंतश्च गुणकीर्तनया एवमवादिषुर्व्यजिज्ञपन्. इष्टादी- नां व्याख्या प्राग्वत्, न वरं गंभीराभिर्महाध्वनिभिरपुनरुक्ताभिरिति व्यक्तं. क्वचित् ' मियमहुरगं- भीरगाहिया ' इति पाठः, तत्र दुरवधार्यमप्यर्थं श्रोतॄन् ग्राहयंति यास्ता ग्राहिकास्ततः पदचतुष्टयस्य कर्मधारये ताभिः. ' अठसइयाहिं ' इति क्वचिद् दृश्यते तत्रार्थशतानि यासु संति ता अर्थशति- कास्ताभिः, अथवा ' सइयत्ति ' बहुफलत्वं, अर्थतः ' सइयाउ अठसइयाउ ताहिं जयजयेत्यादि ' जयजयेति संभ्रमे द्विर्वचनं, जय जय त्वं जयं लभस्व? नंदति समृद्धो भवतीति नंदस्तस्यामंत्रण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिदमिह च दीर्घत्वं प्राकृतत्वात्. अथवा जय त्वं जगन्नंद भुवनसमृद्धिकारक, जयजय भद्दा प्राग्व-त्, न वरं भद्रः कल्याणवान् कल्याणकारी वा, भद्रं ते भवत्विति शेषः. 'हियसुहनिस्सेयसकरंति' हितं पथ्यान्नवत्, सुखं शर्म शुभं वा कल्याणं निःश्रेयसं मोक्षस्तत्करं, धर्मतीर्थं धर्मप्रधानं प्रवचनं तीर्थांतरीयतीर्थव्यवच्छेदार्थं धर्मतीर्थमित्युक्तं. केषां हितसुखनिःश्रेयसकरं भविष्यतीत्याह—

सर्वलोकसर्वजीवानां सर्वस्मिन् लोके ये सर्वे जीवाः सूक्ष्मबादरादिभेदभिन्नास्तेषां रक्षोपदेशा-दिना हितादित्वात्. 'पुव्विंपिणं' इत्यादि, मानुष्यकान्मानुष्योचितादु गृहस्थधर्मोद्विवाहादेः पूर्वम-पि भगवतोऽनुत्तरं 'नेरइयादेवतित्थंकरा य ओहिस्स बाहिरा हुंति पासिंति सव्वओ खलु सेसा देसे-ण पासंति' सर्वोत्कृष्टं आभोगिकं आभोगप्रयोजनमप्रतिपात्यनिवर्त्तकं आकेवलोत्पत्तेर्ज्ञानदर्शनं अवधिज्ञानमवधिदर्शनं चासीत्. तच्च परमावधेः किंचिन्न्यूनं. 'आहोहिए' इति क्वचित्पाठः, त-त्राधोऽवधिरधः परिच्छेदबहुलोऽप्यंतरावधिरित्यर्थः. तथा च चूर्णिः—'अहोहियत्ति' अभिंतरोऽवधिः अत एवोक्तं 'नेरए' इत्यादि, अत्र हि 'अबाहिरत्ति' अभ्यंतरावधयो आख्याताः. 'तएणं' इत्यादि, 'आभाएइ' विलोकयति, हिरण्यादिव्याख्या प्राग्वत्. 'चिच्चा' त्यक्त्वा, तथा तथा त्रिव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्ज्यं विशेषेण त्यक्त्वा, निष्क्रमणमहिमकरणतो विच्छर्दवद्दा कृत्वा, विच्छर्दो विस्तारः, तथा तदेव गुप्तं सद्विगोप्य प्रकाशीकृत्य दानातिशयात्, अथवा गुपि गोपनकुत्सनयोः ततो विगोप्य कुत्सनीयमेतदस्थिरत्वात्, इत्युक्त्वा दीयत इति दानं धनं. 'दायारेहिंति' दायाय दानार्थमाकृत्रंति 'पज्जत्तिवावि' दायारा याचकास्तेभ्यो दानार्हेभ्यः परिभाज्य परिभाव्य वा आलोच्य एतेभ्य इदमिदं दातव्यमिति.

अथवा दातृभिः स्वनियुक्तपूरुषैर्दानं परिभाज्य दापयित्वा, तथा दायो भागोऽस्त्येतेषां ते दायिका गोत्रिकास्तेभ्यो दानं धनविभागं परिभाज्य विभागशो दत्वा. 'पाइणगामिणीए' पूर्वदिग्गामिन्यां छायायां 'पोरिसीए' पाश्चात्यपौरुष्यां प्रमाणप्राप्तायां कोटिप्राप्तायामभिनिर्वृत्तायां जातायां सुव्रताख्ये दिवसे विजयाख्ये मुहूर्त्ते चंद्रप्रभायां शिबिकायामारूढमिति गम्यं. तन्मानं त्वेवं—

पंचासइ आयामा । धणूणिविच्छिन्ना पणवीसं ॥ छत्तीसयमुव्विद्धा । सीआ चंदप्पहा भणिआ ॥१॥

सदेवमनुजासुरया स्वर्गमर्त्यपातालवासिन्या परिषदा जनसमुदायेन समनुगम्यमानमनुव्रज्यमानं भगवंतमग्रे वाग्रतश्च शंखिकाद्यैः परिवृतं ताभिरिष्टादिविशेषणोपेताभिर्वाग्भिरभिनंदंतोऽभिष्टुवंतश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रक्रमाकुलमहत्तरादिस्वजना एवमवादिषुः. तत्र शंखिकाश्चंदनगर्भहस्ता मंगलकारिणः शंखवादका वा, चाक्रिकाश्चक्रप्रहरणाः कुंभकारतैलिकादयो वा, लांगलिका गलावलंबितसुवर्णादिमयलांगलाकारधारिणो नटविशेषाः कर्षका वा, मुखमंगलिका मुखे मंगलं येषां ते तथा चाटुकारिण इत्यर्थः, वर्धमानाः स्कंधारोपितपुरुषाः, ' पूसमाणत्ति ' पुष्यमाणांतिका मागधा मान्या वा, घंटया रनंतीति घांटिकाः, राउलिआ इति रूढास्तेषां गणास्तैः.

क्वचित् ' खंडियगणेहिंति ' पाठः, तत्र खंडिकगणाश्छात्रसमुदायास्तैः, किमवादिषुरित्याह— जयजयेत्यादि प्राग्वत्. न वरं अग्नमैर्निरतिचारैर्ज्ञानदर्शनचारित्रैरुपलक्षितस्त्वं अजितान्यजेयानि वा जय वशीकुरु इंडियाणि श्रोत्रादीनि, जितं च सात्म्यपापन्नं पालय श्रमणधर्मं क्षांत्यादिदशलक्षणं, निर्विघ्नोऽपि च त्वं हे देव वस निवस सिद्धिमध्ये. अपि चेति समुच्चये. अत्र सिद्धिशब्देन श्रमणधर्मस्य वशीकारः, तस्य मध्यं लक्षणया प्रकर्षस्तत्र त्वं निरंतरायं तिष्टेत्यर्थः. अत एव रागद्वेषौ मल्लौ निजहि निग्रहाण तपसा बाह्याभ्यंतरेण साधकतमेन. तथा धृतौ संतोषे धैर्ये वा धणियमत्यर्थं बद्धकक्षः सन् मर्दय अष्टकर्मशत्रून्. केन कृत्वा? ध्यानेन, तत्रापि आर्त्तरौद्रनिषेधार्थमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'उत्तमेणंति' उत्तमसा तमोऽतीतेन, तत्रापि कर्मशत्रुमर्दने प्रधानसाधनं शुक्लध्यानमेवेत्याह—शुक्लेन शुक्लाख्येन अप्रमत्तः प्रमादरहितः सन् 'हराहित्ति' गृहाण वाराधनापताकां, वीरेति भगवदामंत्रणमंककारवाचकं, त्रैलोक्यरंगमध्ये त्रिभुवनमल्लाक्षवाटकांतरे प्राप्नुहि च वितिमिरमनुत्तरं केवलं वरं ज्ञानं, गच्छ च मोक्षं परं पदं जिनवरोपदिष्टेन ऋषभादिजिनेंद्रोक्तेन मार्गेण रत्नत्रयलक्षणेन प्रशांतवाहितात्मकेन वाऽकुटिलेन कषायविषयपरिहारात्, अक्षेपेण मोक्षप्रापकत्वाच्च सरलेन, हत्वा परीषहचमूं जय क्षत्रियवरवृषभ, जात्यक्षत्रियो हि परचमूं हंति, दिवसाः प्रहराष्टकात्मका अहोरात्रा इत्यर्थः, पक्षाः पंचदशतिथ्यात्मकाः, मासा द्विपक्षात्मकाः, ऋतवो हेमंताद्या द्विमासात्मकाः, अयनान्युत्तरायणदक्षिणायनरूपाणि षण्मासात्मकानि, संवत्सराणि द्वादशमासात्मकानि, अभीतः परीषहोपसर्गेभ्यो भयभैरवाणां भैरवभयानां क्षांतिक्षमः क्षांत्या क्षमो न त्वसामर्थ्यादिना स क्षांतिक्षमः. क्वचित् 'अभिभवियगामकंटगे' इत्यपि दृश्यते, तत्र ग्रामकंटकान् इंद्रियग्रामप्रतिकूलान् कुवाक्यजल्पतपरादीनभिभूयापकर्ण्य धर्मे प्रस्तुते संयमे ते तवाविघ्नं निर्विघ्नता भवतु. 'इति कट्टु' इत्युक्त्वार्य जयजयशब्दं प्रयुंजते स्वजना एव. 'तएणं' इत्यादि, नयनमालाः श्रेणिस्थि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तजननेत्रपंक्तयस्तासां सहस्रैः, एवमग्रेऽपि 'वयणत्ति' वचनानि वदनानि वा 'अभिथुव्वमाणे' अभिष्टुयमानः हृदयमालासहस्रैर्जनमनःसमूहैरुन्नंद्यमान उत्प्राबल्येन समृद्धिमुपनीयमानो जयजीवनंदेत्यादि पर्यालोचनादिति भावः.

क्वचित् 'उन्नइज्जमाणे' इति पाठः, तत्रोन्नतिं क्रियमाण उन्नतिं प्राप्यमाणः 'विछिप्पमाणेत्ति' मनोरथमालासहस्रैरेतस्याज्ञाविधायिनो भवाम इत्यादिभिर्जनविकल्पैर्विशेषेण स्पृश्यमानः, कांतिरूपगुणैर्हेतुभूतैः प्रार्थ्यमानो भर्तृतया स्वामितया वा जनेनाभिलष्यमानः. 'दाइज्जमाणेत्ति' दर्श्यमानः 'पडिच्छमाणे' प्रतीछन् गृह्णन् 'समइच्छमाणे' समतिक्रामन् उल्लंघयन्. 'तंतीतलेत्यादि' तंत्र्यादीनां त्रुटिकांतानां प्रागुक्तार्थानां, गीते गीतमध्ये यद्वादितं वादनं तेन यो रवः शब्दस्तेन मधुरेण श्रोत्रमधुरवर्षिणा मनोहरेण मनोभिरामेण जयशब्दघोषमिश्रितेन जयशब्दोच्चारणमिश्रितेन मंजुमंजुना न ज्ञायते कोऽपि किमपि जल्पतीति, अतिकोमलेन वा घोषेण च लोकानां स्वरेण प्रतिबुध्यमानः सावधानीभवन्. क्वचित् 'आपडिपुछमाणेति' पाठः, तत्र आप्रतिप्रछन् प्रश्नयन् प्रणमतां सुखादिवार्त्तां. 'सव्विड्ढीएत्यादि' सर्वर्ध्या समस्तछत्रादिराजचिन्हरूपतया स-

For Private And Personal Use Only

संदेह- र्वद्युत्या आभरणादिसंबंधिन्या सर्वद्युत्या वा चितेष्टवस्तुघटनालक्षणया सर्वबलेन हस्त्यश्वादीनां कटके-
व्या० न सर्ववाहनेन करभवेसरशिबिकायानयुग्यगिल्लिथिल्लिस्यंदनानिकसंग्रामिकपारियानिकादिना सर्वस-
मुदयेन पौरादिमेलकेन सर्वादरेण सर्वौचित्यकृत्यकरणरूपेण सर्वविभूत्या सर्वसंपदा सर्वविभूषया
९९ समस्तशोभया सर्वसंभ्रमेण प्रमोदकृतौत्सुक्येन सर्वसंगमेन सर्वस्वजनमेलापकेन सर्वप्रकृतिभिरष्टाद-
शनैगमादिनगरवास्तव्यप्रकृतिभिः, सर्वनाटकैरित्यादि सुगमं. सर्वतूर्यशब्दानां मीलने यः संततो नि-
नादो महाघोषस्तेन, अल्पेष्वपि ऋद्ध्यादिषु सर्वशब्दप्रवृत्तिर्दृष्टा, इत्यत आह—

' महया इड्ढीए ' दत्यादि प्राग्वत. ' सीयं ठावेइत्ति ' शिबिकां कूटाकाराछादितमंडपविशेषां स्थिरीकारयति. ' पच्चोरुहइ ' प्रत्यवरोहति अवतरतीत्यर्थः. ' मुंडे भवित्ता ' इत्यादि, मुंडो भूत्वा द्रव्यतः शिरःकूर्चलुंचनेन, भावतः क्रोधाद्यपनयनेनागाराद् गृहान्निष्क्रम्येति शेषः, अनगारतां साधुतां प्रव्रजितो गतः, विभक्तिपरिणामादनगारितया प्रव्रजितः श्रमणीभूतः. ' पंचमुट्ठियंति ' एकया मुष्ट्या कूर्चस्य लोचं, चतसृभिश्च शिरसः. ' देवदूसंति ' इंद्रेण वामस्कंधेऽर्पितं दिव्यवस्त्रविशेषं, एको रागद्वेषसहायविरहात् अद्वितीय एकाक्येव, न पुनर्यथा ऋषभश्चतुःसाहस्या राज्ञां, मल्लि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पार्श्वौ त्रिभिस्त्रिभिः शतैः, वासुपूज्यः षट्शतैः, शेषाः सहस्रेणेति. ' तेण परं ' इत्यादि. ततः परं साधिकमासान्वितसंवत्सरादूर्ध्वं दक्षिणवाचालासन्नसुवर्णवालुकानदीपुलिनवर्त्तितरुकंटके विलग्ने देवदूष्यार्धे पतिते भगवान् सिंहावलोकितेन तदद्राक्षीत्, ममत्वेनेत्येके, स्थंडिले पतितमस्थंडिले वेत्यन्ये, सहसाकारेणेत्यन्ये, शिष्याणां भाविनां वस्त्रपात्रं सुलभं भावि न वेति केचित्, कंटकलग्नं दृष्ट्वा वृद्धवादेन तु स्वभाविसंततेः कषायबाहुल्यात कंटकप्रायतामाकलय्य निर्ममतया पुनर्न जग्राह, तदर्धं हि दीक्षाप्रतिपत्त्यनंतरमतियाचमानाय पितृमित्राय द्विजायानुकंपया स्फाटयित्वा स्वामी ददौ, तत्र च तेन गृहमागत्य तुन्नकायार्पितं, तेन च द्वितीयमप्यर्धमाहर यथा सुप्रतिसंधानं स्यादित्युक्ते त्रपया पुनर्मार्गयितुमशक्नुवन् स द्विजो भगवतः पृष्ठलग्नो वर्षं यावदभ्राम्यत्, ततः शेषार्धे कंटकलग्ने प्रभुणा भूयोऽप्यगृहीते तेन च गृहीतेऽचेलकोऽजनि भगवान् यावज्जीवं. ' पाणिपडिग्गहियत्ति ' पाणिपतद्ग्रहिकः पाणिपात्रः स्वामी हि साचरणधर्मव्यवस्थापनार्थं, यथा देवदूष्यं परिग्रहं कृतवान् तथा प्रथमपारणकं सपात्रधर्मप्रज्ञापनार्थं पात्र एव कृतवांस्ततः परं पाणिपात्र इत्याम्नायः.

' वोसट्ठकाए ' व्युत्सृष्टकायः परिकर्मवर्जनात् त्यक्तदेहः परिषहादिसहनात् ' सम्मं सहइ '

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादि, सम्यक्सहते भयाभावेन, क्षमते क्रोधाभावेन, तितिक्षते दैन्यानवलंबनेन, अध्यासयति अविचलितकायतया, ' इरियासमिए ' इत्यादि, ईर्यायां गमनागमनादौ समितः सम्यक्प्रवृत्तः, एषणायां द्विचत्वारिंशद्दोषविशुद्धभिक्षाग्रहणे समितः, आदाने ग्रहणे उपकरणस्येति गम्यते, भांडमात्राया वस्त्राद्युपकरणरूपपरिच्छदस्य भांडमात्रस्य चोपकरणस्यैव, अथवा भांडस्य वस्त्रादेर्मृन्मयभाजनस्य वा मात्रस्य च पात्रविशेषस्य निःक्षेपणायां विमोचने यः समितः सुप्रत्युपेक्षितादिक्रमेण सम्यक्प्रवृत्तः स तथा, उच्चारः पुरिषं, प्रश्रवणं मूत्रं, खेलो निष्ठीवनं, सिंघानो नासिकामलः, जल्लः शरीरमलः, तेषां परिष्ठापना परित्यागः, तत्र समितः शुद्धस्थंडिलाश्रयणात्. एतच्चांत्यसमितिद्वयं भगवतो भांडसिंघानाद्यसंभवेऽपि नामाखंडितार्थमित्थमुक्तं. ' मणसमिए ' इत्यादि, मनःप्रभृतीनां कुशलानां प्रवर्त्तक इत्यर्थः, चित्तादीनामशुभानां निषेधकः, यतः समितिः सत्प्रवृत्तिर्गुप्तिस्तु निरोध इति.

अत एव गुप्तिगुप्तः सर्वथा गुप्तत्वात्. ' गुत्तिंदियबंभयारित्ति ' गुप्तानींद्रियाणि शब्दादिषु रागद्वेषाभावात् श्रोत्रादीनि, ब्रह्म च मैथुनविरतिरूपं वसत्यादिनवगुप्तिमच्चरत्यासेवते इत्येवंशीलो यः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स तथा, क्वचित ' गुत्तिंदिए ' शब्दादिषु रागादिरहितः ' गुत्तबंभयारित्ति ' गुप्तं वसत्यादिगुप्तिब्रह्म चरतीत्येवं शीलः स तथा, ' अकोहे ' इत्यादिप्रतीतानि, अत एव ' संतेत्ति ' शांतोंतर्वृत्त्या, प्रशांतो बहिर्वृत्त्या, उपशांत उन्नयतः, अथवा मनःप्रभृत्यपेक्षया शांतादीनि पदानि. अन्ये त्वाहुः–शांत उपशमी, प्रशांत इंद्रियनोइंद्रियैः, उपशांतः क्रोधाद्यकरणेन, अथवा श्रांतो जवभ्रमणात्, प्रशांतः प्रकृष्टचित्तत्वात्, उपशांतो निवृत्तः पापेभ्यः, प्रशमप्रकर्षाय चैकार्थं पदत्रयमिदं, अत एव परिनिर्वृत्तः सकलसंतापवर्जितः, अनाश्रवोऽविद्यमानपापकर्मबंधो हिंसादिनिवृत्तेः, अमम आत्मिष्वगिकममेतिशब्दवर्जितः, अकिंचनो निर्द्रव्यः, छिन्नग्रंथो मुक्तहिरण्यादिग्रंथः. क्वचित् ' छिन्नसोएत्ति ' पाठस्तत्र छिन्नशोकः, छिन्नश्रोत्रो वा छिन्नसंसारप्रवाह इत्यर्थः. निरुपलेपो द्रव्यभावमलरहितः, तत्र द्रव्यतो निर्मलदेहत्वात्, भावतो निरुपलेपस्तु मिथ्यादर्शनाविरत्यादिकर्मबंधहेतुवर्जितो वा. अथ निरुपलेपतामेवोपमानैराह—कांस्यपात्रीव मुक्तं त्यक्तं तोयमिव तोयं बंधहेतुत्वात् स्नेहो येन स तथा. शंख इव निरंजनो रंजनं रंगणं वा रागाद्युपरंजनं तस्मान्निर्गतो जीव इवाप्रतिहत इति, सर्वत्रौचित्येनास्खलितविहारित्वात्, संयमे वाप्रतिहतवृत्तिः. गगनमिव निरालंबनो देशग्रामकुलनगरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिनिश्रारहितत्वात्. वायुरिवाप्रतिबद्धः क्षेत्रादौ प्रतिबंधाभावेनौचित्येन सततविहारित्वात्. ' गामे एगराइयं ' इत्यादिवचनात्.

शारदसलिलमिव विशुद्धहृदयः कालुष्याभावात्, पुष्करं पद्मं तस्य पत्रमिव निरुपलेपं, पंकजलकल्पस्वजनविषयस्नेहरहितत्वात्, कूर्म इव कच्छप इव गुप्तेंद्रियः, स हि कदाचिद् ग्रीवापादचतुष्टयलक्षणांगपंचकेन गुप्तो भवति, एवं भगवानपींद्रियपंचकेनेति. खड्गो गंडकस्तस्य विषाणं शृंगं तदेकमेव भवति तद्वदेको जातः, एकभूतो रागादिसहायवैकल्यात्, विहग इव विप्रमुक्तो मुक्तपरिकरत्वादनियतवासाच्च, भारंडपक्षीवाप्रमत्तो निद्राद्यभावात्, भारंडपक्षिणोः किलैकं शरीरं पृथग्ग्रीवं त्रिपादं च भवति, तौ चात्यंतमप्रमत्ततयैव निर्वाहं लभत इति तदुपमा. कुंजर इव शौंडीरः कर्मशत्रुसैन्यंप्रति शूरः, वृषभ इव जातस्थामा स्वीकृतमहाव्रतभारवहनंप्रति जातबलो निर्वाहकत्वात्, सिंह इव दुर्धर्षः परीषहादिमृगैरनभिभवनीयः, मेरुरिवानुकूलप्रतिकूलोपसर्गपवनैरविचलितसत्वः, सागर इव गंभीरो हर्षशोकादिकारणसंपर्केऽप्यविकृतचित्तः, चंद्र इव सोमलेश्योऽनुपतापहेतुमनःपरिणामः, सूर इव दीप्ततेजा द्रव्यतः शरीरदीप्त्या, भावतो ज्ञानेनापरेषां क्षोभकत्वाद्वा, जात्यकनक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिव जातरूपो जातं संपन्नं रूपं स्वरूपं रागादिकुद्रव्यविरहाद्यस्य स तथा, अपगतदोषलक्षणकुद्रव्यत्वेनोत्पन्नस्वस्वभाव इत्यर्थः, वसुंधरेव पृथ्वीवत्सर्वाननुकुलेतरान् शीतोष्णादीन् विषहते यः स तथा, सुहुतहुताशन इव तेजसा ज्वलन्, सुष्टु हुतं क्षिप्तं घृतादि यत्रासौ सुहुतो घृतादितर्पितः, स चासौ हुताशनश्च वह्निश्च, तद्वत्तेजसा ज्ञानरूपेण तपस्तेजसा वा ज्वलन् दीप्यमानः. अत्र च ' इमेसिं पयाणिंदाणिं संगहणिगाहाउ ' इति वाक्यपूर्विके द्वे गाथे क्वचिदादर्शे दृश्येते—

कंसे संखे जीवेग—गणेवाउ य सायरसलिले य ॥ पुक्खरपत्ते कुम्मे । विहगे खग्गे य भारुंडे ॥ १ ॥ कुंजरवसभे सीहे । नगरायाचेव सागरमशोए ॥ चंदे सूरे कणगे । वसुंधरा चेव सुहुयहूयवहे ॥ २ ॥ ' नत्थिणं ' इत्यादि, नास्त्ययं पक्षो यदुत तस्य भगवतः कुत्रचिदपि प्रतिबंधो भवति. क्षेत्रं धान्यजन्मभूमिः, खलं धान्यमेलनादिस्थंडिलं, नभ आकाशं, समयः सर्वनिकृष्टः कालः, उत्पलपत्रशतव्यतिभेदजरत्पट्टशाटिकापाटनादिदृष्टांतसाध्यः, तत्र आवलिकायामसंख्यातसमयरूपायां ' आणापाणूए ' उच्छ्वासनिःश्वासकाले, स्तोके सप्तउच्छ्वासमाने, क्षणे बहुतरोच्छ्वासरूपे, लवे सप्तस्तोकमाने, मुहूर्ते लवसप्तसप्ततिमाने, अहोरात्रे त्रिंशन्मुहूर्तमाने, पक्षादयः प्राग्व्याख्याताः, दी-

For Private And Personal Use Only

घेकालसंयोगे युगपूर्वादौ, भये इहलोकादिभेदात सप्तविधे, हासे हास्ये हर्षे अनभिव्यक्तमायालो-भस्वभावेऽभिष्वंगमात्रे प्रेमणि, द्वेषेऽनभिव्यक्तक्रोधमानस्वरूपे अप्रीतिमात्रे.

अथवा रागः सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः, सुखे तत्साधनेऽप्यभिमते विषये गर्वस्तस्मिन्, द्वेषो दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुःखे तत्साधने वाऽप्रीतिस्तस्मिन्, कलहेऽसभ्यवचनराट्यादौ, अभ्याख्याने सद्दोषाविष्करणे, पैशून्ये प्रछन्नमसद्दोषाविष्करणे, परपरिवादे विप्रकीर्णपरदोषवचने, अरतिरत्यां अरतिर्मोहनीयोदयाच्चित्तोद्वेगफलाऽरतिः, रतिर्मोहनीयोदयाच्चित्ताभिरती रतिः, अरतिश्च रतिश्चेति समाहारस्तस्मिन्, मायामोषे वा वेषांतरभाषांतरकरणेन, परवंचनं माया, मायया सह मृषा मायामृषं, मायया वा मोषः परेषां मायामोषस्तस्मिन्. मिथ्यादर्शनशल्ये मिथ्यादर्शनं मिथ्यात्वं शल्यमिवानेकदुःखहेतुत्वात् मिथ्यादर्शनशल्यं तस्मिन्. एवममुना प्रकारेण तस्य भगवतो न भवति प्रतिबंध इति प्रकृतं. ' सेणं भगवं ' इत्यादि, वर्षासु प्रावृषि वासो वर्षावासस्तद्वर्जमष्टमासान् ग्रैष्म-हैमंतिकान् ग्रीष्महेमंतसत्कान्, ग्रामे एकरात्रिकः, एकरात्रौ वासमानतयास्ति यस्य स तथा, एवं नगरे पंचरात्रिकः. वासीचंदनयोः प्रतीतयोरथवा वासीचंदने इव वासीचंदने अपकारकोपकारके, त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योः समानो निर्द्वेषरागत्वात् समः कल्पो विकल्पः समाचारो वा यस्य स तथा, समानि तुल्यानि उपेक्षणीयतया तृणादीनि यस्य स तथा, ' समसुहदुःखेत्यादि ' व्यक्तं.

' एवं च णं वीहरइत्ति ' एवमीर्यासमित्यादिगुणयोगेनेति. ' अणुत्तरेणं नाणेणं इत्यादि ' ज्ञानं मत्यादिचतुष्टयं तेन, दर्शनं चक्षुर्दर्शनादिसम्यक्त्वं वा तेन, चारित्रेण महाव्रतादिना, आलयेन स्त्र्याद्यसंसक्तवसत्यादिना, विहारेण देशादिषु चंक्रमणेन, वीर्येण विशिष्टोत्साहेन, आर्जवेन मायानिग्रहेण, मार्दवेन माननिग्रहेण, लाघवेन क्रियासु दक्षत्वेन, अथवा लाघवं द्रव्यतोऽल्पोपधित्वं, भावतो गौरवत्रयत्यागस्तेन, क्षांत्या क्रोधनिग्रहेण, मुक्त्या निर्लोभतया. क्वचित ' गुत्तीए ' इत्यपि पाठः, तत्र गुप्त्या मनोगुप्त्यादिकया, तुष्ट्या मनःप्रह्लत्या, सत्यसंयमतपःसुचरितसोपचितफलनिर्वाणमार्गेण, सत्यं सुव्रतं, संयमः प्राणिदया, तपो द्वादशभेदं, तेषां सुष्टु विविधाचरितमाचरणं सत्यसंयमतपःसुचरितं, उपचयनमुपचितं सहोपचितेनोपचयेन वर्तते इति सोपचितं, सत्यसंयमतपःसुचरितेन सोपचितं स्फीतं फलं मुक्तिलक्षणं यस्य स तथा, स चासौ निर्वाणमार्गश्च रत्नत्रयलक्षणस्तेनात्मानं भावयतो वासयतो वा संयतः, अनेनात्मज्ञानमेव मोक्षस्य प्रधानसाधनमित्युक्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



' अंतरा वट्टमाणस्सत्ति ' त्रयोदशस्य वर्षस्य मध्ये पक्षाधिकषण्मासलक्षणे वर्तमाने इत्यर्थः.

' वियावत्तस्स चेइयस्स ' व्यावृत्तचैत्यत्वाद्व्यावृत्तं तस्य जीर्णोद्यानस्येत्यर्थः. जीर्णव्यंतरायतनस्य वा विजयावर्तं वा नाम चैत्यं तस्यादूरसामंतेऽदूरासन्ने उचितदेशे इत्यर्थः, गृहपतेः कौटुंबिकस्य ' कट्ठकरणंसि ' क्षेत्रे धान्योत्पत्तिस्थाने ' झाणंतरियाए ' इति शुक्लध्यानं चतुर्धा—पृथक्त्ववितर्कं सविचारं १ एकत्ववितर्कमविचारं २ सूक्ष्मक्रियमप्रतिपाति ३ उत्सन्नक्रियमनिवर्ति ४, तेषामाद्यभेदद्वये ध्यातेऽग्रेतनभेदद्वयमप्रतिपन्नस्य केवलज्ञानमुत्पन्नमित्यर्थः. ' अणंते ' इत्यादि, अर्हन्नशोकादिमहापूजार्हत्वात्, क्वचित अर्ह इति पाठस्तत्रारीन् रागादीन् हंतीत्यरिहाः, अविद्यमानं वा रहः एकांतं प्रछन्नं सर्वज्ञत्वादस्य सोऽरहाः ' जाए ' जातः संपन्नः.

क्वचित् ' जाणए ' इति दृश्यते, तत्र ज्ञायको ज्ञाता रागादिभावसंबंधिनां स्वरूपकारणफलानामिति. जिनो रागादिजेता, केवलानि संपूर्णानि शुद्धानि अनंतानि वा ज्ञानादीनि यस्य संति स केवली, अत एव सर्वज्ञ एकस्मिन् समये विशेषावबोधात्, सर्वदर्शी द्वितीयसमये सामान्यावबोधवान्, सदेवमनुजासुरस्य लोकस्य पर्यायं, जातावेकवचनं, पर्यायानुत्पादव्ययलक्षणान् जानाति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलज्ञानेन, पश्यति केवलदर्शनेन, न च पर्यायानित्युक्ते द्रव्यं न जानातीति शंकनीयं, उत्पाद· व्यययोर्निराधारयोरनुपपत्तेः, तयोर्ज्ञातयोरविश्वग्भावेन वर्तिष्णु अन्वयिद्रव्यमपि ज्ञातमेव स्यात्, तथा चाहुः—द्रव्यं पर्यायवियुतं । पर्याया द्रव्यवर्जिताः ॥ क्व कदा केन किंरूपा । दृष्टा मानेन के· न वा ॥ १ ॥ आर्षेऽप्युक्तं—जं जं जे जे भावे । परिणमइ पओगसा दव्वं ॥ तं तह जाणइ जि· णो । अपज्जवे जाणणा नत्थि ॥ २ ॥ अत एवाह—' सव्वलोए ' इत्यादि, सर्वलोके सर्वलोकव· र्तिनां सर्वजीवानामेकेंद्रियादीनामागतिं गतिं स्थितिं च्यवनमुपपातं तर्कं मनो मानसिकं भुक्तं कृतं परिषेवितं प्रतिसेवितं वा आविःकर्म रहःकर्म जानाति पश्यति चेति ड्मरुकमणिन्यायेनात्रापि संब· ध्यते. तत्रागतिर्यतः स्थानादागच्छंति विवक्षितं स्थानं जीवाः, गतिर्यत्र मृत्वोत्पद्यंते, स्थितिः कायस्थि· तिर्भवस्थितिश्च, च्यवनं देवलोकाद्देवानां मनुष्यतिर्यक्ष्ववतरणं, उपपातं देवनारकाणां जन्मस्थानं, तर्कं मनस्तेषां जीवानामिदं तर्कं तदीयं, मनश्चित्तं, मानसिकं चित्तगतं चिंतारूपापन्नपुद्गलजातं. य· द्यपि मनोमनोगतयोर्नास्ति वास्तवो भेदस्तथापि व्यवहारनयानुसरणादस्त्येव भेदः, तथा च वक्ता· रो भवंति, ममेदं मनसि वर्त्तते इति, भुक्तमशनपुष्पादि, कृतं चौर्यादि, प्रतिसेवितं मैथुनादि, आ·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विःकर्म प्रकृतिकृतं, रहःकर्म प्रच्छन्नकृतं, ' अरहा ' इत्यादि पूर्ववत्, अरहस्य भागी, न भगवानेकांतं भजते, जघन्यतोऽपि देवकोटिसेव्यत्वात्. ' तं तं कालमिति ' तत्र तत्र काले मनोवचनकाययोगवर्तमानानां सर्वलोके सर्वजीवानां सर्वभावान् जानन् पश्यंश्च विहरतीत्यन्वयः. अमी हि जीवाः कदाचिन्मनोयोगे एव वर्तते, कदाचिद्वाग्योगे कदाचित्काययोगे, अथवा संज्ञिपंचेंद्रियास्त्रिष्वपि वर्तते, असंज्ञिपंचेंद्रियचतुस्त्रिद्वींद्रिया वाक्काययोगयोः, एकेंद्रियास्तु काययोगे एव, सर्वभावानतीतानागतवर्तमानगुणपर्यायान्, तत्र सहभाविनो गुणा ज्ञानादयः, क्रमभाविनो हर्षादयः, एतावता च ग्रंथेनाजीवपरिज्ञानं क्वापि नोक्तं, अतस्तत्संग्रहार्थं अकारप्रश्लेशात् सर्वाजीवानां धर्मास्तिकायादीनां पुद्गलास्तिकायांतानां सर्वभावान् सर्वविवर्तान् जानातीति व्याख्येयं. ' तेणं कालेणं ' इत्यादि, अस्थिकग्रामो यत्र धनदेवसार्थवाहवृषभः क्षुतपिपासाद्यधिसहनेन शूलपाणियक्षतामापन्नः, स्वमारितनृणामस्थीनि राशीकृत्य तदुपरि चैत्यं जनैः कारितवान्, पूर्वं हि स ग्रामो वर्धमान इति रूढोऽभूत्. तस्यास्थिकग्रामस्य निश्रया प्रथममंतरावासं वर्षारात्रं ' वासावासंति ' वर्षासु वसनमुपागतः, अंतरावास इति वर्षारात्रस्याख्या, उक्तं च—' अंतरघणसामलोभयवंति ' वर्षारात्रघनश्याम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यर्थः, ततश्चंपां च पृष्टिचंपां च निश्रायालंब्य त्रयो वर्षारात्राः, एवं वैशालीं वाणिजग्रामं च निश्राय द्वादश, राजग्रहं नालंदिं च निश्राय चतुर्दश, नालंदा राजग्रहबाहिरिका, राजग्रहादुत्तरस्यां शाखापुरविशेषः, षट् मिथिलायां, द्वौ भद्रिकापुर्यां, एकश्चालंभिकायां, एकः पणितभूमौ वज्रभूमाख्येऽनार्यदेशे इत्यर्थः.

एकश्चापश्चिमो वर्षारात्रो मध्यमपापायां हस्तिपालराज्ञो रज्जुकसभायां, अपश्चिम इति पश्चिमशब्दः पर्यंतवाची मंगलार्थं चापश्चिम इत्युक्तं. रज्जुका लेखकास्तेषां सभा परिभुज्यमाना करणशाला तत्र जीर्णशुल्कशालायामित्यर्थः. प्राकिल तस्या नगर्या अपापेति नामासीत्, देवैस्तु पापेत्युक्तं, येन तत्र भगवान् कालं गत इति. छद्मस्थकाले जिनकाले च सर्वसंख्यया द्विचत्वारिंशद्वर्षारात्राः. ' तत्थणं ' इत्यादि, ' जेसेयत्ति ' यस्मिन्नंतरावासे वर्षारात्रे ' पक्खेणंति ' दिवसे चरमा रजनी दिनापेक्षया पश्चाद्भाविनी रात्रिः, अथवा चरमा रजनी अमावास्यारात्रिः, पर्यंतकालगतः कायस्थितिभवस्थितयोः कालात्कृतः व्यतिक्रांतः संसारात्, समुद्घातः सम्यगुद्घातो न सुगतादिवत्, ते हि स्वदर्शनादिनिकारात् पुनर्भवेऽवतरंति, यतः—ज्ञानिनो धर्मतीर्थस्य। कर्तारः परमं पदं॥ गत्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गच्छंति भूयोऽपि । भवं तीर्थनिकारतः ॥ १ ॥ इति वचनात्. छिन्नं जात्यादीनां बंधनं हेतुभूतं कर्म येन स तथा, सिद्धः साधितार्थः, बुद्धो ज्ञः, मुक्तो भवोपग्राहिकर्मांशेभ्यः, अंतकृत् सर्वदुःखानां, परिनिर्वृत्तः कर्मकृतसकलसंतापविरहात्. किमुक्तं भवतीत्याह—

सर्वदुःखप्रहीणः सर्वाणि दुःखानि शारीराणि मानसानि च प्रहीणानि यस्य स तथा, 'चंदे-नाम' इत्यादि, युगे हि पंच संवत्सराणि, तृतीयपंचमावभिवर्धिताख्यौ, शेषास्त्रयश्चंद्राख्याः, तत्र द्वितीयं चंद्रवत्सरं तस्य प्रमाणं त्रीणि शतानि चतुःपंचाशदधिकानि अहोरात्राणां,द्वादश च द्विषष्टिभागा दिनस्य, प्रीतिवर्धनो मासः, कार्तिकस्य हि प्रीतिवर्धन इति संज्ञा सूर्यप्रज्ञप्तौ, नंदिवर्धनः पक्षः, 'अग्गिवेसत्ति' तद्दिनस्य नाम, क्वचित् 'सुव्वयग्गी' इति नाम दृश्यते 'उवसमइत्ति' इशब्दो वाक्यालंकारे, उपशम इत्यपि तस्य नामेत्यर्थः. देवानंदानाम सा रजनी, सा अमावास्यारजनिरित्यप्युच्यते.

यस्मिन् लवे भगवान् सिद्धिं गतः स लवोऽर्चाख्यः, एवं सत्तुप्राणापानः, सूप्तो नाम क्वचिन्मुक्तो नाम क्वचिन्मुहूर्त्तो नाम, स च स्तोकः सिद्धो नाम, तच्च करणं एकादशकरणांतवर्ती श-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुन्यादिस्थिरकरणचतुष्टयमध्ये तृतीयं नागं नामोऽमावास्याया उत्तरार्धे हि तद्भवति. एवं स मुहूर्तः सर्वार्थसिद्धो नाम. ' तं रयणिं च णं जीवस्सेत्यादि ' ज्येष्ठस्यांतेवासिन इति योज्यं. गौतमस्य गोत्रेण इंद्रभूतेर्नाम्ना ' नाइयत्ति ' ज्ञातजे श्रीमहावीरविषये ' पिज्जबंधणे ' इति स्नेहबंधने व्यवछिन्ने त्रुटिते केवलमुत्पन्नं. अत्र चूर्णिः—' गोयमो भगवया पट्ठविउ अमुगगामे अमुगं बोहेहि तेहिं गउ वियालो य जाउ तछेव बुछो णवरि पछइ रत्तिं देवसन्निवायं, उवउत्तो नायं जहा भगवं कालगतो ताहे चिंतेति अहो भगवं निप्पिवासो कथं वा वीतरागाण नेहो भवति ! नेहरागेण य जीवा संसारे अमंति, इछंतरे णाणमुप्पन्नं, बारसवासाणि केवली विहरइ जहेव भगवं, न वरं अतिसयरहितो धम्मकथणापरिचारोय तहेव पछा अज्जसुहम्मस्स निसिरति गणं दोहाउत्ति काउं पछा अज्जसुधम्मस्स केवलनाणमुप्पन्नं, सोवि अठवासे विहरित्ता केवलिपरियाएण अज्जजंबुनामस्स गणं दाउं सिद्धिं गउत्ति '.

बहुष्वादर्शेषु ' वारवासे विहरत्ते ' ति दृश्यते, तच्च चिंत्यमावश्यकेन सह विसंवादात्, तत्र हि पंचाशद्वर्षाण्यगारवासः सुधर्मस्वामिनः शतं च सर्वायुरुक्तं, गौतमस्य त्वगारवासस्तावानेव, द्विनवति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्च सर्वायुरस्मिंश्च मुक्ते तस्य केवलोत्पत्तिरिति. ' नवमल्लई ' इत्यादि, काशीदेशस्य राजानो मल्लकिजातीया नव, कोशलदेशस्य राजानो लेच्छकिजातीया नव, ते कार्यवशाद्गणमेलकं कुर्वंतीति, गणराजानोऽष्टादश ये चेटकमहाराजस्य भगवन्मातुलस्य सामंताः श्रूयंते, ते तस्याममावास्यायां पारं पर्यंतं भवस्य आभोगयति पश्यति यः स पाराभोगः संसारसागरपारप्रापणप्रवणास्तं तथाविधोपवासं पारं पर्यंतं यावदाभोगो विस्तारो यस्य स पाराभोगः, अष्टप्राहरिकः प्रभातकालं यावत् संपूर्ण इत्यर्थः. तथाविधं पौषधोपवासं पौषधयुक्तोपवासं ' पठविंसुत्ति ' प्रस्थापितवंतः कृतवंतः. क्वचिच्च ' वाराभोए ' इति पठंति, तत्र च द्वारमाभोग्यतेऽवलोक्यते यैस्ते द्वारभोगाः प्रदीपास्तान् कृतवंतः, आहारत्यागपौषधरूपमुपवासं वाकार्षुरिति च व्याचक्षते. एतदर्थानुपात्येव चोत्तरसूत्रं ' गए से ' इत्यादि, गतः स भावोद्योतो ' नाणं भावुज्जोउ ' इति वचनात्, ज्ञानज्ञानिनोः कथंचिदभेदात्, स भावोद्योतरूपो ज्ञानमयो भगवान् गतो निर्वाणं, अतः सांप्रतं द्रव्योद्योतं प्रदीपलक्षणं करिष्याम इति हेतोस्तैर्दीपाः प्रवर्तितास्ततः प्रभृति दीपोत्सवः संवृत्तः. कार्तिकशुक्लप्रतिपदि च श्रीगौतमस्य केवलमहिमा देवैश्चक्रे, अतस्तत्रापि जनप्रमोदः. नंदिवर्द्धननरेंद्रश्च भगवतोऽस्तं श्रुत्वा शोकार्त्तः सन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुदर्शनया भगिन्या सादरं संबोध्य स्ववेश्मनि द्वितीयायां भोजितः, ततो भ्रातृद्वितीयापर्व रूढमिति पुराविदः. 'खुद्दाए' इत्यादि, क्षुद्रात्मा क्रूरस्वभावो भस्मराशिस्त्रिंशत्तमो ग्रहो द्विवर्षसहस्रस्थितिरेकराशौ एतावंतं कालमवस्थानात, उदितउदितः स्फीतः स्फीतः पूजाभ्युत्थानाहारदानादिभिः, सत्कारो वस्त्रादिभिः, अत एवेंद्रेण विज्ञप्तः स्वामी यत् क्षणमवस्थाय जन्मतो संक्रमतो भस्मकस्य मुखं विफलयतु प्रभुर्येन त्वयि मोक्षं गतेऽप्रभविष्णुरसौ महाग्रहः पश्चाद्भवदीयतीर्थस्य बाधायै न कल्पते. ततः प्रभुणोक्तं न खलु त्रुटितमायुः संधातुं जिनेंद्रैरपि पार्यते, अतोऽवश्यं भाविनी तीर्थबाधा, कल्किनि च कुनृपे षडशीतिवर्षायुषि संघोपप्लववपुषि भवता निगृहीते वर्षसहस्रद्वये पूर्णे मज्जन्मनक्षत्राद्भस्मकग्रहे व्यतिक्रांते कल्किपुत्रधर्मदत्तराज्यादारभ्य भविता श्रमणसंघस्य पूजासत्कार इति.

'कुंथु' इत्यादि, कुर्भूमिस्तस्यां तिष्ठतीति कुंथुः प्राणिजातिर्नोद्धर्तुं शक्यत इत्यनुद्धरी अणुं सूक्ष्मं देहं धरतीत्यनुद्धरीति चूर्णिः स्थिता इत्यस्य व्याख्यानं अचलमानेति. चक्षुःस्पर्शे दृष्टिपथं हव्वं शीघ्रं भक्तानि प्रत्याख्यातानि, अनशनं कृतमित्यर्थः. किमाहुर्भदंता गुरवः, किं कारणमनुद्धर्यां उत्पत्तौ भक्तप्रत्याख्याने वा ब्रुवते पूज्यपादाः, इति शिष्येण पृष्टे गुरुराह—अद्यप्रभृति दुरारा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धः संयमो भविष्यति, जीवकुलाकुलत्वात् पृथिव्यां संयमप्रायोग्यक्षेत्राभावात् पाखंडिसंकराच्च. 'ते-णं कालेणं' इत्यादि 'साहस्सीउत्ति' आर्षत्वात् स्त्रीत्वं, सुलसा नागभार्या द्वात्रिंशत्पुत्रजननी, रेवती मंखलिपुत्रमुक्ततेजोऽर्चिर्जातरक्तातिसारस्य भगवतस्तथाविधौषधदानेनारोग्यधात्री. 'अजि-णाणं' इत्यादि, असर्वज्ञानां सतां सर्वज्ञतुल्यानां सर्वेऽक्षरसन्निपाता वर्णसंयोगा ज्ञेयतया विद्यंते येषां ते तथा, तेषां जिन इवावितथं सद्भूतार्थं व्याकुर्वाणानां केवलिश्रुतकेवलिनोः प्रज्ञापनायां तुल्यत्वात. 'अइसेसपत्ताणंति' अतिशेषा अतिशया आमर्षौषध्यादयस्तान् प्राप्तानां 'संभिन्नेति' संभिन्ने सिद्धसेनदिवाकरमतेऽन्योन्यमिलिते एकसमयभाविनी वरे श्रेष्ठे ज्ञानदर्शने धारयंति ये, अवधूतसिद्धांतहृदयजिनभद्रगणिक्षमाश्रमणाभिप्रायेणानुत्तसम्यगभिन्ने पृथग्समयभाविनी वरज्ञान-दर्शने इति व्याख्येयं. अथवा संभिन्ने संपूर्णे 'विउलमईणंति' विपुला बहुविधा विशेषणोपेत-मन्यमानचिंत्यमानवस्तुग्राहित्वेन विस्तीर्णा मतिर्मनःपर्यायज्ञानं येषां ते तथा, तथाहि—घटोऽनेन चिंतितः स च द्रव्यतः सौवर्णादिः, क्षेत्रतः पाटलीपुत्रकादिः, कालतः शारदादिः, भावतः कालव-र्णादिरित्येवं विपुलमतयो जानंति. ऋजुमतयस्तु सामान्यत एव तेषां तथार्धतृतीयांगुलन्यूने मनु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जक्षेत्रे व्यवस्थितानां संज्ञिनां मनोमात्रग्राहका ऋजुमतयः, इतरे तु संपूर्णा इति. मनःपर्यायज्ञाने दर्शनाभावात् ' जाणमाणाणं ' इत्येवोक्तं, न ' पासमाणाणंति ' यच्च श्रीऋषभचरित्रे क्वचिदुभयं दृश्यते तत्र पश्यतामिव पश्यतां साक्षात्करणादिति व्याख्येयं.

' गइकल्लाणाणं ' इत्यादि, गतिर्देवगतिरूपा कल्याणी येषां, एवं स्थितिर्देवायूरूपा कल्याणी उत्कृष्टा येषां, अथवा गतौ मनुष्यगतौ कल्याणं येषां ते, तथा स्थितौ देवभवेऽपि कल्याणं येषां वीतरागप्रायत्वात. जं कामसुहं लोए । जं च दिव्वं महासुहं ॥ वीयरायसुहस्सेयं । णंतभागंपि नाग्घइ ॥१॥ इति वचनात. अत एवागमिष्यद्भद्राणामागामिनि भवे सेत्स्यत्वात. अथवा गतौ प्राणगमनेऽपि, स्थितौ जीवितेऽपि कल्याणं येषां, तवनियमसुठियाणं । कल्लाणं जीवियंपि मरणंपि ॥ जीवंति जत्ति गुणा । अज्जिणंति सुगइं उविंति मया ॥ १ ॥ इतिवचनादभयकुमारादीनामिव ते तथा तेषां ' दुविहा अंतगडभूमीत्ति ' अंतकृतो भवांतकृतो निर्वाणयायिनस्तेषां भूमिः कालोंतकृद्भूमिः. ' जुगंतकडभूमित्ति ' इह युगा इति कालमानविशेषास्तानि च क्रमवर्तीनि तत्साधर्म्याद्ये क्रमवर्तिनो गुरुशिष्यप्रशिष्यादिरूपाः पुरुषास्तेऽपि युगानि, तैः प्रमितांतकृद्भूमिर्या सा युगांतकृद्भूमिः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परियायंतकडभूमीयत्ति ' पर्यायस्तिर्थकरस्य केवलित्वकालस्तमाश्रित्यांतकृद्भूमिर्या सा तथा तत्र ' जावेत्यादि ' इह पंचमी द्वितीयार्थे द्रष्टव्या, ततो यावत्तृतीयं, पुरूष एव युगं पुरषयुगं तृतीयं, प्रशिष्यं जंबूस्वामिनं यावदित्यर्थः, युगांतकृद्भूमिर्वीरजीनस्याभवत्. वीरजिनादारभ्य तत्तीर्थे तृतीयं पुरुषं यावत्साधवः सिद्धाः, श्रीवीरः सुधर्मस्वामी जंबूस्वामीति. ततः परं सिद्धिगमनव्यवच्छेदोऽभूत इति हृदयं. ' चउवासपरियाएत्ति ' चतुर्वर्षपर्याये केवलिपर्याये केवलिपर्यायापेक्षया भगवति जिने सति अंतमकार्षीद्भवांतमकरोत्तत्तीर्थे साधुः, नारात्कश्चिदपीति केवलोत्पत्तेश्चतुर्षु वर्षेषु सिद्धिगमनारंभः, तथा च वृद्धाः—' वीरस्स सिद्धिगमणाउ तिन्नि पुरिसाउ जाव सिज्झत्ति, एस जुगंतकरभूमी, तेणं परं नत्थि निव्वाणं, वीरजिणकेवलाउ चउवरिसं न कोइ सिद्धिं संपत्तो केवलिजुत्तोविजईपज्जयंतकरभूमीसा ' ' छउमत्थपरियायं पाउणित्ता ' इति छद्मस्थपर्यायं छद्मस्थत्वं प्राप्य पूरयित्वेत्यर्थः, ' देसूणाइंति ' पक्षाधिकषण्मासोनानि ' एगे अबीएइत्ति ' एकः कर्मसहायविरहात्, अद्वितीय एकाकी, न पुनर्यथा ऋषभादयो दशसहस्रादिभिः साधुभिः सहिता मोक्षं जग्मुस्तथेति. ' पच्चुसत्ति ' प्रत्यूषकाललक्षणो यः समयोऽवसरस्तत्र ' संपलियंकनिसन्नेत्ति ' संगतः पर्यंकः प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्यासनं, तत्र निषण्ण उपविष्टः पंचपंचाशत्सु कल्याणविपाकाध्ययनेष्वेकं मरुदेवाध्ययनं ' विभावेमाणे ' इति भावयन् प्ररूपयन्. ' नववाससयाइंति ' श्रीवीरनिर्वृत्तेर्नवसु वर्षशतेष्वशीत्यधिकेषु व्यतीतेषु इह्रं वाचना जातेत्यर्थे व्याख्यायमाने न तथा विचारचातुरीचंचूनां चेतसि प्रीतिरस्य सूत्रस्य श्रीवर्धमाननिर्वाणानंतरं सप्तत्यधिकवर्षशतेनोत्पन्नेन श्रीभद्रबाहुस्वामिना प्रणीतत्वात्. तस्मादियति काले गते इयं वाचना पुस्तकेषु न्यस्तेति संभाव्यते, श्रीदेवर्द्धिगणिक्षमाश्रमणैर्हि श्रीवीरनिर्वाणान्नवसु वर्षशतेष्वशीत्युत्तरेष्वतीतेषु ग्रंथान् व्यवच्छिद्यमानान् दृष्ट्वा सर्वग्रंथानामादिमे नंद्यध्ययने स्थविरावलीलक्षणं नमस्कारं विधाय ग्रंथाः पुस्तकेषु लिखिता इत्यत एवात्र ग्रंथे वक्ष्यमाणस्थविरावलीप्रांते देवर्द्धिक्षमाश्रमणस्य नमस्कारं वक्ष्यति.

पूर्वं तु गुरुशिष्याणां श्रुताध्ययनाध्यापनव्यवहारः पुस्तकनिरपेक्ष एवासीत्. केचित्त्विदमाहुः—यदियत्कालातिक्रमे ध्रुवसेननृपस्य पुत्रमरणार्त्तस्य समाधिमाधातुमानंदपुरे, संप्रति कालनगरमहास्थानाख्यया रूढे सभासमक्षमयं ग्रंथो वाचयितुमारब्ध इति. ' समणस्स णं भगवओ महावीरस्स जाव सव्वदुक्खपहीणस्स धुवसेणराइणो पुत्तमरणे एगे वाससहस्से असीइवासाहिए वीइक्कं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते ' इत्यपि क्वचिदादर्शे दृष्टं, बहुश्रुता वा यथावद्विदंति. त्रिनवतियुतवर्षनवशतपक्षे कियता कालेन पंचम्याश्चतुर्थ्यां पर्युषणाकल्पः प्रववृते. तेणउयनवसएहिं । समइक्कंतेहिं वद्धमाणाउ ॥ पज्जोसवणचउत्थी । कालयसूरिहितो ठविया ॥ १ ॥ वीसेहिं दिणेहिं कप्पो । पंचगहाणीहिं कप्पठवणाय ॥ नवसयतेणउएहिं । वुच्छिन्ना संघआणाए ॥२॥ सालावाहणेण रन्ना । संघाएसेण कारियं भयवं ॥ पज्जुसवणचउत्थी ॥ चउमासं चउदसिए ॥ ३ ॥ चउमासगपडिक्कमणं । पक्खियदिवसंमि चउविहो संघो ॥ नवसयतेणउएहिं । आयरणं तं पमाणंति ॥ ४ ॥ इति तीर्थोद्गारादिषु भणनात्.

॥ इति श्रीवर्धमानस्य चरित्रमभिहितं. ॥

---

सांप्रतं पार्श्वनाथस्य लेशतस्तदभिधीयते—' तेणं कालेणं ' इत्यादि, पुरुषादानीयः पुरुषाणां मध्ये आदानीयः, आदेयो ग्राह्यनामा पुरुषादानीय इति पूज्याः, पुरुषश्चासौ पुरुषाकारवर्तितया आदानीयश्चादेयवाक्यतया पुरुषादानीयः पुरुषविशेषणं तु पुरुष एव प्रायस्तीर्थकर इति ख्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पनार्थमिति वादिवेतालः. 'होत्थणं कुमारे पासे' इति, अस्मिन् गर्भस्थे सति शयनतलस्थिता जननी तमसि सर्पंतं कृष्णसर्पं पश्यतिस्मेति पार्श्वः. क्वचित् केवलोत्पत्तौ 'छट्ठेणं भत्तेणं' इति दृश्यते, क्वचिच्च 'अट्ठमेणंति'. 'अट्ठगणा' इति एकवाचनिका यतिसंघा गणाः, गणधरास्तन्नायकाः सूरयस्तेऽष्टौ, आवश्यके तु दशगणा दश गणधरा इति. तदिह स्थानांगे च द्वावल्पायुष्कत्वान्नोक्ताविति संभाव्यते. ऋजुमतिविपुलमतीनां विशेषः प्रागेवोक्तः. युगांतरभूमौ श्रीपार्श्वनाथादारभ्य चतुर्थं पुरुषयुगं यावत्सिद्धिगमः प्रवृत्तः, पर्यायांतकरभूमौ केवलोत्पादात् त्रिषु वर्षेषु सिद्धिगमनारंभः. 'वग्घारियपाणित्ति' कायोत्सर्गस्थितत्वात्प्रलंबितभुजः, मोक्षगमने पूर्वाह्न एव कालः. 'पुव्वरत्तावरत्तकालसमयंति' इति पाठस्तु लेखकदोषान्मतभेदाद्वा 'दुवालसवाससयाइंति' श्रीपार्श्वनाथनिर्वाणादनंतरं श्रीवीरमुक्तेः पंचाशदधिकेन वर्षशतद्वयेन जातत्वात्.

---

अथ श्रीनेमिनाथचरित्रं—'उक्खेवउत्ति' प्रागुक्तालापकोच्चारणं चित्राभिलापतेत्यर्थः, 'तेत्तीससागरोवमत्ति' क्वचित् त्रयस्त्रिंशत्सागरोपमाणि दृश्यंते 'दविणसंहरणा' इति पितुर्वेश्मनि नि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निधाननिक्षेपादि ' अरिठनेमी नामेणंति ' रिष्टरत्नमयं नेमिं दिव्युत्पतंतं माता स्वप्नेऽद्राक्षीत्, इति रिष्टनेमिः. अपश्चिमशब्दवन्नञ्पूर्वत्वेऽपि रिष्टनेमिः. ' कुमारत्ति ' अपरिणीतः, अत्रापि केवलोत्पत्तौ ' अट्ठेणंति ' दृश्यते, ग्रंथांतरे त्वष्टमेन, ' चउरासीइवाससहस्साइंति ' नेमिनिर्वाणात् त्र्यशीत्या सहस्रैरर्धाष्टमशतैश्च वर्षाणां श्रीपार्श्वस्य सिद्धिगमनात्. ततः परमर्धतृतीयशताभ्यां श्रीवीरस्य निर्वृत्तिरिति. अतःपरं ग्रंथगौरवभयान्नम्यादीनां पश्चानुपूर्व्याऽजितांतानामंतरालकालमेवाह—' नमिस्स णं ' इत्यादि, सुगमश्चायं तथापि शिष्यानुग्रहाय व्यक्ततरं लिख्यते—नमिनिर्वाणान्नेमिनिर्वाणं पंचवर्षलक्षैः, मुनिसुव्रतमोक्षान्नमिः षड्भिर्वर्षलक्षैर्मुक्तः, मल्लिमोक्षान्मुनिसुव्रतश्चतुःपंचाशतावर्षलक्षैर्मुक्तः, अरमोक्षाद्वर्षकोटिसहस्रेण मल्लिर्मुक्तः, कुंथुमोक्षाद्वर्षकोटिसहस्रोनपल्योपमचतुर्थांशे न्यूनेऽरो मुक्तः, शांतिमोक्षात् पल्योपमार्धेन कुंथुर्मुक्तः, धर्ममोक्षात पल्योपमत्रिचतुर्भागोनैस्त्रिभिः सागरोपमैः शांतिर्मुक्तः, अनंतमोक्षाच्चतुर्भिः सागरोपमैर्धर्मो मुक्तः, विमलमोक्षान्नवभिः सागरोपमैरनंतो मुक्तः, वासुपूज्यमोक्षात त्रिंशतासागरोपमैर्विमलो मुक्तः, श्रेयांसमोक्षाच्चतुःपंचाशता सागरोपमैर्वासुपूज्यो मुक्तः, शीतलमोक्षात्सागरशतोनया षट्षष्टिलक्षषड्विंशतिसहस्रवर्षोनया च सागरकोट्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेयांसो मुक्तः, सुविधिमोक्षान्नवभिः सागरकोटिभिः शीतलो मुक्तः, चंद्रप्रभमोक्षान्नवत्यासागरकोटिभिः सुविधिर्मुक्तः, सुपार्श्वमोक्षात् सागरकोटीनां नवशत्या चंद्रप्रभो मुक्तः, पद्मप्रभमोक्षात सागरकोटीनां नवभिः सहस्रैः सुपार्श्वो मुक्तः, सुमतिमोक्षात् सागरकोटीनां नवत्या सहस्रैः पद्मप्रभो मुक्तः, अभिनंदनमोक्षात सागरकोटीनां नवभिर्लक्षैः सुमतिर्मुक्तः, संभवमोक्षात् सागरकोटीनां दशभिर्लक्षैरभिनंदनो मुक्तः, अजितमोक्षात् सागरकोटीनां त्रिंशल्लक्षैः संभवो मुक्तः, ऋषभमोक्षात सागरकोटीनां पंचशतालक्षैरजितो मुक्त इति.

अथ श्रीऋषभनाथचरित्रं—' तेणं कालेणं ' इत्यादि, कोशलायामयोध्यायां भवः कौशलिकः, ' अइंतं ' प्रविशंतं ' सेसाउ गयंति ' शेषा जिनजनन्यः प्रथमं गजं पश्यंति, श्रीवीरमाता तु सिंहमिति. ' आसाढाहिंति ' उत्तराषाढाभिः, ' पढमजिणेइ वा ' इति, प्रथमकेवलज्ञानी, इत्रीक्ष्यालंकारे, ' रज्जवासमज्झावसमाणेत्ति ' राजवासमध्ये वसन् ' लेहाइयाउ ' लिप्यादिका द्वासप्ततिकलास्त्विमा नंद्यामभिहितास्तद्यथा—लेहं १ गणियं २ रूवं ३ नट्टं ४ गीयं ५ वाइयं ६ सरगयं ७ पुक्करगयं ८ समनालं ९ जुयं १० जडवायं ११ पासगं १२ अट्ठावयं १३ पोरेगव्वं १४ दगम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ट्टीयं १५ अन्नविहिं १६ पाणविहिं १७ विलेवणविहिं १८ वत्थविहिं १९ सयणविहिं २० अज्जंपहेलियं २१ मागहिया २२ गाहा २३ गीइया २४ सीलोगा २५ हिरण्णजुत्ती २६ सुवण्णजुत्ती २७ चुण्णजुत्ती २८ आहरणविहि २९ तरुणिपडिकम्मं ३० इत्थिलक्खणं ३१ पुरिसलक्खणं ३२ हयलक्खणं ३३ गयलक्खणं ३४ गोणलक्खणं ३५ कुक्कुडलक्खणं ३६ छत्तलक्खणं ३७ दंडलक्खणं ३८ असिलक्खणं ३९ कागिणिलक्खणं ४० मणिलक्खणं ४१ वत्थुविज्जं ४२ खंधावारमाणं ४३ नगरमाणं ४४ वूहं ४५ पडिवूहं ४६ चारं ४७ पडिचारं ४८ चक्कवूहं ४९ गरुडवूहं ५० सगडवूहं ५१ जुद्धं ५२ निजुद्धं ५३ जुद्धाइजुद्धं ५४ अट्ठिजुद्धं ५५ मुट्ठिजुद्धं ५६ बाहुजुद्धं ५७ लयाजुद्धं ५८ इसत्थं ५९ छरुप्पवायं ६० धणुवेयं ६१ हिरण्णपागं ६२ सुवण्णपागं ६३ मुत्तखेड्डं ६४ वत्थखेड्डं ६५ नालियाखेड्डं ६६ पत्तच्छिज्जं ६७ कडगच्छिज्जं ६८ सज्जीवं ६९ निज्जीवं ७० सउणरुयमिति ७१—७२.

महिलागुणाः स्त्रीणां कलाश्चतुः षष्टिरिति. तासु चतुर्विंशतिः कर्माश्रया गीतनृत्तवाद्यादयः, विंशतिर्दानाश्रया आपप्राप्त्यर्थविधानादयः, षोडश शयनोपचारिकाः पुरुषभावग्रहणस्वरागप्रकाशदानादयः, चतस्र उत्तरकलाः साश्रुपातं रमणाश्वशापनं, इत्यादय इति मूलतश्चतुःषष्टिस्तत्राप्यंतर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलाः पंचशतान्यष्टादशाधिकानि, तन्मध्याद्विभज्य चतुःषष्टिरेता वात्स्यायने साधारणाधिकरणतृतीयाध्याये उक्तास्तद्यथा—गीतं १ वाद्यं २ नृत्त ३ मालेख्यं ४ विशेषकच्छेद्यं ५ चित्रकर्माणि ६ तंडुलकुसुमबलिविकाराः ७ पुष्पास्तरणं ८ दशनवसनांगरागाः ९ मणिभूमिकाकर्म १० शयनरचना ११ उदकवाद्यं १२ उदकाघाताः १३ चित्राश्चयोगाः १४ दौर्भाग्यकैंडियपलितीकरणादयः १५ माल्यग्रथनविकल्पाः शेखरकापीडयोजनं १६ नेपथ्यप्रयोगाः १७ कर्णपत्रभंगाः १८ गंधयुक्तिः १९ भूषणयोजना २० ऐंद्रजालाः २१ कौटुमाराश्चयोगसुभगकरणादयः २२ हस्तलाघवं २३ विचित्रशाकयूषभक्ष्यविकारक्रियापानकरसरागासवयोजनं २४ सूचीवानकर्माणि २५ तत्र क्रीडा २६ वीणाडमरुकवाद्यं २७ प्रहेलिका २८ प्रतिमाला ग्रंत्याक्षरिकेत्यर्थः २९ दुर्वचकयोगाः ३० पुस्तकवाचनं ३१ नाटकाख्यायिकादर्शनं ३२ काव्यसमस्यापूरणं ३३ पट्टिकावेत्रवानविकल्पाः ३४ तर्कुकर्माणि ३५ तक्षणं ३६ वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८ धातुवादः ३९ मणिरागाकरज्ञानं ४० वृक्षायुर्वेदयोगाः ४१ मेषकुक्कुटलावकयुद्धविधिः ४२.

शुकसारिकाप्रलापनं ४३ उन्मादने केशमर्दने च कौशलं ४४ अक्षरमुद्राकथनं ४५ म्लेच्छित-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देह- विकल्पः ४६ देशभाषाविज्ञानं ४७ पुष्पशकटिका ४८ यंत्रमातृका ४९ धारणमातृका ५० संपाद्यं
व्या० ५१ मानसी ५२ काव्यक्रिया ५३ अभिधानकोशः ५४ छंदोज्ञानं ५५ क्रियाकल्पः ५६ छलित्रिक-
योगाः ५७ वस्त्रगोपनानि ५८ द्यूतविशेषाः ५९ आकर्षक्रीडा ६० बालक्रीडनकानि ६१ हस्त्यश्व-
१२५ शिक्षादिवैनयिकविज्ञानं ६२ शस्त्रविद्यादिवैजयिकविद्याज्ञानं ६३ मृगयादिवैयामिकविद्याज्ञानं ६४.
अथ चासां प्रयोगिकाश्चतुःषष्टिर्महिलागुणास्ते चेत्थं—आलिंगनचुंबननखच्छेद्यदशनच्छेद्यसंवेशनसी-
त्कृतपुरुषायितौपरिष्टकानामष्टाष्टविकल्पभेदादष्टवेष्टकाश्चतुःषष्टिः, तत्र स्पृष्टकं विद्धकमुपृष्टकं पीडितकं
लतावेष्टितकं वृक्षाधिरूढकं तिलतंडुलकं क्षीरजलकमित्यालिंगनविकल्पाः. निमित्तकं स्फुरितकं घ-
ट्टितकं समग्रहणं तिर्यग्ग्रहणं भ्रांतं अवपीडितं उत्पीडितकमिति चुंबनविकल्पाः. उत्फुल्लकं विजृं-
भितं इंद्राणीपार्श्वसंपुटं उत्तानसंपुटं पीडितकं चेष्टितकं वाडवकमिति उद्भुमकं विजृंभितकं पीडित-
कमर्धपीडितकं वेणुदारितकं शूलांचितकं कार्कटकं पद्मासनकमिति संवेशनविकल्पाः. हिंकारस्तनित-
रुदितकूजितसूत्कृतपूत्कृतदूत्कृतानीति सप्ताव्यक्ताक्षराणि अंबार्थाविमर्थमोक्षणार्थप्रयोगश्चाष्टममिति.
पारापतादिविरुतभेदाद्राशीकृतविकल्पाः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ हस्तकं प्रसृतकं मुष्टिः समलं कीलाकपूरीविद्दामदंसिकाभेदादष्टधा प्रहरणं तु सीत्कृत एवांतर्भूतं प्रहणनोद्भवत्वात्सीत्कृतस्येति. उपसृप्तकं मंथनं हुलोवर्दनं पीडितकं निर्घातो वराहघातो वृषाघातश्चटकविलसितं संपुटकं संशो भ्रमरकः प्रेंखोलितमिति विकल्पानां कचित्केषांचिदंतर्भावेऽष्टौ पुरुषायितविकल्पाः. निमित्तकं पार्श्वदष्टं बहिः संदंशः, अंतः संदंशः, चुंबितकं परिघृष्टमाम्रचूषितकं सागर इत्यौपरिष्टकविकल्पाः, एतेषां परिज्ञानं कौशलं चतुःषष्टिर्महिलागुणास्तान्, एतेषां सर्वेषामपि व्याख्यानं जयमंगलातोऽवसेयं. शिल्पशतं च कुंभकारलोहकारचित्रकारतंतुवायनापितशिल्पानां पंचानां प्रत्येकं विंशतिभेदत्वात्, तथा चार्षे—पंचेव य सिप्पाइं। घडलोहे चित्तणं च कासवए॥ एक्केकस्स य इत्तो। वीसं वीसं भवे भेया॥ १॥ 'कम्माणंति' कर्मणां कृषिवाणिज्यादीनां मध्ये शिल्पशतमेवोपदिष्टवान्, अत एवानाचार्योपदेशजं कर्म, आचार्योपदेशजं तु शिल्पमिति कर्मशिल्पयोः प्रति विशेषमामनंति.

कर्माणि हि क्रमेण स्वयमुत्पन्नानि, एतानि त्रीण्यपि द्वासप्ततिकलाचतुःषष्टिमहिलागुणशिल्पशताख्यानि वस्तूनि प्रजाहिताय भगवानुपदिशतिस्मेत्यर्थः. 'चउमुट्ठियं लोयंति' एकां हि मु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टिं केशानामवशिष्यमाणां पवनांदोलितां कनककलशोपरि नीलोत्पलपिधानानुकारिणीमुन्नयतः स्कंधोपरि लुलंतीं वीक्ष्य प्रमुदितहृदयेन शक्रेण सोपरोधं विज्ञप्तो भगवान् रक्षितवान्. 'दुविहा अंतकडभूमीत्यादि' युगांतकृद्भूमिरसंख्येयानि पुरुषयुगानि भगवंतोऽन्वयक्रमे सिद्धानीति. पर्यायांतकृद्भूमिस्तु भगवतः केवले समुत्पन्नेंतर्मुहूर्तेन स्वामिनी मरुदेवांतकृत्केवलितां प्राप्तेति. 'सुसुमदुसमाएत्ति' तृतीयारके एकोननवतिपक्षावशेषे भगवान् सिद्धः. 'उप्पिंति' उपर्यष्टापदशैलशिखरस्य 'चउद्दसमेणं भत्तेणंति' उपवासषट्केन चतुर्दशभक्तपरित्यागात्.

॥ इति चतुर्विंशतिजिनचरित्राणि समाप्तानि. ॥

---

सांप्रतं स्थविरावलीं वक्तुकामः प्रक्रमते—'तेणं कालेणं' इत्यादि, 'से केणट्ठेणं' इत्यत्र सशब्दोऽथशब्दार्थः, प्रश्नयितुरयमभिप्रायः किल, 'जावइया जस्स गणा तावइया गणहरा तस्सेत्ति' वचनाद्गणधरमाना एव गणाः सर्वजिनानां, श्रीवीरस्य तु किमर्थं नव गणा एकादश गणधरा इति. आचार्य आह—'समणस्सेत्यादि' अकंपिताचलभ्रात्रोरेकरूपैव वाचना, एवं मेतार्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभासयोरपीति युक्तं नव गणा एकादश गणधरा इति. एकवाचनाचारसमुदायो हि गण इतिभा· वः. ' मंम्यिपुत्तत्ति ' मंडिकश्चासौ नाम्ना पुत्रश्च धनदेवस्येति मंडिकपुत्र इति समासः, केचिच्च मंम्ति इति नाम व्याचक्षते, अन्ये च ' मंम्यित्ति ' मंडितस्य पुत्रो मंडितपुत्र इति समर्थयंति.

तत्र च मंम्ति इति धनदेवस्य नामांतरमूह्यं, मंम्तिमौर्ययोरेकमातृकत्वेन भ्रात्रोरपि यद्भिन्न· गोत्राभिधानं तत्पृथक्जनकापेक्षया, तत्र मंडिकस्य पिता धनदेवो मौर्यपुत्रस्य च मौर्यः, माता तु विजयदेव्येवैका. अविरोधश्च तत्र देशे एकस्मिन् पत्यौ मृते द्वितीयपतिधरणस्येति वृद्धाः. ' अ· ज्जो ' इति, हे आर्य नव गणधरा भगवति जीवत्येव सिद्धिं प्राप्ताः, इंद्रभूतिसुधर्माणौ तु तस्मिन् सिद्धिं गते सिद्धावित्येतदाह—' सव्वे एए ' इत्यादि. द्वादशांगिन आचारादिदृष्टिवादांतश्रुतवंतः स्वयं प्रणयनात्, चतुर्दशपूर्विणः, द्वादशांगिन इत्येतेनैव चतुर्दशपूर्वित्वे लब्धे यत्पुनरेतदुपादानं तदंगेषु चतुर्दशपूर्वाणां प्राधान्यख्यापनार्थं, प्राधान्यं पूर्वप्रणयनादनेकविद्यामंत्राद्यर्थमयत्वान्महाप्र· माणत्वाच्च द्वादशांगित्वं चतुर्दशपूर्वित्वं च सूत्रमात्रे ग्रहणेऽपि स्यादिति तदपोहार्थमाह—

समस्तगणिपिटकधारकाः, गणोऽस्यास्तीति गणी भावाचार्यस्तस्य पिटकमिव रत्नादिकरंडकमि·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व गणिपिटकं द्वादशांगी तदपि, न देशता स्थूलनद्रस्येव, किंतु समस्तं सर्वाक्षरसन्निपातत्वात्. तद्धारयंति सूत्रतोऽर्थतश्च ये ते तथा 'अज्जत्ताए' आर्यतया अद्यतनयुगे वा. 'अवच्चिज्जा' अपत्यानि तत्संतानजा इत्यर्थः, निरपत्याः शिष्यसंतानरहिताः, स्वस्वमरणकाले स्वस्वगणस्य श्रीसुधर्मस्वामिनि निसर्गात्. संक्षिप्तवाचनायां 'सुठियसुपडिबुद्धाणंति' सुस्थितौ सुविहितक्रियानिष्ठौ, सुप्रतिबद्धौ सुज्ञाततत्वौ ततो विशेषणकर्मधारयः. कोटिककाकंदिकाविति नामानौ, अन्ये त्विदमाचक्षते सुस्थितसुप्रतिबद्धाविति नाम, कोटिककाकंदिकाविति बिरुदप्रायं विशेषणं. कोटिशः सूरिमंत्रजापपरिज्ञानादिना कोटिकौ, काकंद्यां नगर्यां जातत्वात् काकंदकौ, ततो विशेषणसमासः.

ये तु सुस्थितसुप्रतिबुद्ध इत्येकमेव नाम मन्यंते तदभिप्रायं न विद्मो द्वित्व व्याघातात, यदि परं मधुकैटभन्यायेन सुस्थितेन सह चरितः सुप्रतिबुद्धः सुस्थितसुप्रतिबुद्ध इति पक्षः शरणं, तत्र च पूज्यत्वाद्बहुवचनं ज्ञेयं. विस्तरवाचना सुगमैव, नवरं बहवोऽत्र वाचनाभेदा लेखकवैगुण्याज्जाताः, तत्तत्स्थविराणां च शाखाः कुलानि च प्रायः सांप्रतं नानुवर्तते, नामांतरतिरोहितानि वा भविष्यंति, अतो निर्णयः कर्तुं न पार्यते पाठेषु. तथाहि—शाखासु क्वचिदादर्शे कौटुंबाणीति दृश्यते, क्वचित्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुंडधारीति, तथा क्वचित् ' पुण्णपत्तिया ' इति, क्वचित ' सुपण्णपत्तिया ' इति. एवं कुलेष्वपि क्वचित् ' उल्लगच्छतइयंति ' पाठः, क्वचित ' अहउल्लगंधतइयंति ' तस्मादत्र बहुश्रुता एव प्रमाणं, मात्भूत्सूत्रमिति. तत्र कुलमेकाचार्यसंततिः, शाखास्तु तस्यामेव संततौ पुरुषविशेषाणां पृथक्पृथगन्वयाः एकवाचनाचारयतिसमुदायो गणः, तच्च कुलं विणेयं । एगायरियस्स संततीजाउ ॥ दोण्ह कुलाणमिहो पुण । साविक्खाणं गणो होइ ॥ १ ॥ इति वचनात्. अथवा शाखा विवक्षिताद्यपुरुषस्य संतानो यथा वैरस्वामिनाम्ना वैरशाखाऽस्माकं, कुलानि तु तच्छिष्याणां पृथक्पृथगन्वयाः, यथा चांद्रं कुलं नागेंद्रं कुलमित्यादि. ' अहावच्चा ' इति यथार्थान्यपत्यानि यथापत्यानि, न पतंति येन जातेन दुर्गतावयशःपंके वा पूर्वजास्तदपत्यमिति ह्यपत्यलक्षणं, सुशिष्याश्च सद्वृत्ताः पूर्वजान् प्रत्युत प्रकाशयंतीति. अत एवाभिज्ञाताः प्रख्याताः, पणास्थाने क्वचित्सेणा इति दृश्यते.

' छलुए रोहगुत्तेत्ति ' विप्रतिपत्त्यवस्थायां द्रव्यगुणकर्मसामान्यविशेषसमवायाख्यषट्पदार्थप्ररूपकत्वात्, गोत्रेण उलूकत्वात् उलूकः, षट् चासावुलूकश्च षडुलूकः. उलूकत्वमेव व्यनक्ति— ' कोसिअगोत्तेणंति ' उलूककौशिकशब्दयोर्नार्थभेदः. ' तेरासियत्ति ' त्रैराशिका जीवाजीवनो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवाख्यराशित्रयप्ररूपिणः, तच्छिष्यप्रशिष्याः. अयं हि अंतरंजिकायां पुरि पोट्टशालाभिधं परिव्राजकप्रवादिनं वृश्चिक्यादिसप्तविद्याप्रौढं गुरुदत्तमदार्यादिविद्याभिः प्रतिहत्य तेन राशिद्वयकक्षायां कक्षीकृतायां तद्बुद्धिपरिभवार्थं राशित्रयं व्यवस्थाप्य तं वादे पराजित्य गुरुसमीपमागत्य सर्वं स्ववृत्तं व्यज्ञपयत्, गुरुणोक्तं वत्स साध्वकार्षीः, परं राशित्रयप्ररूपणमुत्सूत्रमिति ददस्व मिथ्यादुष्कृतं, स च कथमिव तथाविधायां परिषदि तथा प्रज्ञाप्य स्ववचनमप्यप्रमाणयामीत्यवलेपान्न प्रत्यपादि गुरुभिरुपपाद्यमानमपि राशिद्वयं, ततः षण्मासीं यावद्राजसभायां वादमासूत्र्य चतुश्चत्वारिंशेन पृच्छाशतेन निर्लोठ्य कथमप्याग्रहममुंचंतममुं गुरुः कोपाटोपात्खेलकमात्रकभस्मक्षेपेण मूर्ध्नि गुंडयित्वा संघबाह्यमकरोत्, ततस्तस्मात् षष्ठनिह्नवात् त्रैराशिका जाताः, क्रमेण वैशेषिकदर्शनं ततः प्ररूढमिति. ' कोडुंबाणी ' इति क्वचित् कुंभधारीत्युक्तं. आर्यरोहणः १ भद्रयशाः २ मेघः ३ कामर्द्धिः ४ सुस्थितः ५ सुप्रतिबुद्धः ६ रक्षितः ७ रोहगुप्तः ८ ऋषिगुप्तः ९ श्रीगुप्तः १० ब्रह्मा ११ सोमः १२ इति द्वादश गणधराः सुहस्तिशिष्याः. ' पुप्फपत्तिया ' इति, क्वचित् ' सुवण्णपत्तिया ' इति. अह ' उल्लगच्छतइयंति ' क्वचित् ' उल्लगंथ ' इति पाठः. ' परिहाय संहोइत्ति ' क्वचित् ' परिभासियं ' इति पाठः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यत्र परिहासयं इति. ' विद्यानागरत्ति ' क्वचित् ' वज्जानागरित्ति ' ' अज्जसेम्यियंति ' क्वचित् ' अज्जचेम्मयंति ' पाठः.

' पएहवाहणयंति ' प्रश्नवाहनकुले मलधारिगच्छः, अत एवास्माभिर्नामांतरतिरोहितानीति प्राग्न्युहितं, ' बंभदीविया साहित्ति ' आर्यसमिताचार्या हि नद्यां योगचूर्णं निःक्षिप्य पादप्रक्षेपमात्रेण जलोपरिगमनविस्मायितजनस्य पाखंडिनो दर्पखंडनं विधाय प्रवचनप्रभावनया ब्रह्मद्वीपिकांस्तापसान् प्रत्यबूबुधन्. तेभ्यो ब्रह्मद्वीपिका शाखा निर्गता. अत्रांतरे ' वंदामि फग्गुमित्तं च ' इत्यादिगाथावृंदं बहुष्वादर्शेषु न दृश्यते, कतिपयपुस्तकेषु च ' थेरस्स णं अज्जफग्गुमित्तस्स गोयमगुत्तस्स अज्जधणगिरी थेरे अंतेवासी वासिठस्स गोत्ते ' इत्यादि यावत् ' थेरस्स णं अज्जसीहस्स कासवगोत्तस्स अज्जधम्मे थेरे अंतेवासी कासवगोत्ते, थेरस्स णं अज्जधम्मस्स कासवगोत्तस्स अज्जसंम्मिले थेरे अंतेवासी ' इति पर्यंतं दृश्यते, तदनंतरं च ' वंदामि फग्गुमित्तं च ' इत्यादिगाथाः, तत्र च गद्योक्तोऽर्थः पुनः पद्यैः संगृहीत इति न पौनरुक्त्यं भावनीयं.

' कुत्संति ' कुत्समगोत्रं, ' कंटेत्ति ' क्वचित् ' कएहेत्ति अज्जनांगंति ' क्वचित् ' अज्जागंग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति ’ दृश्यते. ‘ जेहिलंति ’ क्वचित् ‘ जेठिलंति ’ दृष्टं. ‘ संपलियंति ’ क्वचित् ‘ अप्पलियंति ’. ‘ गिम्हाणेत्ति ’ ग्रीष्मशब्दः स्त्रीलिंगो बहुवचनांतश्च, ग्रीष्मस्य प्रथममासे चैत्रे ‘ सुद्धस्सत्ति ’ शुक्लपक्षे कालगतं. ‘ वरमुत्तमंति ’ वरा श्रेष्ठा मा लक्ष्मीस्तस्या उत्तमं छत्रं वहति यस्य शिरसि धारयति, देवः पूर्वसंगतिकः कोऽपि, ‘ मिउमद्दवसंपन्नंति ’ मृदुना मधुरेण मार्दवेन मानपरित्यागेन संपन्नं, अथवा मृदुं करुणार्द्रहृदयं, अद्रवसंपन्नं न द्रवेण नर्मणा संपन्नमद्रवसंपन्नं. इयं च स्थविरावली मंगलार्थं पठ्यते, यदुक्तं निर्युक्तौ—पुरिमचरिमाण कप्पो । मंगलं वद्धमाणतित्थंमि ॥ तो परिकहिया जिणपरि—कहाय थेरावली चेव ॥ १ ॥ अत्र चूर्णिः—पुरिमपच्छिमजिणाणं एस मग्गो चेव, जहा वासावासं पज्जोसवेयव्वं, पडउ वासं मावा मज्झिमगाणं पुण भयणिज्जं अविय वद्धमाणतित्थंमि मंगलनिमित्तं जिणगणहरावलिया सव्वेसिं च जिणाणं, समोसरणाणि परिकहिज्जंतित्ति, समवसरणानि वर्षाचतुर्मासिकावस्थानरूपाणि. गता स्थविरावली.

सांप्रतं पर्युषणासामाचारीं विवक्षुरादौ पर्युषणा कदा विधेयेति श्रीमहावीरतद्गणधरतच्छिष्यादिदृष्टांतेनाह—‘ तेणं कालेणं ’ इत्यादि ‘ वासाणंति ’ आषाढचतुर्मासकदिनादारभ्य सविंशतिरात्रे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मासे व्यतिक्रांते भगवान् ‘ पज्जोसवेइत्ति ’ पर्युषणामकार्षीत्. ‘ से केणेत्यादि ’ प्रश्नवाक्यं ‘ जणं ’ इत्यादि निर्वचनवाक्यं, अगारिणां गृहस्थानां अगाराणि गृहाणि, ‘ कडियाइं ’ कटयुक्तानि ‘ उक्कंपियाइं ’ धवलितानि ‘ छन्नाइं ’ तृणादिभिः ‘ लित्ताइं ’ छगणाद्यैः, कचित् ‘ गुत्ताइंति ’ पाठः, तत्र गुप्तानि वृत्तिकरणद्वारपिधानादिभिः ‘ घट्ठाइं ’ विषमभूमिभंजनात् ‘ मट्ठाइं ’ श्लक्ष्णीकृतानि, क्वचित् ‘ संमट्ठाइंति ’ पाठः, तत्र समंतान् मृष्टानि मसृणीकृतानि संमृष्टानि.

‘ संपधूमियाइं ’ सौगंध्यापादनार्थं धूपनैर्वासितानि ‘ खातोदगाइं ’ कृतप्रणालिरूपजलमार्गाणि, ‘ खायनिद्धमणाइंति ’ खालं गृहात् सलीलं येन निर्गच्छति. ‘ अप्पणो अट्ठाए ’ आत्मार्थं स्वार्थं गृहस्थैः कृतानि परिकर्मितानि, करोतेः कार्मं करोतीत्यादाविति परिकर्मार्थत्वात् परिभुक्तानि तैः, स्वयं परिभुज्यमानत्वात्, अत एव परिणामितानि अचित्तीकृतानि भवंति. ततः सविंशतिरात्रे मासे गते अमी अधिकरणदोषा न भवंति, पुनः प्रथममेव साधवः स्थिताः स्म इति ब्रूयुस्तदा ते प्रव्रजितानामवस्थानेन सुभिक्षं संभाव्य गृहिणस्तप्तायोगोलकल्पा दंतालक्षेत्रकर्षणगृहच्छादनादीनि कुर्युः. तथा चाधिकरणदोषाः, अतस्तत्परिहाराय पंचाशतादिनैः स्थिताः स्म इति वाच्यं, चूर्णिकारस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



' कडियाहिं पासेहिंतो कंबियाणि उवरिं ' इत्याह, स्थविराः स्थविरकल्पिकाः. ' अज्जत्ताए ' इति अद्यकालीनाः, आर्यतया व्रतस्थविरत्वेन इत्येके, ' अंतराविय ' इत्यादि अंतरापि च, अर्वागपि कल्पते पर्युषितुं, न कल्पते तां रजनीं भाद्रपदशुक्लपंचमीं ' उवायणावित्तएत्ति ' अतिक्रमितुं.

इह हि पर्युषणा द्विधा गृहिज्ञाताज्ञातभेदात्, तत्र गृहीणामज्ञाता यस्यां वर्षायोग्यपीठफलकादौ यत्ने कल्पोक्ता द्रव्यक्षेत्रकालभावस्थापना क्रियते, साषाढपौर्णमास्यां पंचपंचदिनवृद्ध्या यावद्भाद्रपदसितपंचम्या वैकादशसु पर्वतिथिषु क्रियते. गृही ज्ञाता तु यस्यां सांवत्सरिकातिचारालोचनं लुंचनं पर्युषणाकल्पसूत्रकर्षणं चैत्यपरिपाटी अष्टमं सांवत्सरिकप्रतिक्रमणं च क्रियते, यथा सा च व्रतपर्यायवर्षाणि गण्यंते सा नभस्य शुक्लपंचम्यां कालिकसूर्यादेशाच्चतुर्थ्यामपि जनप्रकटं कार्या, यत्पुनरभिवर्धितवर्षे दिनविंशत्या पर्युषितव्यमिति उच्यते तत्सिद्धांतटिप्पनानामनुसारेण, तत्र हि युगमध्ये पौषो युगांते चाषाढ एव वर्धते, नान्ये मासास्तानि चाधुना न सम्यग्ज्ञायंते, अतो दिनपंचाशतैव पर्युषणा संगतेति वृद्धाः, ततश्च कालावग्रहो जघन्यतो नभस्यसितपंचम्या आरभ्य कार्तिकचतुर्मासांतः सप्ततिदिनमानः, उत्कर्षतो वर्षायोग्यक्षेत्रांतराभावादाषाढमासकल्पेन सह वृष्टिस-

For Private And Personal Use Only

संदेह- व्या० १३६

ज्ञावान्मार्गशीर्षेणापि सह षण्मासा इति.

द्रव्यक्षेत्रकालज्ञावस्थापना चैवं—द्रव्यस्थापना तृणडगलक्षारमल्लकादीनां परिभोगः, सचित्तादीनां च परिहारः, तत्र सचित्तद्रव्यं शिष्यो न प्रव्राज्यते, अतिश्राद्धं राजामात्यादिकं वा विना अचित्तद्रव्यं वस्त्रादि न गृह्यते, मिश्रद्रव्यं शैक्षः सोपधिकः, एवमाहारविकृतिसंस्तारकादिद्रव्येषु परिज्ञोगपरिहारौ योज्यौ. क्षेत्रस्थापना सक्रोशं योजनं, कारणे बालग्लानवैद्यौषधादौ चत्वारि पंच वा योजनानि. कालस्थापना चत्वारो मासा यत्र तत्र कल्पंते, ज्ञावस्थापना क्रोधादीनां विवेकः, ईर्याज्ञाषादिसमितिषु चोपयोग इति कृतं विस्तरेण.

'वासावासं' इत्यादि, वर्षावासं पर्युषितानां निर्ग्रंथानां निर्ग्रंथीनां वा सर्वतश्चतसृषु दिक्षु समंताद्विदिक्षु च सक्रोशं योजनं अवग्रहमवगृह्य यथालंदमपि स्तोककालमप्यवग्रहे स्थातुं कल्पते, तत्रोदकार्द्रः करो यावता शुष्यति तावान् कालो जघन्यं लंदं उत्कृष्टं पंचाहोरात्रस्तयोरंतरं मध्यं, यथा रेफप्रकृतिरप्यरेफप्रकृतिरपीति, एवं लंदमप्यवग्रहे स्थातुं कल्पते, अलंदमपि यावत् षण्मासान् एकत्रावग्रहे स्थातुं कल्पते, उपाश्रयात्सार्धक्रोशद्वयं चतसृषु दिक्षु ऊर्ध्वाधोमध्यग्रामान् विना गजेंद्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदादिगिरेर्मेखलाग्रामस्थितानां तु षट्सु दिक्षु गमागमेन पंचक्रोशावग्रहः, यद्यानंतरं विदिक्ष्वित्युक्तं तद्व्यावहारिकविदिगपेक्षया, भवंति हि ग्रामा मूलग्रामादाग्नेय्यादिविदिक्षु नैश्चयिकविदिक्षु चैकप्रदेशात्मकत्वान्न गमनागमनसंभव इति. अटवीजलादिना व्याघाते तु त्रिदिको द्विदिक एकदिको वावग्रहो भावनीयः. ' जत्थणं नदी ' इत्यादि, नित्योदका नित्यस्तोकजला, नित्यस्यंदना सततवाहिनी इरावतीनामनदी कुणालापुर्यां द्विक्रोशं सदा वहति, तादृशीं नदीं लंघितुं न कल्पते, स्तोकजलत्वात् ' जत्थ सक्किया ' यत्र शक्नुयात् ' सिया ' यद्येकं पादं जले जलमध्ये निक्षिप्य एकं च पादं स्थले आकाशे कृत्वा द्वाभ्यां पादाभ्यां अविलोडयन् गंतुं शक्नुयात्तदा तत्परतः स्थिते ग्रामादौ भिक्षाचर्या कल्पते, नान्यथा, एकं पादं जलांतः क्षिपति, द्वितीयं जलादुपर्युत्पाटयति तदा कल्पते.

यत्र च पदद्वयेनापि जलं विलोड्यते तत्र गंतुं प्रत्यागंतुं च न कल्पते इत्यर्थः. यत्र च न शक्नुयाद्गत्वा प्रत्यागंतुं तत्र न गच्छेत. यत्र जंघार्द्धं यावदुदकं स दकसंघट्टः, नाभिंयावल्लेपः, तत्परतो लेपोपरि, तत्र ऋतुबद्धे काले भिक्षाचर्यायां यत्र त्रयोदकसंघट्टा वर्षासु च सप्त भवेयुस्तत्क्षेत्रं नाप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हन्यते, चतुरादिभिरष्टाभिश्च तैरुपहन्यते, ते च ऋतुबद्धे गतागतेन षट् वर्षासु चतुर्दश स्युः, लेपश्चैकोऽपि क्षेत्रमुपहंति, लेपोपरि तु किं वाच्यं!! तथा यदि चतुरो मासानेकद्वित्र्यादिदिनोनान्वा उपोषितः स्थातुं न शक्नोति तदा जघन्यतोऽपि पूर्वक्रमेण नमस्कारसहितादेः पौरुष्यादितपोवृद्धिं कुर्यादिति. ' अत्थेगइयाणं ' इत्यादि, अस्त्येतद्यदेकेषां साधूनां पुरतः, एवमुक्तपूर्वं भवति, गुरुभिरिति गम्यते. चूर्णौ तु ' अत्थेगइयाणं आयरिया ' इत्युक्तं, ' अत्थं भासेइ आयरिउ ' इति वचनात्, अर्थ एवानुयोग एव, एकायिता एकाग्रता अर्थैकायितास्तेषामथवास्त्येतद्यदेकेषामाचार्याणामिदमुक्तपूर्वं भवतीत्येवं व्याख्येयं, तत्र च षष्टी तृतीयार्थे, ततश्चाचार्यैरिदमुक्तं भवति. ' भंतेत्ति ' हे भदंत कल्याणिन् साधो ' दावे ' इति ग्लानाय दद्याः, स्वार्थिको णो वा दापयेद्द्याः, अशनादिकमानीयेति गम्यते. अनेन च ग्लानदानदेशेनाद्यचतुर्मासकादौ स्वयं मा प्रतिगृह्णीया इत्युक्तं, एवमुक्ते से तस्य साधोः कल्पते दातुमर्थाद्ग्लानाय, न स्वयं प्रतिगृहीतुं गुरुणाननुज्ञातत्वात्.

अथ गुरुणोक्तं स्वयं प्रतिगृह्णीया ग्लानायान्यो दास्यति न वाद्य भोक्ष्यते इति, ततः प्रतिगृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हीतुं कल्पते, न ग्लानाय दातुं, अथ गुरुणोक्तं स्याद्भदंत दद्याश्च ग्लानाय प्रतिगृह्णीयाश्च, यदद्य त्वमक्षमोऽसीति, ततो दानं स्वस्मै प्रतिग्रहणं च कल्पते, अनुक्तश्चेद्ग्लानायानयति स्वयं वा गृह्णाति, ततः परिष्ठापनिकादोषोऽजीर्णादिग्लानत्वं वा मोहोद्भवो वा क्षीरादौ च धरणाधरणे आत्मसंयमविराधनेति. ' हठाणं ' इत्यादि, हृष्टानां तरुणत्वेन समर्थानां, युवानोऽपि केचित् सरोगाः स्युरित्याह—अरोगाणां क्वचित् ' आरोग्गाणंति ' पाठस्तत्रारोग्यमस्त्येषामित्यभ्रादित्वादप्रत्यय आरोग्यास्तेषां, युवानोऽपि नीरोगा अपि केचित कृशांगाः स्युरित्याह—

बलिकशरीराणां रसप्रधाना विकृतयस्ता अभीक्ष्णं पुनः पुनः आहरयितुं न कल्पंते, रसग्रहणं तासां मोहोद्भवहेतुत्वख्यापनार्थं, अभीक्ष्णग्रहणं पुष्टालंबने कदाचित्तासां परिभोगानुज्ञार्थं, नवग्रहणात् कदाचित पक्वान्नं गृह्यते. विकृतयश्च द्विविधाः, संचयिका असंचयिकाश्च. तत्र दुग्धदधिपक्वान्नविकृतयोऽसंचयिका ग्लानत्वे वा गुरुबालतपस्विगच्छोपग्रहार्थं वा श्रावकादरनिमंत्रणाद्वा ग्राह्याः, घृततैलगुडाख्याः संचयिकास्ताः प्रतिलाभयन् गृही वाच्यः, महान् कालोऽस्ति, ततो ग्लानादिकार्यं गृहीष्यामः, स वदेद्गृह्णीत चतुर्मासीं यावत् प्रभूताः संति, ततो ग्राह्या बालादीनां च देयाः, न त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुणानां निष्कारणं. यद्यपि मद्यादिवर्जनं यावज्जीवितमस्त्येव, तथापि कदाचिदत्यंतापवाददशायां ग्रहणेऽपि कृतपर्युषणानां सर्वथा निषेधः. 'अत्थेगइया' इत्यादि, अस्त्येतदेकेषां वैयावृत्त्यकरादीनामेवमुक्तपूर्वं भवति, गुरुं प्रतीति शेषः. हे भदंत भगवन्नर्थः प्रयोजनं ग्लानस्य विकृत्येति. एवं वैयावृत्तिकारेणोक्ते 'से य वइज्जा' स च गुरुर्वदेत् 'से य पुच्छे' इति, तं च ग्लानं स वैयावृत्त्यकरः पृच्छति.

क्वचित् 'से य पुच्छियव्वे' इति पाठः, तत्र स ग्लानः पृष्टव्यः, किं पृच्छतीत्याह—'केवइएणं अट्ठो' कियता विकृतिजातेन क्षीरादिना तवार्थः? तेन च ग्लानेन स्वप्रमाणे उक्ते स वैयावृत्त्यकरो गुरोरग्रे आगत्य ब्रूयात 'एवइएणं अट्ठो गिलाणस्स' इयता अर्थो ग्लानस्य, ततो गुरुराह 'जं से' इति यत्स ग्लानः प्रमाणं वदति तत्प्रमाणेन 'से' इति तद्विकृतिजातं ग्राह्यं, त्वया, 'से य विण्णविज्जा' स च वैयावृत्त्यकरादिर्विज्ञपयेत याचेत गृहस्थपार्श्वात्, विज्ञपिधातुरत्र याञ्चायां, स च याचमानो लभेत तद्वस्तु तच्च प्रमाणप्राप्तं च पर्याप्तं जातं. ततश्च 'होउ अलाहित्ति' साधुप्रसिद्ध इच्छेति शब्दार्थे भवत्विति पदं. 'अलाहित्ति' श्रुतमित्यर्थः, अलाहि निवारणे इति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनादन्यन्मादा इति वक्तव्यं स्याद् गृहस्थंप्रति. ततः स गृही प्राह 'किमाहु भंते' अथ किमाहुर्भदंताः, किमर्थं श्रुतमिति ब्रुवते भवंत इत्यर्थः, साधुराह 'एवइएणं अठो गिलाणस्स' एतावतार्थो ग्लानस्य 'मया' कदाचित् एवं साधुमेवं वदंतं परो दाता गृही वेदत्, किं वदेदित्याह– 'अज्जो' इत्यादि, हे आर्य प्रतिगृहाण त्वं पश्चादधिकं तत्त्वं भोदयसे भुंजीथाः पक्कान्नादि, पास्यसि पिबेस्त्वं क्षीरादि, क्वचित पाहिसिस्थाने 'दाहिसित्ति' दृश्यते, तच्चातीव हृद्यं स्वयं वा भुंजीथाः, अन्यसाधोर्वा दद्या इति. एवमुक्ते गृहिणा से तस्य साधोः कल्पते प्रतिगृहीतुं, न पुनर्ग्लाननिश्रया गार्ध्यात्स्वयं गृहीतुं, ग्लानार्थं याचितं मंडव्यां नानेयमित्याकूतं. 'तहप्पगाराइं' इत्यादि, तथाप्रकाराणि अजुगुप्सितानि गृहिणां कुलानि 'कडाइंति' कृतानि तैरन्यैर्वा श्रावकत्वं श्राद्धत्वं वा ग्राहितानि, 'पत्तियाइंति' प्रत्ययितानि प्रीतिकराणि वा.

'थिज्जाइंति' स्थैर्यमस्त्येष्विति स्थैर्याणि, प्रीतौ दाने च स्थिराणि 'वेसासियाइंति' ध्रुवं लप्स्येऽहं तत्रेति विश्वासो येषु तानि वैश्वासिकानि, 'संमयाइंति' संमतयतिप्रवेशानि 'बहुमयाइंति' बहवोऽपि साधवो, नैको द्वौ वा मतौ येषु, बहूनां वा गृहमनुष्याणां मतः साधुप्रवेशो ये-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षु तानि बहुमतानि. 'अणुमयाइंति' अनुमतानि दातुमनुज्ञातानि, अणुरपि क्षुल्लकोऽपि मतो येषु, सर्वसाधुसाधारणत्वात्, न पुनर्मुखं दृष्ट्वा तिलकं कर्षतीत्यणुमतानीति वा येषु कुलेषु, 'से' तस्य साधोः 'अदक्खु' इति वाच्यं, वस्त्वदृष्ट्वा न कल्पते वक्तुं यथास्ति ते आयुष्मन्नमुकममुकं वा वस्त्विति, यतः 'सड्ढीत्ति' श्रद्धावान् दानवासनिको गृही तत्साधुयाचितं वस्तु गृह्णीत वा मूल्येन क्रीणीयात्, मूल्याभावे यत्यर्थं स्तैन्यमपि कुर्यात् चौर्येणाप्यानीय वितरेत् तद्वस्तु चंदनसक्थुमंमकादि पूर्वकथित उष्णोदके दुग्धे वा क्षिपेत्. आपणाद्वा आनयेत्, प्रामित्येकं कुर्यादिति. कृपणगृहेषु त्वदृष्ट्वापि याचने न तथा दोषा इत्यर्थः. 'निच्चभत्तियस्सत्ति' नित्यमेकाशनिनः 'एगं गोयरकालंति' एकस्मिन् गोचरचर्याकाले सूत्रपौरुष्यार्थपौरुष्यनंतरमित्यर्थः. 'गाहावइकुलं' गृहस्थवेश्म, 'भत्ताए वा' भक्तार्थं 'पाणए' पानार्थं 'णन्नत्थेत्यादि' णकारो वाक्यादावलंकारार्थः, अन्यत्राचार्यवैयावृत्त्यात, आचार्यवैयावृत्त्यादन्यत्र तद्वर्जयित्वेत्यर्थः. आचार्यवैयावृत्त्यं हि यद्येकवारभुक्तेन कर्तुं न पारयति तदा द्विरपि भुंक्तां, तपसो हि वैयावृत्त्यं गरीयः, एवमुपाध्यायादिष्वपि.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



' अवंजणया जायएणंति ' न व्यंजनानि बस्तिकूर्चकक्षादिरोमाणि जातानि यस्यासौ अव्यं· जनजातस्ततः स्वार्थे कः, अव्यंजनजातकात् क्षुल्लकादन्यत्र यावदद्यापि तस्य व्यंजनानि नोद्भिद्यंते, तावद् द्विरपि भोजनं न दुष्यतीत्यर्थः. अत्र च आचार्यश्च वैयावृत्त्यमस्यास्तीति अभ्रादित्वादप्रत्यये वैयावृत्त्यश्च वैयावृत्तिकर आचार्यवैयावृत्त्यौ, ताभ्यामन्यत्र, एवमुपाध्यायादिष्वपि नेयं. आचार्योपा· ध्यायतपस्विग्लानक्षुल्लकानां द्विर्भक्तस्याप्यनुज्ञातत्वादेवमपि व्याख्या. ' अयमेवइए ' इत्यादि, अ· यं वक्ष्यमाण एतावान् विशेषो यत्स आचार्योपाध्यायतपस्विग्लानक्षुल्लकेभ्योऽन्यसाधुः चतुर्थभोजी प्रातर्न चरमपौरुष्यां निष्क्रम्योपाश्रयादावश्यिकया निर्गत्य पूर्वमेव विकटमुद्गमादिशुद्धं भुक्त्वा प्राशु· काहारं, पीत्वा च तक्रादिकं संसृष्टकल्पं वा पतद्ग्रहं पात्रं संलिख्य निर्लेपीकृत्य संप्रमृज्य च प्रक्षा· ल्य ' सेयत्ति ' यदि संस्तरेन्निर्वहेत्तदा तत्र दिने तेनैव भक्तार्थेन भोजनेन परिवसेत. अथ न सं· स्तरेत् स्तोकत्वात्तदा ' दोच्चंपित्ति ' द्वितीयवेलायामपि भिक्षेतेत्यर्थः. षष्ठभक्तिकस्य द्वौ गोचरका· लौ, येन स कल्येऽप्युपवासं कर्ता, अष्टमभक्तिकस्य त्रयः, न च प्रातरटितमेव धारयेत, संचयसंस· क्तिसर्पाघ्राणादिदोषप्रसंगात. ' ' विकिठ भत्तियस्सत्ति ' अष्टमादूर्ध्वं तपो विकृष्टभक्तं, ' सव्वे गो·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यरकालेत्ति ' चतुरोऽपि प्रहरान्. एवमाहारविधिमुक्त्वा अथ पानकविधिमाह—

' सवाइं पाणगाइंति ' पानैषणोक्तानि वक्ष्यमाणानि वा ' नवोस्सेदिमादीनि ' तत्रोत्स्वेदिमं पिष्टजलं पिष्टभृतहस्तादिक्षालनजलं वा, संस्वेदिमं संसेकिमं वा, यत्पर्णाद्युत्काल्य शीतोदकेन सिच्यते तत्, चाउलोदकं तंदुलधावनोदकं, तिलोदकं महाराष्ट्रादिषु निस्त्वचिततिलधावनजलं, तुषोदकं व्रीह्यादिधावनं, यवोदकं यवधावनं, आयामेकोऽवस्रवणं, सौवीरकं कांजिकं, शुद्धविकटमुष्णोदकं. ' उसिणवियडेइत्ति ' उष्णजलं तदप्यसिक्तं यतः प्रायेणाष्टमोर्ध्वं तपस्विनो देहं देवता अधितिष्ठति. भत्तपडियाइक्खियस्सत्ति' प्रत्याख्यातभक्तस्यानशनिन इत्यर्थः. 'परिपूएत्ति' वस्त्रगलितं, अपरिपूते तृणकाष्ठादेर्गले लगनात्, तदपि परिमितं, अन्यथाऽजीर्णं स्यात्, क्वचित्, सेवि यणं बहुसंपुन्ने नो चेव णं अबहुसंपुन्ने ' इति दृश्यते. तत्र ईषदपरिसमाप्तं संपूर्णं बहुसंपूर्णं, नाम्नः प्राग्बहुर्वेत्ति बहुप्रत्ययः, अस्तोकतरे हि तृणमात्रस्यापि नोपशम इति. ' संखायदत्तियस्सत्ति ' संख्ययोपलक्षिता दत्तयो यस्येति संख्यादत्तिकस्तस्य दत्तिपरिमाणवत इत्यर्थः. ' लोणासायणंति ' लवणं किल स्तोकं दीयते, यदि वा तन्मात्रं भक्तपानस्य गृह्णाति सापि दत्तिर्गण्यते, अतो लवणास्वादनमात्रमपि प्रतिगृहीता दत्तिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यात्, पंचेत्युपलक्षणं, तेन चतस्रस्तिस्रो द्वे एका षट् सप्त वा यथाभिग्रहं वाच्याः, कदाचित्तेन पंच दत्तयो भोजनस्य लब्धास्तिस्रश्च पानकस्य, ततः पानकसत्का अवशिष्टा भोजने निक्षिपति तद्वर्धयतीत्यर्थः. भोजनसत्का वा पानके इत्येवं समावेशो न कल्पत इत्यर्थः. 'जाव उवस्सयाउ' इत्यादि, उपाश्रयाच्छय्यातरगृहादारभ्य यावत् सप्तगृहांतरं सप्तगृहमध्ये 'संखडिएनूपत्ति' संस्क्रियत इति संस्कृतिरोदनपाकस्तामेतुं गंतुं न कल्पते पिंडपानार्थं आहारार्थं तत्र न गच्छेदित्यर्थः. तेषां गृहाणां सन्निहिततया साधुगुणहृतहृदयत्वेनोद्गमादिदोषसंभवात्, एतावता शय्यातरगृहमन्यानि च षडासन्नगृहाणि वर्जयेदित्युक्तं. कस्य न कल्पत इत्याह—' सन्नियट्टचारिस्स ' निषिद्धगृहेभ्यः सन्निवृत्तः संश्चरति विहरतीति सन्निवृत्तचारी प्रतिषिद्धवर्जकसाधुस्तस्य. बहवस्त्वेवं व्याचक्षते, सप्तगृहांतरं संखडिं च जनसंकुलजेमनवारलक्षणां गंतुं न कल्पते, यदुक्तं प्रतिभाति तद्व्याख्यानं प्रमाणीकर्तव्यं. द्वितीयमते शय्यातरगृहमन्यानि च सप्तगृहाणि वर्जयेदित्युक्तं. तृतीयमते शय्यातरगृहमनंतरगृहं सप्त वान्यानि वर्जयेदित्युक्तं. ' उवस्सयस्स परेणंति ' उपाश्रयात परतः सप्तगृहांतरमेतुं न कल्पते, ' परंपरेणंति ' परंपरया व्यवधानेन सप्तगृहांतरमेतुं न कल्पते, शय्यातरगृहादनंतरमे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कं गृहं, ततः सप्तगृहा इति परंपरता.

'पाणिपडिग्गहियस्सत्ति' 'कणगफुसिया' फुसारमात्रं अवश्यायो महीकावर्षं वा वृष्टिकायो ऽप्कायवृष्टिः 'अगिहंसित्ति' अनाछादिते आकाश इत्यर्थः, पिंडपातमाहारं प्रतिगृह्य 'पज्जोसवित्तए' आहारयितुं न कल्पते. कदाचिदर्धभुक्तेऽपि वृष्टिपातः स्यात्. ननु जिनकल्पिकादयो दशपूर्वधरत्वेनातिशयज्ञानिनस्तैश्च प्रागेवोपयोगः कृतो भविष्यति, तत्कथमर्धभुक्ते वृष्टिसंभवः? सत्यं, छाद्मस्थिकोपयोगस्तथावास्यादन्यथा वेति न दोषः. 'पज्जोसवेमाणस्सत्ति' आकाशे भुंजानस्य यदि वर्षेत्तदा पिंमपातस्य देशमेकं भुक्त्वा देशं वादाय पाणिमाहारैकदेशसहितं पाणिना द्वितीयहस्तेन परिपिधायाछाद्य उरसि हृदयाग्रे निलीयेत निक्षिपेद्वा. 'णं' इति तं साहारं पाणिं कक्षायां वा संहरेदंतर्हितं कुर्यात्, एवं च कृत्वा यथाछन्नानि गृहिभिः स्वनिमित्तमाछादितानि निलयानि गृहाणि उपगछेद्वृक्षमूलानि वा. यथा से तस्य पाणौ दकादीनि न पर्यापद्यंते न विराध्यंते न पतंति वा, तत्र दकं बहवो बिंदवः, दकरजो बिंदुमात्रं, दगफुसिया फुसारं अवश्याय इत्यर्थः. उक्तमेवार्थं निगमयन्नाह—'वासावासं' इत्यादि. 'कणगफुसियमित्तंपित्ति' कणो लेशस्तन्मात्रं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कं पानीयं फुसिया फुसारमात्रं कणकस्य फुसिया कणकफुसिया. उक्तः पाणिपात्रस्य विधिः, इदानीं पतद्ग्रहधारिणस्तमाह—

'पडिग्गहधारिस्सेत्यादि' पतद्ग्रहधारिणः स्थविरकल्पिकस्य 'वग्घारियवुठिकाउं' अछिन्नधारा वृष्टिः यस्यां वा वर्षाकल्पश्चोतति, नीव्रं वा वर्षाकल्पं वा भित्वा अंतःकायमार्द्रयति वृष्टिस्तत्र विहर्तुं न कल्पते, अपवादात्त्वशिवादिकारणैर्भिक्षाकालाद्यकालवर्षिमेघाद्ययोग्यक्षेत्रस्थाः श्रुतपाठकास्तपस्विनः क्षुदसहाश्च भिक्षार्थं पूर्वपूर्वाभावेनौर्णिकेनौष्ट्रिकेण जायमानेन सौत्रेण वा कल्पेन तथा तालपत्रेण पलाशछत्रेण वा प्रावृता विहरंतीति. 'सांतरुत्तरंसित्ति' अंतरः सौत्रकल्पः, उत्तर ऊर्णिकस्ताभ्यां प्रावृतस्याल्पवृष्टौ गंतुं कल्पते, अथवा अंतरमिति कल्पः, उत्तरमिति वर्षाकल्पः कंबल्यादिः. चूर्णिकारस्त्वाह—अंतरं रयहरणं पडिग्गहो वा, उत्तरं उरणकप्पो, तेहिं सहत्ति. 'निगिज्झिय निगिज्झिय' इति स्थित्वा स्थित्वा वर्षति 'अहे उवस्सयं वा' इति, आत्मनः सांभोगिकानामितरेषां वा उपाश्रयस्याधस्तदभावे विकटगृहे आस्थानमंडपिकायां यत्र ग्राम्यपर्षदुपविशति, तत्र हि स्थितो वेलां वृष्टेः स्थितास्थितस्वरूपं च जानात्यशंकनीयश्च स्यात्, वृक्षमूले वा निर्गलक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रीरादौ, तत्र विकटगृहे वृक्षमूले वा स्थितस्य साधोः.

'पुव्वा गमणेणंति' आगमनात्पूर्वकालं, अथवा पूर्वं साधुरागतः, पश्चाद्दायको राध्धुं प्रवृत्त इति, पूर्वागमनेन हेतुना पूर्वायुक्तस्तंदुलोदनः कल्पते, पश्चादायुक्तोभिलिंगस्तणो न कल्पते, तत्र पूर्वायुक्तः साध्वागमात्पूर्वमेव स्वार्थं गृहस्थैः पक्तुमारब्धः, साधौ चागते यः पक्तुमारब्धः स पश्चादायुक्तः, स च न कल्पते, उद्गमादिदोषसंभवात, पूर्वायुक्तः कल्पते, दालिरुम्दिदालिर्वा सस्नेहसूपो वा, एवं शेषालापकद्वयमपि व्याख्येयं. संग्रहमाह—'जे से तत्थेत्यादि' स्पष्टं, अत्रैके वदंति, यच्चुल्यामारोपितं तत्पूर्वायुक्तं, अन्येत्वाहुर्यत्समीहितं तत्पूर्वायुक्तं, समीहितं नाम यत्पाकार्थमुपढौकितं, एतौ च द्वावप्यनादेशौ, आदेशस्त्वयं यत्साधोरागमनात्पूर्वं गृहिभिः स्वार्थमुपस्क्रियमाणं तत्पूर्वायुक्तं, तथा चागमः—पुव्वाउत्ताऽभितं । केसिंवि समीहियं तु जं तत्थ ॥ एतेन हुंति दुन्निवि । पुव्वपवत्तं तु जं तत्थ ॥ १ ॥

अनादेशत्वे त्वयं हेतुः—पुव्वारूढिते य समीहिते य । किं दुप्पई न खलु अन्नं ॥ तम्हा जं खलु उचियं । तं तु पमाणं न इयरं तु ॥ १ ॥ इति. 'वेलं उवायणावियत्तएत्ति' वेलामति-

For Private And Personal Use Only

क्रमयितुं तत्र च तिष्ठतः कदाचिद्वर्षं नोपरमति तत्र किं विधेयमित्याह—' वियडगं ' इत्यादि, विकटमुष्णमादि विशुद्धं भुक्त्वा पीत्वा च एकत्रायतं सुबद्धं भांडकं पात्रकाद्युपकरणं कृत्वा वपुषा सह प्रावृत्य वर्षत्यप्यनस्तमिते सूर्ये वसतावागंतव्यमेव, बहिर्वसतेर्बहवो दोषा एकाकिनस्तावदात्मपरोभय-समुत्थाः, साधवो वा वसतिस्था अधृतिं कुर्युरिति. तत्र विकटगृहमूलादौ कथं स्थेयमित्याह—

' नो कप्पइ एगस्सेत्यादि ' शंकादिदोषसंभवात्, एकाकित्वं कथं तस्येति चेत् उच्यते—संघाटिका उपोषितोऽसुखितोवा स्यात्कारणिको वा स एकाकीति. ' अत्थियइत्थ केइत्ति ' अस्ति वात्र कश्चित्पंचमः, ' अत्थियइं च केइत्ति ' पाठे तु थ इति वाक्यालंकारे, ' अत्थियाइंति ' भाषामात्रमस्ति वेत्यर्थः. ' खुड्डए वा खुड्डियावत्ति ' क्षुल्लकः साधूनां क्षुल्लिका साध्वीनां, साधुर्ह्यात्मना द्वितीय उत्सर्गतः, संयत्यस्तु त्र्यादयः, षट्कर्णो भिद्यते मंत्र इति न्यायात. ' अन्नेसिं वा संलोए इत्ति ' यत्र क्षुल्लकादिर्न स्यात् तत्रान्येषां ध्रुवकर्मिकलोहकारादीनां वर्षत्यप्यमुक्तस्वकर्मणां संलोके दृष्टिपथे, तत्रापि स प्रतिद्वारे सर्वतो द्वारे सर्वगृहाणां वा द्वारे ' एवएहं ' इति एवं कल्पते स्थातुं ' एहं ' इति वाक्यालंकारे. एवं निग्रंथस्य अगारीसूत्रे निग्रंथ्या आगारसूत्रे च ज्ञेयं, अगारम-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यास्तीत्यत्वादित्वादप्रत्ययेऽगारो गृही, ' अपरिणएणं ' इत्यादि, त्वं मम योग्यं अशनाद्यानयेरित्य-परिज्ञप्तेनाभाणि तेन अहं तव योग्यमशनाद्यानिष्ये इत्यपरिज्ञप्तस्यानुक्तस्यार्थाय कृतेऽशनादि प्रतिगृहीतुं न कल्पते. अत्र प्रश्नयति ' से किमाहु भंतेत्ति ' अत्र किं कारणं भदंता आहुर्गुरुराह- ' इच्छे ' इत्यादि, इच्छा चेदस्ति ते तदा परो यस्मै आनीतं स भुंजीत. इच्छा अभोजनरुचिश्चेत्तदा न भुंजीत, यदि च परोऽनिच्छन् दाक्षिण्याद्भुंक्ते ततो ग्लानिस्तस्याजीर्णादिना, न भुंक्ते चेत्तदा वर्षासु जलहरितबाहुल्येन स्थंडिलदौर्लभ्यात्परिष्ठापने दोषस्तस्मात्पृष्ट्वानेयमिति.

' उदउल्लेण ' इत्यादि, उदकार्द्रेण गलद्बिंदुयुक्तेन सस्निग्धेन ईषदुदकयुक्तेन ' से किमाहु भंते ' स भगवांस्तीर्थंकरः किमाहात्र कारणं, गुरुराह सत्तेत्यादि ' सप्त स्नेहायतनानि जलावस्थानस्थानानि, येषु जलं चिरेण शुष्यति, पाणी हस्तौ, पाणिरेखा आयूरेखादयस्तासु चिरमुदकं तिष्ठति. नखा अखंडा नखशिखास्तदग्रभागाः, भ्रूर्नेत्रोर्ध्वरोमाणि, अहरुट्टा दाढिका, उत्तरोट्टा श्मश्रूणि इति. विगतोदको बिंदुरहितश्छिन्नस्नेहः सर्वथा जलहीनः. ' अट्ठ सुहुमाइं ' इत्यादि, सूक्ष्मत्वादल्पाधारत्वाच्च सूक्ष्माणि, अभीक्ष्णं पुनः पुनः यत्र यत्र स्थाने निषदनादाननिक्षेपादि करोति, ज्ञातव्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नि सूत्रोपदेशेन, दृष्टव्यानि चक्षुषा, ज्ञात्वा दृष्ट्वा च प्रीतिलेखितव्यानि, परिहर्तव्यतया विचारणीयानि. ' तमिति ' तद्यथा—प्राणसूक्ष्मं पंचविधं प्रज्ञप्तं तीर्थकरगणधरैरेकैकस्मिन् वर्णे सहस्रशो भेदाः, बहुप्रकाराश्च संयोगाः, ते सर्वेऽपि पंचसु कृष्णादिष्ववतरंति, प्राणसूक्ष्मं तु द्वींद्रियादयः, प्राणो यथानुद्धरीकुंथुः, स हि चलन्नेव विभाव्यते, न स्थितः सूक्ष्मत्वात. १. पन्नक उल्ली, स च प्रायः प्रावृषि भूमिकाष्ठनांम्रादिषु जायते, यत्रोत्पद्यते तद्द्रव्यसमवर्णश्च नाम पन्नत्ते इति, नामेति प्रसिद्धौ २.

बीजसूक्ष्मं कणिका शाल्यादिबीजानां नहीति रूढा नखिका. ३. हरितसूक्ष्मं नवोद्भिन्नं पृथ्वीसमवर्णं हरितं, तत्स्वल्पसंहननत्वात्स्तोकेनापि विनश्यति. ४. पुष्पसूक्ष्मं वटोदुंबरादीनां तत्समवर्णत्वादलक्ष्यं, तच्चोच्छ्वासेनापि विराध्यते. ५. अंडसूक्ष्मं उद्दंशामधुमक्षिकामत्कुणाद्यास्तेषामंडमुद्दंशांडं, उत्कलिकांडं लूतापुटांडं, पिपीलिकांडं कीटिकांडं, हलिका गृहकोकिला ब्राह्मणी वा तस्या अंडं हलिकांडं, हल्लोहलिया अहिलोडी सरडी ककिंडीत्येकार्थाः, तस्या अंडं, एतानि हि सूक्ष्माणि स्युः. ६. लयनमाश्रयः सत्वानां यत्र कीटिकाद्यनेकसूक्ष्मसत्वा भवंतीति लयनसूक्ष्मं, यथा उत्तिंगा भूस्वपका गर्दभाकृतयो जीवास्तेषां लयनं भूमावुत्कीर्णगृहं उत्तिंगलयनं, भृगुशुष्कभूराजी जलशोषानं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरं केदारादिषु स्फुटिता दालिरित्यर्थः. ' उज्जुएत्ति ' बिलं तालमूलकं तालमूलाकारं, अधः पृथुरुपरि सूक्ष्मं विवरं, शंबूकावर्तं भ्रमरगृहं ७. स्नेहसूक्ष्मं ' उस्सत्ति ' अवश्यायो यः खात्पतति, हिमं स्त्यानोदबिंदुः, महिका धूमरी, करका घनोपलाः, हरतनुर्भूनिःसृततृणाग्रबिंदुरूपो यो यवांकुरादौ दृश्यते. ८. अष्टास्वपि, ' से तं ' इति, तदेतत्.

अथ ऋतुबद्धवर्षालक्षणकालद्वयसामान्या सामाचारी—वर्षासु विशेषेणोच्यते, ' आयरीयं वा ' इत्यदि, आचार्यः सूत्रार्थव्याख्याता दिगाचार्यो वा. उपाध्यायः सूत्राध्यापकः. स्थविरो ज्ञानादिषु सीदतां स्थिरीकर्ता, उद्यतानामुपबृंहकश्च, प्रवर्तको ज्ञानादिषु प्रवर्तयिता, तत्र ज्ञाने पठ गुणय शृणु उद्देशादीन् कुरु इति, दर्शने दर्शनप्रभावकान् संमत्यादितर्कानभ्यस्येति चारित्रे प्रायश्चित्तमुद्वह? अनेषणादुःप्रत्युपेक्षितादि मा कृथाः, यथाशक्ति द्वादशधा तपो विधेहीत्यादि. गणी यस्य पार्श्वे आचार्याः सूत्राद्यभ्यस्यंति, गणिनो वान्ये आचार्याः सूत्राद्यर्थमुपसंपन्नाः, गणधरस्तीर्थकृच्छिष्यादिः, गणाविच्छेदको यः साधून् गृहीत्वा बहिःक्षेत्रे आस्ते, गच्छार्थं क्षेत्रोपधिमार्गणादौ प्रभावनादिकर्ता सूत्रार्थोभयवित्, यं चाधिपतित्वेन सामान्यसाधुमपि पुरस्कृत्य विहरति. ' ते य से वियरि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञा ' ते वाचार्यादयः से तस्य वितरेयुरनुज्ञां दद्युः. ' से किमाहु भंतेति ' प्राग्वत्.

आचार्य आह ' आयरिया पच्चवायं जाणंतित्ति ' इत्यादि बहुवचनांता गणस्य संसूचका भवंतीति न्यायादाचार्या आचार्यादयः प्रत्यपायमपायमपायपरिहारं च जानंति, प्रतिकूलोपायस्य प्रत्यपाय इति विग्रहेणापायपरिहारेऽपि प्रत्यपायशब्दो वर्तते, अनापृच्छ्य गतानां वृष्टिर्वा पतेत, प्रत्यनीकाः शैक्षस्वजना वोपद्रवेयुः, कलहो वा केनचिदाचार्यबालग्लानक्षपकप्रायोग्यं वा ग्राह्यमभविष्यत्, ते चातिशयशालिनस्तत्सर्वं विदित्वा तस्मै अदापयिष्यन्. एवं विहारभूमिश्चैत्यादिगमनं, विचारभूमिः शरीरचिंताद्यर्थं गमनं, अन्यद्वा प्रयोजनं लेपसीवनलिखनादि उच्छ्वासादिवर्जं सर्वमापृच्छ्यैव कर्तव्यमिति तत्वं, गुरुपारतंत्र्यस्यैव ज्ञानादिरूपत्वात्. ग्रामानुग्रामं ' हिंडिज्जएत्ति ' हिंडितुं भिक्षाद्यर्थं कारणे बालग्लानादौ, अन्यथा हि वर्षासु ग्रामानुग्रामं हिंडनं अनुचितमेव. ' एवइयं वा ' इयतीयं वा ' एवइखुत्तोइत्ति ' एतावतो वारान् अत्र प्रत्यपाया अस्या विकृतेर्ग्रहणेऽस्यायमपायो मोहोद्भवादिग्लानत्वादस्य गुणो वेति, ते इच्छंति वातिकपैत्तिकश्लेष्मिकसान्निपातिकरोगाणामातुरवैद्यप्रतिचारकभैषज्यादिरूपचतुष्पादां चिकित्सां. तथा चोक्तं—भिषग्द्रव्याण्युपस्थाता ।. रोगी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादचतुष्टयं ॥ चिकित्सितस्य निर्दिष्टं । प्रत्येकं तच्चतुर्गुणं ॥ १ ॥ दक्षस्तीर्थात्तशास्त्रार्थो । दृष्टकर्मा शुचिर्भिषग् ॥ बहुकल्पं बहुगुणं । संपन्नं योग्यमौषधं ॥ २ ॥ अनुरक्तः शुचिर्दक्षो । बुद्धिमान् प्रतिचारकः ॥ आरोगी भिषग्वश्यो । ज्ञापकः सत्ववानिति ॥ ३ ॥

'आउट्टित्तएत्ति' कारयितव्यं आउट्टिधातुरागमिकः करणार्थे, 'तवोकम्मंति' अर्धमासिकादितपः, अत्र प्रत्यपायां समर्थो असमर्थो वायं वैयावृत्त्यकरो वायं अन्यो वा वैयावृत्त्यकरोऽस्ति, नास्ति वा पारणकयोग्यं लाजातरणादिसंधुक्षणमस्ति नास्तिवेत्यादिकानाचार्या एव विदंति, अपश्चिमं चरमं मरणं अपश्चिममरणं, न पुनर्यत्प्रतिक्षणमायुर्दलिकानुभवलक्षमावीचिकमरणं, तदेवांतोऽपश्चिममरणस्तत्र भवा आर्षत्वादुत्तरपदवृद्धौ अपश्चिममरणांतिकी, सा चासौ संलेखना च संलिख्यते कृशीक्रियते शरीरकषायाद्यनयेति संलेखना, सा च द्रव्यभावभेदभिन्ना, 'चत्तारि विचित्ताइं' इत्यादिका अपश्चिममरणांतिकसंलेखना तस्या 'जूसणत्ति' जोषणं सेवा तया 'जूसिएत्ति' क्षिपतशरीरोऽत एव प्रत्याख्यातभक्तपानः पादपोपगतः कृतपादपोपगमनोऽत एव कालं जीवितकालं मरणकालं वानवकांक्षन्ननभिलष्यन् विहर्तुमिच्छेत्. अत्र च प्रत्यवाया अयं निस्तारको न वा समाधि-

पानकं निर्यापका वा संति न वेत्यादयः, क्षपकस्य हि उदरमलशोधनार्थं त्वगेलानागकेसरतमालपत्रमिश्रसशर्करक्कथितशीतलक्षारलक्षणं समाधिपानकं पाययित्वा पूगिफलादिद्रव्यैर्मधुरविरेकः कार्यतो निर्यापका शुद्धताद्यर्थमष्टचत्वारिंशत् ' परिठवित्तएत्ति ' व्युत्सृष्टुं धर्मजागरिकां आज्ञापायविपाकसंस्थानविचयभेदधर्मध्यानविधानादिना जागरणं धर्मजागरिका तां जागरितुमनुष्ठातुं ' वत्थंचेत्यादि ' पादप्रोञ्छनं रजोहरणं आतापयितुं पुनः पुनः, अनातापने उत्सापनकादयो दोषाः, वस्त्राद्युपधावातपे दत्ते बहिर्गंतुं यावत्कायोत्सर्गेऽपि स्थातुं न कल्पते, वृष्टिभयाद्यदि सन्निहितयतिरस्ति तदा तमुपधिं चिंतयति तदा कल्पते चिंतकाभावे तु जलक्लेदचौरहरणाप्कायविराधनोपकरणहास्यादयो दोषाः स्थानमूर्ध्वस्थानं तच्च कायोत्सर्गलक्षणं, ' इमं ता ' इत्यादि, इदं वस्त्रादि तावन्मुहूर्त्तकं मुहूर्त्तमात्रं जानीहि विज्ञापयेः, ' जावत्तावत्ति ' भाषामात्रं, यावदर्थे स च सन्निहितः साधुः से तस्य उपधिचिंतनेऽभ्याकारकर्तुः प्रतिशृणुयादंगीकुर्याद्वचनमिति शेषः, एषं स्पष्टं.

' अणभिग्गहिय ' इत्यदि, अनभिगृहीतशय्यासन एवानभिगृहीतशय्यासनिकः, स्वार्थे इकः, तथाविधेन भवितुं न कल्पते, न युक्तं, वर्षासु यतिना मणिकुट्टिमेऽपि पीठफलकाभिग्रहवतैव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाव्यं इत्यर्थः, अन्यथा शीतलायां भूमौ शयने कुंथ्वादिप्राणिविराधनाजीर्णादिदोषाश्च स्युः, आसने तु कुंथ्वादिसंघट्टनिषद्यामालिन्याप्कायवधादयः. 'आयाणमेयंति' कर्मणो दोषाणां वा आदानमुपादानकारणमेतदनभिग्रहीतशय्यासनिकत्वं. अथवाभिग्रहो निश्चयः स्वपरिगृहीतमेव शय्यासनं मे भोक्तव्यं, नान्यपरिगृहीतमिति. आदानत्वमेव दृढयति—'अणभिग्गहिएत्यादि' अनभिगृहीतशय्यासनिकस्येत्युक्तवत. अनुच्चाकुचिकस्य कुच परिस्पंदे, अकुचो अपरिस्पंदा निश्चला यस्याः कंबिका न चलंति, अदृढबंधने हि संघर्षान्मत्कुणकुंथ्वादिवधः स्यात. उच्चा हस्तादिं यावद्येन पिपीलिकावधो न स्यात्, सर्पादिर्वा न दशेच्च. 'उच्चात्रासावइकुचाचोच्चा' कुचा कंबादिमयी शय्या, सा विद्यते यस्यासावुच्चाकुचिको, न उच्चाकुचिकोऽनुच्चाकुचिको, नीचसपरिस्पंदशय्याकस्तस्य अनर्थकबंधिनः, पक्षमध्ये अनर्थकं निःप्रयोजनं एकवारोपरि द्वौ त्रीन् चतुरो वा वारान् कंबानां बंधान् ददाति, चतुरुपरि बहूनि वाट्टकानि बध्नाति, तथा वस्त्रापायपलिमंथादयो दोषाः, यदि चैकांगिकं चंपकादिदलं लभ्यते तदा तदेव ग्राह्यं बंधनादिप्रक्रियापरिहारात्.

अमितासनिकस्य अबद्धासनस्य स्थानात्स्थानांतरं हि मुहुर्मुहुः संक्रमेण सत्ववधः प्रवर्तते, अ-

For Private And Personal Use Only

नेकानि वा आसनानि सेवमानस्य अनातापिनः संस्तारपात्रादीनामातपेऽदातुस्तत्र च पनकसंसक्त्यादयो दोषाः, उपभोगे च जीववधः, उपभोगाभावे चोपकरणमधिकरणमेवेति, असमितस्येर्यादिषु, तत्रेर्यापारिष्ठापनिकासमित्योरसमितः सत्वान् हंति, भाषासमितावसमितश्च संपातिमान्, एषणासमितावसमितस्त्वयमप्कायः परिणतो न वेति स्नेहच्छेदं न वेति. आदाननिक्षेपसमितावसमितः पुनः स्थाननिषदनादाननिक्षेपादौ जीवान् विराध्यतीति. अभीक्ष्णं अभीक्ष्णं पुनः पुनरप्रतिलेखनाशीलस्य चक्षुषा दृष्ट्वा अप्रमार्जनाशीलस्य रजोहरणादिना अप्रमृज्य स्थानादिकर्तुर्दुःप्रतिलिखितदुःप्रमार्जितमप्रतिलिखिताप्रमार्जितमेव, नञ् कुत्सार्थत्वात तथा तथा तेन तेनानभिगृहीतशय्यासनिकत्वादिना प्रकारेण संयमो दुराराधो दुःप्रतिपाल्यो भवति, यथा यथा तानि स्थानानि करोति, तथा तथा संयमाराधना दुष्करा भवतीत्यर्थः. इत्यादानमुक्त्वानादानमाह—' आणायाणामेयंति ' कर्मणोऽसंयमस्य वानादानमेतत्, शय्यासनाभिग्रहवता भाव्यं, उच्चाकुच्चा च शय्या कर्तव्या, अर्थाय सकृच्च पक्षांतर्बंधनीया, कटुकानि चत्वारि कार्याणि, बद्धासनेन भाव्यं, कारण एवोद्भानात् संस्तारकादीन्यातपनीयानि, प्रतिलेखनाप्रमार्जनाशीलेन भाव्यं, यथायथैतानि स्थानानि करोति तथा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा संयमः स्वाराधितः सुकरो वा भवति, ततश्च मोक्षः. ' तउ उच्चारपासवणभूमीउ ' इति, अनधिसहिष्णोस्तिस्रोंतः, अधिसहिष्णोश्च बहिस्तिस्रो दूरव्याघाते मध्या तद्व्याघाते आसन्ना इत्यासन्नमध्यदूरभेदात् तिस्रः, आर्षत्वाद् ग्रीष्मशब्दो बहुत्वे स्त्रीलिंगश्च. ' उसन्नं ' इत्यादि, उसन्नंति प्रायेण बाहुल्येनेत्यर्थः, प्राणाश्च शंखनकेंद्रगोपादयः, तृणानि घासः, बीजानि तत्तद्वनस्पतिनामधुनोद्भिन्नानि, पनका उल्लयः, अथवा ' पाणायतणायत्ति ' प्राणानां जीवानां आयतनानि स्थानभूतानि बीजानि पनकहरितानि वेति योज्यं. क्वचित् ' पाणायणंति ' दृष्टं, तत्र प्राणायतनमित्यादि व्याख्येयं. ' तउमत्तयत्ति ' त्रीणि मात्रकाणि, तदभावे हि वेलातिक्रमेण वेगधारणे आत्मविराधना, वर्षति च बहिर्गमने संयमविराधना, अत्र चूर्णिः—

चाणिहिं तस्स गुम्मियादिगहणं तेण सत्तए वोसिरिता बाहिं णिच्चा परिठवेइ पासवणेवि अभिग्गहितो धरेइ तस्साईसइ जो जाहे वोसिरइ सो ताहे धारेइ, ण निक्खिवइ, सुवंतो वा उब्भंगेवि तयं चेव उवरिं दंडयं वा दोरेण बंधतिगो से असंसितयाए भूमीए अन्नकपरिठावेयत्ति. ' परिपज्जोसवणाउ ' इत्यादि, पर्युषणातः परमाषाढचतुर्मासकादनंतरं गोलोममात्रा अपि स्थापनीयाः,

For Private And Personal Use Only

आसतां दीर्घाः. धुवलोओ उ जिणाणं । निच्चं थेराण वासवासासु ॥ इति वचनात्, यावत्तां रजनीं भाद्रपदसितपंचमीरात्रिं नातिक्रमयेत्, पंचम्या रात्रेरर्वागेव लोचं कारयेत्, अयमभिप्रायो यदि समर्थस्तदा वर्षासु नित्यं लोचं कारयेत्, तदसमर्थोऽपि तां रात्रिं नोल्लंघयेत्, पर्युषणापर्वणि अवश्यं लोचं विना अतिक्रमणस्याकल्प्यत्वात्. ' उवायणावित्तएत्ति ' अतिक्रमयितुं केशेषु ह्यपकायो लगति, स च विराध्यते, तत्संगाच्च षट्पदिकाः संमूर्छंति, ताश्च कंडूयमानः खंडयति, नखक्षतिं च शिरसि करोतीति गोलोममात्रा अपि केशाः स्थापयितुं न कल्पंते, यदि च क्षुरेण मुंडापयति कर्तर्या वा कर्तयति, तदा आज्ञाभंगोऽनवस्था मिथ्यात्वं संयमात्मनोर्विराधना च षट्पदिकाश्छिद्यंते, नापितश्च पश्चात्कर्म करोति, अपभ्राजना च शासनस्य, तस्माल्लोच एव श्रेयान्, यदि वाऽसहिष्णुर्लोचे कृते ज्वरादिरुपद्रवो वा कस्यचित्, बालो वा रुद्यते, धर्मं वा त्यजेत्, ततो न तस्य लोचः कार्यः, क्षुरेण मुंडनीयः स इत्येतदेवाह—

' अज्जेणमित्यादि ' आर्येण साधुना क्षुरमुंडेन वा लुंचितशिरोजेन भवितव्यं स्यात्. ' उलुक्कत्ति ' लुंचिताः शिरोजाः केशा यस्य स तथा तेन, अपवादतो बालग्लानादिना क्षुरमुंडेन, उ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्सर्गतो लुंचितशिरोजेनेत्यर्थः. केवलं प्रासुकोदकमात्मना गृहीत्वा शिरः प्रक्षाल्य नापितस्यापि ह-स्तक्षुरक्षालनाय तदेव देयमिति यतना. यस्तु क्षुरेणापि कारयितुमक्षमो व्रणादिमच्छिरास्तस्य के-शाः कर्तर्या कल्पयितव्याः. ' पक्खियारोवत्ति ' पाक्षिकं बंधदानं संस्तारकदवरकाणां पक्षे पक्षे बंधा मोक्तव्याः प्रतिलेखितव्याश्चेत्यर्थः. अथवा आलोचनाप्रायश्चित्तं पक्षे पक्षे ग्राह्यं सर्वकालं, विशेषतो वर्षासु. ' मासिए खुरमुंडेत्ति ' मासे मासेऽसहिष्णुना मुंडनं कारणीयं, ' अद्धमासिए कत्तरिमुंडे-त्ति ' यदि कर्तर्या कारयति तदा पक्षे पक्षे गुप्तं कारणीयं. क्षुरकर्तयोश्च लोचप्रायश्चित्तं निशीथोक्तं लघुगुरुमासलक्षणं देयं. ' छम्मासिए लोए संवच्छरीए वा थेरकप्पेत्ति ' षाण्मासिको लोचः स्थवि-राणां वृद्धानां जराजर्जरत्वेनासामर्थ्यत्वाद् दृष्टिरक्षार्थं च, अर्थात्तरुणानां चातुर्मासिकः संवत्सरो व-र्षारात्रः संवत्सरं वापि. परं पमाणं बीयं च । वासं न तेहिं वसिज्जा ॥ इति वचनात्.

ततः संवत्सरे वर्षासु भवः सांवत्सरिको वा लोचः स्थविरकल्पे स्थविरकल्पस्थितानां, वर्षासु हि जिनकल्पिकस्थविरकल्पिकानां लोच इति, वा शब्दो विकल्पार्थः, अपवादतो नित्यलोचाकरणे-ऽपि पर्युषणापर्वण्यवश्यं लोचः कार्य इति सूचयति. अथवैष सर्वे आपृच्छय भिक्षाचर्यागमनविकृतिग्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। उक्किंवहसागपत्तेहिं ॥ १ ॥ जं अज्जियं चरित्तं । देसूणाएवि पुव्वकोमीए ॥ तंपि कसायमित्तो । हारेइ नरो मुहुत्तेण ॥ १ ॥ इत्यादिभिरुपदेशैः ' संमइ ' शोभना मतिः, रागद्वेषरहितता, तत्पूर्वं वा संपृच्छता सूत्रार्थेषु ग्लानाग्लानानां वा तद्वहलेन भवितव्यं, रागद्वेषौ विहाय येन सार्धमधिकरणमासीत्तेन सह सूत्रार्थसंप्रश्नः कर्तव्यः, तदुदंतश्च सोढव्यः. नन्वेकतरस्य क्षमयतो यद्येको नोपशाम्यति तदा का गतिरित्याह—' जो उवसमइत्यादि ' य उपशाम्यति उपशमयति वा कषायात् तस्यास्याराधना ज्ञानादीनां, विपर्ययः सुगम एव, ' सामन्नं ' श्रमणभावः, उपशमसारमुपशमप्रधानं, खु निश्चये, सामन्नमणुचरंतस्स । कसाया जस्स उक्कडा हुंति ॥ संनामिउच्छुपुप्फं व । निष्फलं तस्स सामन्नं ॥ १ ॥ इति वचनात्. ' तउ उवसग्गा ' इत्यादि, वर्षासूपाश्रयाश्रयो ग्राह्यः, संसक्तिजलप्लावनादिभयात्. तं इतिपदं तत्रेत्यर्थे संभाव्यते. ' वेउव्विया पमिलेहा ' क्वचिच्च ' वेउट्टिया पडिलेहा ' इति दृश्यते. उभयत्रापि पुनः पुनरित्यर्थः. ' साइज्जिया पमज्जणाइत्ति ' आर्षः— जे भिक्खू हत्थकम्मं करेइ, करितं वा साजइ, इति वचनात्, इजिधातुरास्वादने वर्तते, तत उपभुज्यमानो य उपाश्रयः, से कयमाणे कडेत्ति न्यायात् ' साइज्जिउत्ति ' भण्यते, तत्संबंधिनी प्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हणादिमात्रकावसानः सांवत्सरिको वर्षासंबंधी स्थविरकल्पः स्थविरमर्यादा वा, वाशब्दः किंचिज्जिननकल्पिकानामपि सामान्यमिति पक्षांतरं सूचयति, प्रायस्तु स्थविराणामेवायं कल्प इत्यर्थः. 'अहिगगरणं व दित्तए ' इत्यादि, अधिकरणं राटिस्ततस्तत्करं वचनमप्यधिकरणं ' अकप्पेणंति ' आर्य अकल्पेनानाचारेण वदसीति स वक्तव्यः, पर्युषणादिने वा यदधिकरणमुत्पन्नं तत्पर्युषणायां क्षामितं, यच्च त्वं पर्युषणातः परमप्यधिकरणं वदसि सोऽयमकल्प इति भावः. ' नियूहियव्वेसिया ' इति, तांबूलपत्रदृष्टांतेन गच्छान्निष्कास्यः स्यात्, उपशांतोपस्थितस्य च मूलं दातव्यं. ' इह खलु ' इत्यादि, इह प्रवचने गद्ये पर्युषणादिने ' करवटः ' इच्चैः शब्दः कटुको जकारमकारादिरूपो विग्रहः कलहः समुत्पद्येत, शैक्षयोऽवमरात्निकः प्रथमसामाचारीवितथकरणेऽपराद्धः, तथापि शैक्षयेण रात्निकः क्षमणीयः.

अथ शैक्षोऽपुष्टधर्मस्तदा रात्निकस्तं प्रथमं क्षमयति, तस्मात् क्षमितव्यं स्वयमेव, क्षमयितव्यः परः, अव्यक्तत्वान्नपुंसकत्वं यथा किं तस्या गर्भे जातमिति. तथा उपशमितव्यमात्मनोपशमः कर्तव्यः, उपशमितव्यः परः. जं अज्जियं समी खल्लु । एहिं तवनियमबंभमइएहिं ॥ साहुतयंकलहंता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्जना साइजिया, यस्मिन्नुपाश्रये स्थितास्तं प्रातः प्रमार्जयंति, पुनर्निद्रां गतेषु साधुषु, पुनर्मध्याह्ने, पुनः प्रतिलेखनाकाले तृतीयप्रहरांते इति वारचतुष्टयं प्रमार्जयंति वर्षासु, ऋतुबद्धे त्रिः, अयं च विधिरसंसक्ते, संसक्ते तु पुनः पुनः प्रमार्जयंति, शेषोपाश्रयद्वयं तु प्रतिदिनं प्रतिलेखंति प्रत्यवेक्षंते, मा कोऽपि तत्र स्थास्यति ममत्वं वा करिष्यतीति, तृतीये दिवसे पादप्रोंछनकेन प्रमार्जयंति. अत उक्तं ' वेउव्विया पडिलेहत्ति ' क्वचित् ' साइज्जिया पमिलेहत्ति ' दृश्यते, तत्रापि प्रतिलेखनाप्रमार्जनयोरैक्यविवक्षया स एवार्थः. ' अन्नयरिं ' इत्यादि, अन्यतरां दिशं पूर्वादिदिशमनुदिशं आग्नेय्यादिकामवगृह्योद्दिश्याहममुकां दिशमनुदिशं वा यास्यामीत्यन्यसाधुन्यः कथयित्वा च जक्तपानं गवेषयितुं विहर्तुं कल्पते ' से किमाहु भंतेत्ति ' किमत्र कारणं? आचार्य आह उसन्नं प्रायेण श्रमणा जगवंतो वर्षासु तपसं प्रयुक्ताः प्रायश्चित्तवहनार्थं संयमार्थं स्निग्धकाले मोहजयार्थं वा षष्ठादितपश्चारिणो जवंति, ते च तपस्विनो दुर्बलास्तपसैव कृशांगाः.

अत एव क्लांताः संतो मूर्छेयुर्वा प्रपतेयुर्वा, तत्र मूर्छायां इंद्रियमनोवैकल्यं, प्रपतनं दौर्बल्याद् जूम्यादिषु पतनं, तमेव दिशमनुदिशं वा श्रमणाभगवंतः प्रतिजाग्रति प्रतिचरंति, गवेषयंते, अयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावार्थः—भक्ताद्यर्थे ग्रामादौ यस्यां दिशि विदिशि वा गछेयुस्तां गुर्वादिन्यः कथयित्वा गछंति, ये-न तेषां तत्र गतानां तपःक्लमादिना मूर्छितानां प्रपतितानां च पाश्चात्याः साधवस्तस्यां दिशि विदिशि गत्वा यतिसारां कुर्वंति, अकथयित्वा तु गतानां दिगपरिज्ञानात्कथं ते सारां कुर्युरिति. 'जाव च-त्तारि पंच' इत्यादि, वर्षाकल्पौषधवैद्यार्थं ग्लानसाराकरणार्थं वा, यावच्चत्वारि पंचयोजनानि गत्वा प्रतिनिवर्तते, तत्प्राप्तौ तदैव व्याघुटेत, न तु यत्र लब्धं तत्रैव वसेत्, स्वस्थानं प्राप्तुमक्षमश्चांतरा-पि वसेन्न तु तत्रैव वसेत्, एवं हि वीर्याचार आराधितो भवति, यत्र दिने वर्षाकल्पादि लब्धं त-द्दिनशर्विं तत्रैव नातिक्रमयेत, यस्यां वेलायां तल्लब्धं तस्यामेव वेलायां निर्गत्य बहिस्तिष्टेत्, का-रणे तु तादृशि तत्रापि वसेदिति हृदयं. इति पर्युषणासामाचारीमभिधाय तत्पालनायाः फलमाह—

'इच्चेयं' इत्यादि, इति रूपप्रदर्शने, एतं पूर्वोक्तं सांवत्सरिकं वर्षारात्रिकं स्थविरकल्पं यद्य-पि किंचिज्जिनकल्पिकानामपि सामान्यं, तथापि नूम्ना स्थविराणामेव, सामाचारीति स्थविरकल्पिक-मर्यादां यथासूत्रं यथा सूत्रे नणितं, न सूत्रव्यपेतं, तथा कुर्वतः कल्पो भवति अन्यथा त्वकल्प इ-ति यथाकल्पं. एवं कुर्वतश्च ज्ञानादित्रयलक्षणो मार्गयति यथामार्गं यथातथ्यं यथैव सत्यमुपदिष्टं न-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गवद्भिस्तथा सम्यग्यथावस्थितं ' काएणत्ति ' उपलक्षणत्वात्कायवाग्मनोभिः, अथवा कायशब्देनैव योगत्रयं व्याख्यायते, तथा हि—कायेन शरीरेण, कै गै रै शब्दे, कायते उच्चार्यते इति कायो वचनं तेन, कं ज्ञानं तदेवात्मस्वरूपं यस्य तच्चात्ममनोबुद्ध्यात्मकत्वान्मनसस्तेन, ततश्च कायवाग्मनोभिरित्यर्थः.

स्पृष्ट्वा आसेव्य पालयित्वा अतिचारेभ्यो रक्षयित्वा शोभयित्वा शोभयित्वा विधिवत्करणेन तीरयित्वा यावज्जीवमाराध्य यावज्जीवमाराधनयांतं नीत्वा वा कीर्तयित्वान्येभ्य उपदिश्य आराध्य, न विराध्य यथावत्करणात् आज्ञया भगवदुपदेशेनानुपाल्य पूर्वैः पालितात् पश्चात्पालनेन ' अत्थेगइयत्ति ' संत्येके येऽत्युत्तमतया तत्पालनया तस्मिन्नेव भवग्रहणे भवे सिध्ध्यंति. उत्तमयानुपालनया द्वितीये भवे, मध्यमया तु तृतीये, जघन्ययापि सप्ताष्टौ वा भवग्रहणानि नातिक्रामंतीति समुदायार्थः, तत्र सिध्ध्यंति निष्ठितार्था भवंति, संबुध्ध्यंते केवलज्ञानेन, मुच्यंते भवोपग्राहिकर्मांशेभ्यः, परिनिर्वांति, कर्मकृतसकलसंतापविरहाच्छीतीभवंति. किमुक्तं भवति? सर्वदुःखानां शारीरमानसानामंतं विनाशं कुर्वंतीति. न चैतत्स्वमनीषिकयोच्यते, किंतु भगवदुपदेशपारतंत्र्येणेत्याह—' तेणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालेणं ' इत्यादि सुगमं, न वरं तस्मिन् काले चतुर्थारकप्रांते तस्मिन् समये राजगृहसमवसरणाव-सरे मध्यगतः श्रमणादिदेव्यंतपरिषन्मध्यवर्ती ' चेवत्ति ' अवधारणे, मध्यग एव न पुनरेकांते, अनेनोद्घाट्य शिर इत्युक्तं. क्वचित् ' सदेवमणुयासुराए परिसाए मज्झगएत्ति ' पाठः, तत्र परि सर्वतः सीदतीति परिषत्, परिषद्ग्रहणात्समवसरणे गृहिणामपि कथयत इत्युक्तं, एवमाख्याति यथोक्तं कथयति एवं भाषते वाग्योगेन, एवं प्रज्ञापयति अनुपालितस्य फलं ज्ञापयति, एवं प्ररूपयति दर्पणतल इव प्रतिरूपं श्रोतॄणां हृदये संक्रमयति. इदानीमाख्येयस्य नामधेयमाह—

पर्युषणाकल्पनामाध्ययनमिदं भूयोभूय उपदर्शयति, विस्मरणशीलश्रोत्रनुग्रहार्थमनेकशः प्रदर्शयति, द्विर्वचनं निकाचनार्थं, ' सअहंति ' सार्थं प्रयोजनयुक्तं, न पुनरंतर्गरुकंटकशाखामर्दनवत्, तथाविधवर्णानुपूर्वीमात्रवद्वा सहेतुदोषदर्शनं हेतुः, अननुपालयतोऽमी दोषा इति. अर्थं वा हेतु निमित्तं यथा ' सवीसइराए मासे वइक्कंते पज्जोसवेइ ' इत्युक्ते किं निमित्तं ' पाएणं अगारीणं आगाराइं ' इत्यादिको हेतुः, तेन सहितं सहेतु, तथा सकारणं कारणमपवादो यथा ' आरेणावि कप्पइ पज्जोसवित्तए ' इति, तेन सहितं सकारणंससूत्रं सार्थं सोभयमिति प्रतीतं.

For Private And Personal Use Only

अथ सार्थत्वं कथमध्ययनस्य, नह्यत्र टीकादाविवार्थः पृथग्व्याख्यातोऽस्ति, सत्यं, सूत्रस्यार्थनांतरीयकत्वाददोषः, तथा सव्याकरणं, व्याकरणं पृष्टापृष्टार्थकथनं तत्सहितमित्यर्थः, ' इति बेमित्ति ' इति ब्रवीमि, श्रीभद्रबाहुस्वामी स्वशिष्यान् प्रति ब्रूते, नेदं स्वमनीषिकया ब्रवीमि, किंतु तीर्थकरगणधरोपदेशेनेति, अनेन च गुरुपारतंत्र्यमभिहितमिति. इतेः स्वरांतश्च द्विरिति इलोपे तकारस्य च द्वित्वे ' उवदंसइत्ति ' इतिरूपः ' पज्जोसवणाकप्पो समत्तोत्ति ' पर्युषणाकल्पः समाप्त इति.

पर्युषणा वर्षासु एकक्षेत्रनिवासस्तस्य संबंधी कल्पः, समाचारी साधून् प्रतीत्य विधिप्रतिषेधरूपे इति कर्तव्यता, तदभिधेययोगादध्ययनमपि पर्युषणाकल्पो रत्नपरीक्षागजशिष्यादिवत्, स च दशाश्रुतस्कंधमध्ययनं, समाप्तः समर्थित इति. ।। श्रीरस्तु ।।

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे
पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

।। समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ।।

---

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री पावापुरी जीमें मंगा या गया

॥ इति श्रीसंदेहविषौषधी समाप्ता ॥

For Private And Personal Use Only